121
1(B)

अथ शिशुपालवधम्।
माघप्रणीतम्।

Atha Shishupal vadham

[illegible] के समानुयात् ।१।
[illegible] विपरीता [illegible] सारवके वलं ।।२।।

[illegible]

अथ शिशुपालवधम्
माघप्रणीतम्

121
1(B)

द्विधाकृतात्मा किमयं दिवाकरो विधूमरोचिः किमयं हुताशनः

माघ० ॥श्रीराधावल्लभोजयति॥ ॥श्रियःपतिःश्रीमतिशासितुंजगज्जगन्निवासोवसुदेवसद्मनि॥वस
१ न्ददर्शावतरंतमंबराद्धिरण्यगर्भांगभुवंमुनिंहरिः॥१॥गतंतिरश्चीनमनूरुसारथेःप्रसिद्धमूर्द्ध
ज्वलनंहविर्भुजः॥पतत्यधोधामविसारिसर्वतःकिमेतदित्याकुलमीक्षितंजनैः॥०२॥चयस्त्वि
षामित्यवधारितंपुराततःशरीरीतिविभाविताकृतिं॥विभुर्विभक्तावयवंपुमानितिक्रमादमुंना १
रदइत्यबोधिसः॥०३॥नवानधोधोवृहतःपयोधरान्समूढकर्पूरपरागपांडुरं॥क्षणंक्षणोत्क्षिप्त
गजेंद्रकृत्तिनास्फुटोपमंभूतिसितेनशंभुना॥०४॥दधानमंभोरुहकेशरद्युतीर्जटाःशरच्चंद्रम कृष्ण
रीचिरोचिषं॥विपाकपिंगास्तुहिनस्थलीरुहोधराधरेंद्रंव्रततीततीरिव॥०५॥पिशंगमौंजी
युजमर्जुनच्छविंवसानमेणाजिनमंजनद्युति॥सुवर्णसूत्राकलिताधरांबरांविडंबयंतंशिति

श्वेतछवि धृतं

शितीधवलमेचकयोः
बलदेवस्यतनु
धावामरः नी
लांबरोरोहिणेयस्तालांकोमुशलीहलः

स२ ६

वासंस्तनुं विहंगराजांगरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितंतुभिः ॥ कृतोपवीतंहिमशुभ्र

मुच्चकैर्घनंघनांतेतडितांगुणैरिव ॥७॥ निसर्गचित्रोज्वलसूक्ष्मपक्ष्मणालसद्बिसछेदसि

तांगसंगिना ॥ चकासतंचारुचमूरुचर्मणाकुथेननागेंद्रमिवेंद्रवाहनं ॥८॥ अजस्रमा

स्फालितवल्लकीगुणक्षतोज्वलांगुष्ठनखांशुभिन्नया ॥ पुरःप्रवालैरिवपूरितार्द्धयावि ४ सितया द्युतिशेषः

भांतमछस्फटिकाक्षमालया ॥९॥ रणद्भिराघट्टनयानभस्वतःपृथग्विभिन्नश्रुतिमंडलैः

स्वरैः ॥ स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्षमाणंमहतींमुहुर्मुहुः ॥१०॥ कुलकं ॥ निव

र्त्यसोनुव्रजतःकृतानतीनतींद्रियज्ञाननिधिर्नभस्सदः ॥ समासदत्सादितदैत्यसंपदः

पदंमहेंद्रालयचारुचक्रिणः ॥११॥ पतत्पतंगप्रतिमस्तपोनिधिःपुरोस्ययावन्नभुविव्यली

महतीयत तंत्रीका वीणा सा च नारदस्यैव तदुक्तं ॥ विश्वावसोस्तु बृहती तुंबुरोस्तु कलावती महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपीति ॥८=३

यता॥ गिरेस्तडित्वानिवतावदुच्चकैर्जवेनपीठादुदतिष्ठदच्युतः॥१२॥ अथप्रजत्नोन्नमिता
नमत्फणैर्धृतेकथंचित्फणिनांगणैरधः॥ न्यधायिषातामभिदेवकीसुतंसुतेनधातुश्च
रणौभुवस्तले॥१३॥ तमर्घ्यमर्घ्यादिकयादिपूरुषःसपर्ययासाधुसपर्यपूपुजत॥ गृहानु
पैतुंप्रणयादभीप्सवोभवंतिनापुण्यकृतांमनीषिणः॥१४॥ नयावदेतावुदपश्यदुत्थि
तौजनस्तुषारांजनपर्वतावि व॥ स्वहस्तदत्तेमुनिमासनेमुनिश्चिरंतनस्तावदभिन्यवी
विशत॥१५॥ महामहानीलशिलारुचःपुरोनिषेदिवान्कंसकृषःसविष्टरे॥ श्रितोदया
द्रेरभिसायमुच्चकैरचूचुरच्चंद्रमसोभिरामतां॥१६॥ विधायतस्यापचितिंप्रसेदुषःप्रका
ममप्रीयतयज्वनांप्रियः॥ ग्रहीतुमार्यान्परिचर्ययामुहुर्महानुभावाहिनितांतमर्थिनः॥१७॥

२= तनु २

अशेषतीर्थोपहृताः कमंडलोर्निधायपाणावृषिणाभ्युदीरिताः॥ अघौघविध्वंसविधौपरीयसी
र्नतेनमूर्ध्ना हरिरग्रहीदपः॥१८॥ सकांचनेयत्रमुनेरनुज्ञयानवांबुद श्यामवपुर्न्यविक्षत॥
जिगायजंबूजनितश्रियः श्रियंसुमेरुशृंगस्यतदातदासनं॥१९॥ सतप्तकार्तस्वरभास्वरांबरः क
ठोरताराधिपलांछनछविः॥ विदिद्युतेवाडवजातवेदसः शिखाभिराश्लिष्टइवांभसांनिधिः॥२०॥
रथांगपाणेः पटलेनरोचिषामृषित्विषः संवलिताविरेजिरे॥ चलत्पलाशांतरगोचरास्तरोस्तुषा
रमूर्तेरिवनक्तमंशवः॥२१॥ प्रफुल्लतापिछनिभैरभीशुभिश्शुभैश्चसप्तछदपांशुपांडुभिः॥ परस्प
रेणछुरितामलछवीतदेकवर्णाविवतौबभूवतुः॥२२॥ युगांतकालप्रतिसंहृतात्मनोजगंति
यस्यांसविकाशमासत॥ तनौममुस्तत्रनकैटभद्विषस्तपोधनाभ्यागमसंभवामुदः॥२३॥ निय

अभीशुः प्रग्रहे रश्मौ विविशा श्वतः =३
म१

माघ०
३

मिवाधिदी
धितिं मुनिमभि
मुदा विका
शं मुपेयुषी उपगतं =

धामानमिवाधिदीधितिं मुदा विकाशं मुनिमभ्युपेयुषी ॥ विलोचने विभ्रदधिश्रितश्रिणी स पुं
डरीकाक्ष इति स्फुटोऽभवत् ॥२४॥ सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लंभयन्
द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः ॥२५॥ हरत्यघं संप्रति हेतु
रेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ॥ शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि यो
ग्यतां ॥२६॥ जगत्यपर्याप्तसहस्रभानुना न यन्नियंतुं समभावि भानुना ॥ प्रसह्य तेजोभिरसं
ख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः ॥२७॥ कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेप
निराकुलात्मना ॥ सदोपयोगेऽपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसंपदामिव ॥२८॥ विलोकने
नैव तवामुना मुने कृतः कृतार्थोऽस्मि निवर्हितांहसा ॥ तथापि शुश्रूषुरहं गरीयसीर्गिरोऽथ

३
राम०

महदादिभिःपृथग्भूतं ५

वाञ्छेयसिकेन नलप्यते ॥२९॥ गतस्पृहोप्यागमनप्रयोजनं वदेति वक्तुं व्यवसीयते यया ॥ तनोति नस्ता
मुदितात्मगौरवो गुरुस्तवैवागम एष धृष्टतां ॥३०॥ इति ब्रुवंतं तमुवाच सव्रती न वाच्यमित्थं पुरुषो
त्तम त्वया ॥ त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरु योगिनामपि ॥३१॥ उदीर्णरागप्रति
रोधकं जनैरनीदृशं मञ्जुलतयातिदुर्गमं ॥ उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्र
या ॥३२॥ उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन ॥ बहिर्विकारं प्रकृतेः पृथ
३प्रवंक्ता: ग्विदुः पुरातनं त्वां पुरुषं पुराविदः ॥३३॥ निवेशयामासिथ हेलयोद्धृतं फणाभृतां छादनमेकमो
कसः ॥ जगत्त्रयैकस्थपतिस्त्वमुच्चकैरहीश्वरस्तंभशिरस्सु भूतले ॥३४॥ अनन्यगुर्वास्तव केन
केवलं पुराणमूर्तेर्महिमावगम्यते ॥ मनुष्यजन्मापि सुरासुरान्गुरोर्भवान्नभवच्छेदकरैः करोत्यधः ॥३५॥

पुनरुद्भवनिरहितैः ... प्राप्य स्थानं अग्र मालंबने प्राप्ये इति विग्रहः ४

३ ओकस्स्थानि चाश्रय इति वैजयंती ३

गोचरः ३ [illegible] कंठे समृद्धिः कोडो [illegible] वर्णविसर्गवारिषु [illegible] =४ कुसुमादिति शेषः१

माघ० लघूकरिष्यन्नतिभारभंगुराममूंकिलत्वंत्रिदिवादवातरः॥ उद्दूढलोकत्रितयेनसांप्रतंगुरुर्द्धरित्रीक्रि
४॥ यतेतरांत्वया॥३६॥ निजौजसोज्जासयितुंजगद्द्रुहामुपाजिहीथानमहीतलंयदि॥ समाहितैरप्य
निरूपितस्ततःपदंदृशःस्याःकथमीशमादृशां॥३७॥ उपप्लुतंपातुमदोमदोद्धतैस्त्वमेवविश्वंभर
विश्वमीशिषे॥ ऋतेरवेःक्षालयितुंक्षमेतकःक्षपातमस्कांडमलीमसंनभः॥३८॥ करोतिकंसा
दिमहीभृतांवधाज्जनोमृगाणामिवयत्तवस्तवं॥ हरेर्हिरण्याक्षपुरःसरासुरद्विपद्विषःप्रस्तुत ४॥
सातिरस्क्रिया॥३९॥ प्रवृत्तएवस्वयमुज्झितश्रमःक्रमेणपेष्टुंभुवनद्विषामसि॥ तथापिवाचा राम
लतयायुनक्तिमांमिथस्त्वदाभाषणलोलुपंमनः॥४०॥ तदिंद्रसंदिष्टमुपेंद्रयद्वचःक्षणंम
याविश्वजनीनमुच्यते॥ समस्तकार्येषुगतेनधुर्यतामहिद्विषस्तद्भवतानिशम्यतां॥४१॥ श्री

अहिसंज्ञको दैत्यः=१

नृदन्नमिः प्रतिपत्तजन्मनां भियां तनूजस्तपनद्युतिर्दितेः ॥ यमिंद्रशब्दार्थनिषूदनं हरेर्हिरण्यपू
र्वंकशिपुं प्रचक्षते ॥४२॥ समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयतां ॥ भयस्य पू
र्वावतरस्तरस्विना मनस्सु येन द्युषदां न्यधीयत ॥४३॥ दिशामधीशांश्चतुरो यतः सुरानपा
स्य तं रागहृताः सिषेविरे ॥ अवापुरारभ्य ततश्चला इति प्रवादमुच्चैरयशस्करं श्रियः ॥४४॥ पु
राणि दुर्गाणि निशातमायुधं बलानि शूराणि घनाश्च कंचुकाः ॥ स्वरूपशोभैकगुणानि नाकि
नां गणैस्तमाशंक्य तदादि चक्रिरे ॥४५॥ ससंचरिष्णुर्भुवनांतरेषु यां यदृच्छयाशिश्रियदाश्रयः
श्रियं ॥ अकारितस्यै मुकुटोपलस्खलत्करैस्त्रिसंध्यं त्रिदशैर्दिशे नमः ४६ सराछरैरभित्रघनेन
विभ्रता नृसिंह सैंहीमतनुं तनुं त्वया ॥ समुग्धकांतास्तनसंगभंगुरैरुरोविदारं प्रतिचस्करे नखैः ॥४७॥

उक्तं च हिरण्यकशिपुनामा यो दिशामधे [illegible] ॥
[illegible] =२
श्री

माघ०

विनोदमिच्छन्नथदर्पजन्मनोरणेनकंड्वास्त्रिदशैःसमंपुनः॥ सरावणोनामनिकामभीष
णंबभूवरक्षःक्षतरक्षणंदिवः॥४८॥ प्रभुर्बुभूषुर्भुवनत्रयस्ययःशिरोतिरागाद्दशमंचिक
र्तिषुः॥ अतर्कयद्विघ्नमिवेष्टसाहसःप्रसादमिछासदृशंपिनाकिनः॥४९॥ समुत्क्षिपन्यः
५ पृथिवीभृतांवरंवरप्रदानस्यचकारशूलिनः॥ त्रसत्तुषाराद्रिसुतासंभ्रमस्वयंग्रहाश्लेषसु
खेननिःक्रयं॥५०॥ पुरीमवस्कंदलुनीहिनंदनंमुषाणरत्नानिहरामरांगनाः॥ विगृह्यच
क्रेनमुचिद्विषाबलीयइत्थमस्वास्थ्यमहर्दिवंदिवः॥५१॥ सलीलयातानिनभर्तुर ५
भ्रमोर्नचित्रमुच्चैःश्रवसःपदक्रमं॥ अनुद्रुतःसंयतियेनकेवलंबलस्यशत्रुःप्रशशंससशीघ्र राम
तां॥५२॥ अशक्नुवन्सोढुमधीरलोचनःसहस्ररश्मेरिवयस्यदर्शनं॥ प्रविश्यहेमाद्रिगु

मदोदग्रेमदान
यो रितिविश्वः=३

मनुष्यधर्मा धनदो राजराजो धनाधिपः इत्यमरः=३
१=महेश्वरमुक्तकं यालयाः कौशिक इत्यमरः=१

मानसंसर
सिस्वांते इति
विश्वः=४

हारहांतरं निनायविभ्यद्दिवसानिकौसिकः ।।५३।। रहह्छिलानिष्ठुरकंठघट्टनाविकीर्णलो
लाग्निकणंसुरद्विषः ।। जगत्प्रभोरप्रसहिष्णुवैष्णवंनचक्रमस्याक्रमताधिकंधरं ।।५४।। विभिन्नशं
खः कलुषीभवन्मुहुर्मदेनदंतीवमनुष्यधर्मणः ।। निरस्तगांभीर्यमपास्तपुष्पकः प्रकंपयामा
सनमानसंनसः ।।५५।। रणेषुयस्यप्रहिताः प्रचेतसासरोषहुंकारपराङ्मुखीकृताः ।। प्रहर्तुरेवो
रगराजरज्जवोजवेनकंठंसभयाः प्रपेदिरे ।।परतभर्तुर्महिषोमुनाथदंतुर्विधातुमुत्खातविषाणमं
डलः ।। इतेपिभारेमहतस्त्रपाभराद्वाहुःखेनभृशानतंशिरः ।।५७।। स्पृशन्सशीकःसमयेषु
चावपिस्थितःकरायैरसमग्रपातिभिः ।। अघर्मघर्मोदकबिंदुमौक्तिकैरलंचकारास्यवधू
रहस्करः ।।५८।। कलासमयेगहानेमुंचतामनस्विनीः कथयितुंपटीयसा ।। विलासिन

वलिहस्तांशवः कराउत्यमरः=२

कलाशिल्पेचित्रवृत्तोवंद्धांशेकल
नकलेतिवैजयंती=१

क्रीडालीला त्वनर्मवेत्यमरः =१
निशांतं गृहं निशांतयोरिति विश्वः =३
अंतरीयोपसंव्यानपरिधानान्यधोंशुके इत्यमरः =३
विन्नोऽसि नीविचत्रमदंतेलाय पाठः =१
कर्णान्नैस्वविशेषणं

माघ० ६

स्तस्य वितत्वतारतिं न नर्मसाचिव्यमकारि नेंदुना ॥५९॥ विदग्धलीलोचितदंतपत्रिकावि
धित्सया नूनमनेन मानिना ॥ न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति
॥६०॥ निशांतनारीपरिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः ॥ प्रियेति तस्यानपराध
बाधिताः प्रकंपनेनानुचकंपिरे सुराः ॥६१॥ तिरस्कृतस्तस्य जनाभिभाविना मुहुर्महिम्ना मह
सां महीयसां ॥ बभार बाष्पैर्द्विगुणीकृतं तनुस्तनूनपाद्धूमवितानमाधिजैः ॥६२॥ तदीयमातं
गघटाविघट्टितैः कटस्थलप्रोषितदानवारिभिः ॥ गृहीतदिक्कैरपुनर्निवर्तिभिश्चिरस्य याथार्थ्य
मलंभि दिग्गजैः ॥६३॥ परस्य मर्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्मगामिभिः ॥ तमिद्धमा
राधयितुं सकर्णकैः कुलैर्न भेजे फणिनां भुजंगता ॥६४॥ तपेन वर्षाः शरदा हिमागमो वसंतलक्ष्म्या

६
राम०

विषाणं पुंसि शृंगे स्यात् क्रोडदंते च दंतयोरिति विश्वः =२

भुजंगो विटसर्पयोरिति हलायुधः =१
द्विजिह्वौ सर्पसूचकाविनत्यमरः =२

सोष्मणः सदर्पस्य

अदो हननं भवान्स्मरतीति किं कुः प्रत्यभिजानाति किमित्यर्थः =४ जलार्द्रैर्जलोक्षित तालवृंतं =२

शिशिरः समेत्य च ॥ प्रसूनक्लृप्तिं दधतः सदर्त्तवः पुरेस्य वास्तव्यकुटुंबितां ययुः ॥६५॥ अभीक्ष्ण
मुष्णैरपि तस्य सोष्मणः सुरेंद्रबंदीश्वसितानिलैर्यथा ॥ सचंदनांभःकणकोमलैस्तथा वपुर्जलार्द्रोप
वनैर्न निर्ववौ ॥६६॥ अमानवं जातमजं कुले मनोः प्रभाविनं भाविनमंतमात्मनः ॥ मुमोच
जानन्नपि जानकीं न यः सदाभिमानैकधना हि मानिनः ॥६७॥ स्मरत्यदो दाशरथिर्भवन्भवा
नमुं वनांताद्वनितापहारिणं ॥ पयोधिमाविद्धचलज्जलाविलं विलंघ्य लंकां निकषा हनिष्यति
= जन्मांतरं ॥६८॥ अथोपपत्तिं छलनापरोपरामवाप्य शैलूष इवैष भूमिकां ॥ तिरोहितात्मा शिशुपालसंज्ञ
या प्रतीयते संप्रति सोप्यसः परैः ॥६९॥ स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेंदुनिभस्त्रिलो
चनः ॥ युवाकराक्रांतमहीभृदुच्चकैरसंशयं संप्रति तेजसा रविः ॥७०॥ स्वयं विधाता सुरदैत्यरक्ष

समया निकषा ... मामीप्ये ... मताविति हलायुधः =५

... त्यर्थः अभिज्ञान ... तिवृत्तौ ... =१

उन्नतः =१

भूमिका रचनायां स्यान्मूर्त्यंतरपरिग्रह इति विश्वः =३

शैलूषो नटः नर्तकः ३

१८= वपुषा ... मुखेन ...

माघ० ७

नी नामा:कर्मके हृदेह तातो पाशु घातिनो:

सामन्त्वग्रहावग्रहयोर्यदृछया॥ दशाननादीनभिराद्धदेवताविंतीर्णवीर्य्यातिशयान्हसत्यसौ

॥७१॥ वलावलेपादधुनापिपूर्ववत्प्रवाध्यतेतेनजगज्जिगीषुणा॥ सतीवयोषित्प्रकृतिःसुनिश्च

लापुमांसमभ्येतिभवांतरेष्वपि॥७२॥ तदेनमुल्लंघितशासनंविधेर्विधेहिकीनाशनिकेतना

तिथिं॥ शुभेतराचारविपक्त्रिमापदोविपादनीयाहिसतामसाधवः॥७३॥ हृदयमरिवधोदय

दुपोढद्रढिमदधातुपुनःपुरंदरस्य॥ घनपुलकपुलोमजाकुचाग्रद्रुतपरिरंभनिपीडनक्षम

त्वं॥७४॥ ॐमित्युक्तवतोथशार्ङ्गिणइतिव्याहृत्यवाचंनभस्तस्मिन्नुत्पतितेपुरःसुरमुनाविंदोः ७

श्रियंविभ्रति॥ शत्रूणामनिशंविनाशपिशुनःक्रुद्धस्यचैद्यंप्रतिव्योम्नीवभ्रुकुटिछलेनवदनेके राम

तुश्चकारास्पदं॥७५॥ इतिश्रीशिशुपालवधेमहाकाव्येमाघकृतौनारदाभिगमनोनामप्रथमःसर्गः॥१

ॐप्रथमं ग्री कृतौरो षट्तिषिष्ट:॥:३

श्लोके १

कृतसंसर्गप्रियागण्डूषगे ध्वीनमित्यर्थः १ दोषस्त्रादीनवोमतद्दुस्तमनः =२

त्रकानरं =२

रथीकृततनुव्याधर्मुद्गमन् ॥२०॥ जगादवदनछद्मपद्मपर्यंतपातिनः ॥ नयनैर्मधुलिड्भिः श्वेतत्वमु

दयदशनांशुभिः ॥२१॥ कुलकं ॥ यद्वासुदेवेनादीनमनादीनवमीरितं ॥ वचसस्तस्य सपदि क्रि

याकेवलमुत्तरं ॥२२॥ नैतल्लघ्वपि भूयस्त्वावचोवाचोतिशय्यते ॥ इंधनौघधगप्यग्निस्त्विषा ना

त्येति मूर्द्धनि ॥२३॥ सं क्षिप्तस्याप्यतोस्यैव वाक्यस्यार्थगरीयसः ॥ सविस्तरतरा वाचो भाष्यभूता

भवंतु मे ॥२४॥ विरोधि वचसो मूकान् वागीशानपि कुर्वते ॥ जडानप्यनुलोमार्थान् प्रवाचः कृ

तिनां गिरः ॥२५॥ षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः ॥ ग्रंथानधीत्य व्याकर्तुमिति दुर्मे

धसोप्यलं ॥२६॥ अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा ॥ निमित्तादपराद्धेषोर्धानुष्क

स्येव वल्गितं ॥२७॥ सर्वकार्यशरीरेषु मुक्तांगस्कंधपंचकं ॥ सौगतानामिवात्मान्यो नास्ति

न्‌ क्रिरत्पमित्र लक्षणा सिद्धयः =२ उपायचरपस्थान लक्षणास्त्रयउदयाः =३ वेष्टनं ल शरव्यं निमित्तं दुनिति =३

उपलब्धितोपि तर्थः=१

माघ मंत्रोमहीभृतां॥२८॥ मंत्रोयोधइवाधीरःसर्वांगैःसंवृतैरपि॥ चिरंनसहतेस्थातुंपरेभ्योभेदशं
९ कया॥२९॥ आत्मोदयःपरज्यानिर्द्वयंनीतिरितीयती॥ तदूरीकृत्यकृतिभिर्वाचस्पत्यंप्र
तायते॥३०॥ तृप्तियोगःपरेणापिनमहिम्नामहात्मनां॥ पूर्णश्चंद्रोदयाकांक्षीदृष्टांतोत्रमहा
र्णवः॥३१॥ संपदासुस्थिरंमन्योभवतिस्वल्पयापियः॥ कृतकृत्योविधिर्मन्येनवर्द्धयतितस्य ९
तां॥३२॥ समूलघातमघ्नंतःपरान्नोद्यंतिमानिनः॥ प्रध्वंसितांधतमसस्तत्रोदाहरणंर
विः॥३३॥ विपक्षमखिलीकृत्यप्रतिष्ठाखलुदुर्लभा॥ अनीत्वापंकतांधूलिमुदकंनावतिष्ठ राम०
ते॥३४॥ ध्रियतेयावदेकोपिरिपुस्तावत्कुतःसुखं॥ पुरःक्लिश्नातिसोमंहिसैंहिकेयोसुरद्रुहां
॥३५॥ सखागरीयान्शत्रुश्चकृत्रिमस्तौहिकार्यतः॥ स्याताममित्रौमित्रेचसहजप्राकृतावपि ३६

अग्नेःशेषंऋणात्शेषंशत्रोःशेषंनशेषयेत् इतितात्पर्यं=२

कार्यःसंधिरितिशेषः=१

उपकर्त्रारिणासंधिर्नमित्रेणापकारिणा॥उपकारापकारौहिलक्ष्यंलक्षणमेतयोः॥३७॥त्वया
विप्रकृतश्चैद्योरुक्मिणींहरताहरे॥बद्धमूलस्यमूलंहिमहद्वैरतरोःस्त्रियः॥३८॥त्वयिभौमंगते
जेतुमरौत्सीत्सपुरीमिमां॥प्रोषितार्यमणंमेरोरंधकारस्तटीमिव॥३९॥आलप्यालमिदंबभ्रो
र्यत्सदारानपाहरत्॥कथापिखलुपापानामलमश्रेयसेयतः॥४०॥विराद्धएवंभवताविराद्धा
बहुधाचनः॥निर्वर्त्यतेरिःक्रिययासश्रुतश्रवसःसुतः॥४१॥विधायवैरंसामर्षेनरोरौयउ
दासते॥प्रक्षिप्योदर्चिषंकक्षेशेरतेतेभिमारुतं॥४२॥मनागनभ्यावृत्त्यावाकामंक्षाम्यतु
यःक्षमी॥क्रियासमभिहारेणविराध्यंतंक्षमेतकः॥४३॥अन्यदाभूषणंपुंसःशमोलज्जेवयो
षितः॥पराक्रमःपरिभवेवैयात्यंसुरतेष्विव॥४४॥माजीवन्यःपरावज्ञादुःखदग्धोपि

बहुधापराद्धा बंधवाः=५

क्षमी २=

कक्षस्तुगुल्मेदोर्मूलेपापेजीर्णवनेतृणे इति हैमः=३

गर्हितंजीवितं माजीवति इत्यर्थे माङ्याक्रोशे इति सूत्रेण लटः [illegible] =१

स्वछ्यमहकाम्वछंदस्वैरितावेनिताःसमाःइतिकेशवः=२ उं गोःअत्कौ अनिडित्यः२

माघ० जीवति॥तस्याजननिरेवास्तुजननीक्लेशकारिणः॥४५॥पादाहतंयदुत्थायमूर्धानमधिरोह
१० ति॥स्वस्थादेवापमानेपिदेहिनस्तद्वरंरजः॥४६॥असंपादयतःकंचिदर्थंजातिक्रियागुणैः॥
यदृच्छाशब्दवत्पुंसःसंज्ञायैजन्मकेवलं॥४७॥तुंगत्वमितरानाद्रौनेदंसिंधावगाधता॥अ
८५ लंघनीयताहेतुरुभयंतन्मनस्विनि॥४८॥तुल्येपराधेस्वर्भानुर्भानुमंतंचिरेणयत्॥हिमां
शुमाशुग्रसतेतन्म्रदिम्नःस्फुटंफलं॥४९॥स्वयंप्रणमतेल्पेपिपरवायावुपेयुषि॥निदर्श १०
नमसाराणांलघुर्बहुतृणंनरः॥५०॥तेजस्विमध्येतेजस्वीदवीयानपिगण्यते॥पंचमःपंच राम०
तपसस्तपनोजातवेदसां॥५१॥अकृत्वाहेलयापादमुच्चैर्मूर्धसुविद्विषां॥कथंकारम
नालंबाकीर्तिर्द्यामधिरोहति॥५२॥अंकाधिरोपितमृगश्चंद्रमामृगलांछनः॥केसरी

निस्तुरदिप्समृगव्रूथोमृगाधिपः॥५३॥चतुर्थोपायसाध्येशत्रौसांत्वमपक्रिया॥ स्वेद्यमामज्व
रंप्राज्ञःकोंभसापरिषिंचति॥५४॥ सामवादाःसकोपस्यतस्यप्रत्युतदीपकाः॥ प्रतप्तस्येवसह
सासर्पिषस्तोयविंदवः॥५५॥ गुणानामायथातथ्यादर्थंविप्लावयंतिये॥ अमात्यव्यंजनाराज्ञो
दूष्यास्तेशत्रुसंज्ञिताः॥५६॥ स्वशक्त्युपचयेकेचित्परस्यव्यसनेपरे॥ यानमाहुस्तदासीनंत्वा
मुत्थापयतिहृद्वयं॥५७॥ लिलंघयिषतोलोकानलंघ्यानलघीयसः॥ यादवांभोनिधीन्रुंधेवेले
वभवतःक्षमा॥५८॥ विजयस्त्वयिसेनायाःसाक्षिमात्रेपदिश्यतां॥ फलभाजिसमीक्ष्योक्तेबुद्धे
र्भोगइवात्मनि॥५९॥ हतेहिडंवरिपुणाराज्ञिदैद्यमातुरेष्वधि॥ चिरस्यमित्रव्यसनीसुदमोदम
घोषजः॥६०॥ नीतिरापदियद्गम्यःपरस्तन्मानिनोह्रिये॥ विधुर्विधुंतुदस्येवपूर्णस्तस्योत्स

वेलाकूलेपिवा
रिधेरितिशाश्वतः
५

धान्यादिर्वीवधः प्रसिता सारस्तु सुहृद्बलं । प्रसारस्तु तृणकाष्ठादेर्ग्रहवेशः इति वैजयंती =२ व्रजः स्याद्गोकुलं गोष्ठमिति वैजयंती =२ एका [illegible]

माघ० वायसः ॥६१॥ अन्यदुच्छृंखलं सत्त्वमन्यच्छास्त्रनियंत्रितं ॥ सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः

११ ॥६२॥ इंद्रप्रस्थगमस्तावत्कारि मा संतु चेदयः ॥ आस्माकदंतिसांनिध्याद्वामनीभूतभूरुहः ॥६३॥

निरुद्धवीवधासारप्रसारा गा इव व्रजं ॥ उपरुंधंतु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥६४॥ यजतां पांडवः

स्वर्गमवत्विंद्रस्तपत्विनः ॥ वयं हनाम द्विषतः सर्वः स्वार्थं समीहते ॥६५॥ प्राप्यतां विद्युतां संप

त्संपर्कादर्करोचिषां ॥ शस्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः ॥६६॥ इति संरंभिणो वाणी ११

र्वलस्यालेख्यदेवताः ॥ सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ॥६७॥ निशम्य ताः शेषगवीरभि राम०

धातुमधोक्षजः ॥ शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा ॥६८॥ भारतीमाहितभरामथानु

द्धतमुद्धवः ॥ तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजं ॥६९॥ संप्रत्यसांप्रतं वक्तुमुक्ते मुश

प्रस्तावः स्यादवसरः उपक्रमः =२

वि ४ वीवध शब्दः पथि पाथेये वर्तते । आसारो मित्रबलं । प्रसारो वनाजीवो याम काष्ठादिः ६

उक्त्वाहितमुपन्यस्तामितिवैजयंती =५

लपाणिना॥ निर्द्धारितेर्थेलेखेनखलूक्त्वाखलुवाचिकं॥७०॥ तथापियन्मय्यपितेगुरुरित्यव
गौरवं॥ तत्प्रयोजककर्तृत्वमुपेतिमममजल्पतः॥७१॥ वर्णैःकतिपयैरेवग्रथितस्यस्वरैरिव॥ अ
नंतावाङ्मयस्याहोगेयस्येवविचित्रता॥७२॥ बह्वपिस्वेच्छयाकामंप्रकीर्णमभिधीयते॥ अनु
ज्झितार्थसंबंधःप्रबंधोदुरुदाहरः॥७३॥ म्रदीयसीमपिघनामनल्पगुणकल्पितां॥ प्रसारयंतिकुश
लाश्चित्रांवाचंपटीमिव॥७४॥ विशेषविदुषःशास्त्रंयत्तवोद्ग्राह्यतेपुरः॥ हेतुःपरिचयस्थैर्ये
वक्तुर्गुणनिकैवसा॥७५॥ प्रज्ञोत्साहावतःस्वामीयतेताधातुमात्मनि॥ तौहिमूलमुदेष्यता
जिगीषोरात्मसंपदः॥७६॥ सोपधानांधियंधीराःस्थेयसींखट्वयंतिये॥ तत्रानिशंनिषण्णास्तेजानते
जातुनश्रमं॥७७॥ स्पृशंतिशरवत्तीक्ष्णास्तोकमंतर्विशंतिच॥ बहुस्पृशापिस्थूलेनस्थीयतेबहिरश्मवत्॥७८

प्रतुशकेन उपधानं विशेषः स्यात् गेंदुके पुंस पिवेतिविश्वः =२

१ई छाउत्साहः=३ उपशयः स्थानविशेषः २

(आकुला)
आरभंतेल्पमेवाज्ञाः कामंव्यग्राभवंतिच॥ महारंभाःकृतधियस्तिष्ठंतिचनिराकुलाः॥७९॥उपा
यमास्थितस्यापिनश्यंत्यर्थाःप्रमाद्यतः॥ हंतिनोपशयस्थोपिशयालुर्मृगयुर्मृगान्॥८०॥उदे
तुमत्यजन्नीहांराजसुद्वादशस्वपि॥ जिगीषुरेकोदिनकृदादित्येष्विवकल्पते॥८१॥तंत्रावापवि
दायोगैर्मंडलान्यधितिष्ठता॥ सुनिग्रहानरेंद्रेणफणींद्राइवशत्रवः॥८२॥ करप्रचेयामुत्तुंगः
प्रभुशक्तिंप्रथीयसीं॥ प्रज्ञाबलबृहन्मूलःफलत्युत्साहपादपः॥८३॥ बुद्धिशस्त्रःप्रकृत्यं
गोघनसंवृतिकंचुकः॥ चारेक्षणोदूतमुखःपुरुषःकोपिपार्थिवः॥८४॥ तेजःक्षमावानैकां
तःकालज्ञस्यमहीपतेः॥ नैकमोजःप्रसादोवारसभावविदःकवेः॥८५॥ कृतापचारोपिपरैर
नाविष्कृतविक्रियः॥ असाध्यःकुरुतेकोपंप्राप्तेकालेगदोयथा॥८६॥ मृदुव्यवहितंतेजोभो

भाग=२

स्थायि भावान् अवर्तंते तद्रु के । रतिर्हि सम्यक् को कश्च को धो मा हो म
यत्र था ॥ जुगुप्सा विस्मयसमाः स्थायि भावाः प्रकीर्तिताः = २

कुमर्थान्प्रकल्पते प्रदीपः स्नेहमादत्ते दशयाभ्यंतरस्थया ॥ ८७ ॥ नालंबते दैष्टकतां ननिषीद
ति पौरुषे ॥ शब्दार्थौ सत्कविरिवाद्वयं विद्वानपेक्षते ॥ ८८ ॥ स्थायिनोर्थे प्रवर्तंते भावाः संचारि
णो यथा ॥ रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥ ८९ ॥ अनल्पत्वात्प्रधानत्वादंशस्येवे
तरस्वराः ॥ विजिगीषोर्नृपतयः प्रयांति परिवारतां ॥ ९० ॥ अप्यनारभमाणस्य विभोरुत्पादिताः
आकाशस्य
परैः ॥ व्रजंति गुणतामर्थाः शब्दाइव विहायसः ॥ ९१ ॥ यातव्यपार्ष्णिग्राहादिमालायामधिक
द्युतिः ॥ एकार्थतंतुप्रोतायां नायको नायकायते ॥ ९२ ॥ षाड्गुण्यमुपयुंजीत शक्त्यपेक्षो रसाय
नं ॥ भवंत्यस्यैवमंगानि स्थास्नूनि बलवंति च ॥ ९३ ॥ स्थाने शमवतां शक्त्या व्यायामे वृद्धिरं
गिनां ॥ अयथाबलमारंभो निदानं क्षयसंपदः ॥ ९४ ॥ तदीशितारं चेदीनां भवांस्तमवमंस्त मा ॥ नि

रसायनं वि
हरेपि नरा
को नि मितो
पधे = इति
विश्व: = ३

शाकिवलिप्रज्ञावादोइति विश्व = ३

नायकोनेतरि श्रेष्ठहार
मध्यमणावपीति विश्वः = ३

उपचयापचयरहितायामवस्थायामित्यर्थः = २

१ ऊगमपदे नेदोपजापाविन्त मरः=४ फलेली नरायागुरोरितिरियास्वतः=१ नदः इत्यपिपाठः=२

माघ १३ हंतमीत्रेंकॅपदेयउदात्तःस्वरानिव ॥९५॥ मावेदियदसावेको जेतव्यश्चेदिराडिति ॥ राजयक्ष्मेवरो
गानांसमूहःसमहीभृतां ॥९६॥ संपादितफलस्तेनसपक्षःपरभेदनः ॥ कार्मुकेणेवगुणिनावा नदीसुधान्तसुपीत मद्गुस्मरः=२
प्रदोषोपिदुष्टरात्रे शावितिवैजयंती =४ णःसंधानमेष्यति ॥९७॥ येचान्येकालयवनसाल्वरुक्मिद्रुमादयः ॥ तमःस्वभावास्तेप्येनंप्र
दोषमनुयायिनः ॥९८॥ उपजापःकृतस्तेनतानाकोपवतस्त्वयि ॥ आशुदीपयिताल्पोपिसा
ध्वीनेधानिवानिलः ॥९९॥ बृहत्सहायःकार्यांतंक्षोदीयानपिगच्छति ॥ संभूयांभोधिमभ्येतिम
हानद्यानगापगा ॥१००॥ तस्यमित्राण्यमित्रास्तेयेचयेचोभयेनृपाः ॥ अभियुक्तंत्वयैनंतेगंतार १३
स्त्वामतोपरे ॥१०१॥ मखविघ्नायसकलमित्थमुत्थाप्यराजकं ॥ हंतजातमजातारेःप्रथमेनत्व राम
यारिणा ॥१०२॥ संभाव्यत्वामतिभरक्षमस्कंधंसबांधवः ॥ सहायमध्वरधुरंधर्मराजोविवक्षते
॥१०३॥ महात्मानोनुगृह्णंतिभजमानान्रिपूनपि ॥ सपत्नीःप्रापयंत्यब्धिंसिंधवोनगनिम्नगाः ॥१०४

अभिसंधाय =२

हा२

मंत्रजिह्वः सप्तजिह्वः शुचिर्हव्यवाहनः इति वैजयंती =३ अभिप्रायः छंद आशय इत्यमरः =१ ३ आगोपराधो मंतुश्च इत्यमर २

चिरादपिबलात्कारोवलिनःसिद्धयेरिषु ॥ छंदानुवृत्तिदुःसाध्याःसुहृदोविमनीकृताः ॥१०५॥ मन्यसेरिवधःश्रेयान्प्रीतयेनाकिनामिति ॥ पुरोडाशभुजामिष्टमिष्टं कर्तुमलंतरां ॥१०६॥ अमृतंनाम यत्संतोमंत्रजिह्वेषुजुह्वति ॥ शोभैवमंदरक्षुब्धक्षुभितांभोधिवर्णना ॥१०७॥ सोढास्मिशतमागांसि सूनोस्तइतियत्त्वया ॥ प्रतीक्ष्यंतत्प्रतीक्ष्यायैपितृष्वस्रेप्रतिश्रुतं ॥१०८॥ तीक्ष्णानारुंतुदाबुद्धिःकर्मशांतंप्रतापवत् ॥ नोपतापिमनःसोष्मवागेकावाग्मिनःसतः ॥१०९॥ स्वयंकृतप्रसादस्यतस्याह्नोभानुमानिव ॥ समयावधिमप्राप्यनंतायालंभवानपि ॥११०॥ कृत्वाकृत्यविदस्तीर्थैरंतःप्रणिधयःपदं ॥ विदांकुर्वंतुमहतस्तलंविद्विषदंभसः ॥१११॥ अनुत्सूत्रपदन्यासासद्वृत्तिःसन्निबंधना ॥ शब्दविद्येवनोभातिराजनीतिरपस्पशा ॥११२॥ अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः ॥

प्रत्ययः ... इत्यमरः =४

तीर्थं ... इति वैजयंती =२

... इति हलायुधः =२ स्पशश्चरः ... इति हलायुधः =१

... =२ शब्दविद्या ... पस्पशः ... ग्रंथः =१

१४ ॥ भेद्याःशत्रोरभिव्यक्तशासनैःसामवायिकाः ॥११३॥ उपेयिवांसिकर्त्तारःपुरीमाजातशात्रवीं ॥ रा
॥ माघ जन्यकान्युपायज्ञैरेकार्थानिचरैस्तव ॥११४॥ सविशेषंसुतेपांडोर्भक्तिंभवतितन्वति ॥ वैरायिता
रस्तरलाःस्वयंमत्समरिताःपरे ॥११५॥ यदुहात्मविदोविपक्षमध्येसहसंवृद्धियुजोपिभभुजःस्युः
॥ वलिपुष्टकुलादिवान्यपुष्टैःपृथगस्मादचिरेणाभावितातैः ॥११६॥ सहजचापलदोषसमुद्ध
तश्चलितदुर्वलपक्षपरिग्रहः ॥ तवदुरासदवीर्यविभावसौशलभतांलभतामसुहृद्गणः ॥११७॥ इ १४
तिविशकलितार्थामौद्धवींवाचमेनामनुगतनयमार्गामर्गलांदुर्णयस्य ॥ जनितमुदमुदस्था राम
दुच्चकैरुच्छ्रितोरःस्थलनियतनिषण्णश्रीकृतांशुश्रुवांस्तः ॥११८॥ ॥इतिश्रीशिशुपाल
वधेमहाकाव्येमाघकृतौश्र्यंकेमंत्रसंभाषणंनामद्वितीयःसर्गः ॥२॥ कौवेरदिग्भागमपास्यमार्ग

चंचलाः यौधिष्ठिरीं

इंद्रो दुश्च्यवनो हरि शितहलायुधः =१

मंगास्त्यमुष्मांशुरिवावतीर्णः ॥ अपेतसुद्धाभिनिवेशतोम्योहरिंहरिक्रस्थमयव्रतस्थे ॥१॥
जगत्पवित्रैरपितैनपादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः ॥ यतो वृहत्पार्वणचंद्रचारु तस्या
तपत्रं विभरांबभूवे ॥१०२॥ मृणालसूत्रामलमंतरेण स्थितश्चलच्चामरयोर्द्वयं सः ॥ भेजेभितः
पातुकसिद्धसिंधोरभूतपूर्वां श्रियमंवुराशेः ॥१०३॥ चित्राभिरस्योपरिमौलिभाजां भाभि
र्मणीनाममनणीयसीभिः ॥ अनेकधातुच्छुरिताश्मरा श्मेरोगिर्वर्द्धनस्याकृतिरन्वका
रि ॥१०४॥ तस्योल्लसत्कांचनकुंडलाग्रप्रत्युप्त(खचित)गारुत्मतरत्नभासा ॥ अवाप्यबाल्योचितनील
कंठपिच्छावचूडाकलनामिवोरः ॥१०५॥ तमंगदे मंदरकूटकोटिव्याघट्टनोत्तेजनयाम
णीनां ॥ वंहीयसा दीप्तिवितानकेन चकासयामास लसुल्लसंती ॥६॥ निसर्गरक्तैर्वलया

शे ५

पिच्छमेवमत्त्वडा मालिकातस्या आकलनं वधनं नीवापव २

अम्प्सन्तेषु वि तन्या यत्रसिति स्व: ३

ला २

वनद्धताम्राश्मरश्मिभिच्छुरितैर्नखाग्रैः ॥ व्यधोत्त तोद्यापि सुरारिवक्षसो विवस्तो भजास्रकृत्तिपितैरिवां
सौ ॥७॥ उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयसः पतेतां ॥ तेनोपमीयेत तमालनीलं
मामुक्तमुक्तालतमस्य वक्षः ॥८॥ तेनांभसां सारमयः पयोधेर्दध्रे मणिर्दीधितिदीपिताशः ॥ अं
तर्वसन्विंबगतस्तदंगे साक्षादिवालक्ष्यत यत्र लोकः ॥९॥ मुक्तामयं सारसनावलंबि (कटिबंधन) भा
ति स्म दामाप्रपदीनमस्य ॥ अंगुष्ठनिष्ठ्यूतमिवोर्ध्वमुच्चैस्त्रिस्रोतसः संततधारमंभः ॥१०॥
स इंद्रनीलस्थलनीलमूर्त्ती रराज कर्चूरपिशंगवासाः ॥ विसृत्वरैरंबुरुहां रजोभिर्यमस्वसुश्चि
ह्नित इवोदभारः ॥११॥ प्रसाधितस्याथ मधुद्विषोऽभूदन्यैव लक्ष्मीरिति युक्तमेतत् ॥ वपुष्यशेषे
ऽखिललोककांता सानन्यकांता ह्युरसीतरा तु ॥१२॥ कपाटविस्तीर्णमनोरमोरःस्थलस्थि

कर्चूरं कावनं गंधद्रव्यविशेषो वा तद्वत्पिशं
गे वाससी यस्येति =३

नस्थीलेनसपत्नस्य॥ आनंदितोशेषजनोवभूवसर्वांगसंगिन्यपरैवलक्ष्मीः॥१३॥ दैत्याधिपप्रा
णमुखैनखानांमुपेत्युषांभूषणतांक्षतेन॥ प्रकाशकार्कश्यगुणोदधानाःस्तनैस्तरुण्यपःप
पिवपुरैन॥१४॥ आकर्णितेवोर्द्धमितिक्रुशीयानस्पुत्रतत्याद्कुचमंडलेन॥ नन्नामंमध्योत्तिगुरु
४ प्रीहितस्य त्वभाजांनितांतमाक्रांतइवांगनानां॥१५॥ यांयांप्रियःप्रैक्षतकातराक्षींसासातद्क्रियानम्रमुखीव
भूव॥ निःशंकमन्याःसममाहितेष्यांस्तत्रौतरेजघ्नुरमुंकराद्यैः॥१६॥ तस्यांतसीस्तनसमान
भासोभ्राम्यन्नमत्रूपावलिमंडलेन॥ चक्रेएरिजेयमुनाजलौघःस्फुरन्महावर्तइवैकवाङ्कः
॥१७॥ विरोधिनोविग्रहभेददत्ताम्नैविंशक्तिंःक्वचिद्स्वलीती॥ नित्यैंहरेःसन्निहितानि
कामैकोमोदकीमोदयतिस्मचेतः॥१८॥ नकेवलंयःस्वतयामुरारेरनन्यसाधारणतांद

शालीरंवनश्री[illegible]ः२ सर्वत्राप्तिर्हस्तेत्रिरिसर्गः२

धानः॥ अत्यर्थमुद्वेजयितापरेषांनाम्नापितस्यैवसनंदकोभूत्॥१९॥ ननीतमन्येननतिं
कदाचित्कर्णांतिकप्राप्तगुणंक्रियासु॥ विधेयमस्याभवदंतिकस्थंशार्ङ्गंधनुर्मित्रमिवद्वी
यः॥२०॥ प्रवृद्धमंद्रांवुदधीरनादकृष्णार्णवाभ्यर्णचरैकहंसः॥ मीदानिलापूरकलंदधानो
निध्यानमभ्यर्च्यतपांचजन्यः॥२१॥ रराजसंपादकमिष्टसिद्धेः सर्वासुदिक्ष्वप्रतिबिद्धमा
क्रीडास्यंदनं
र्गं॥ महारथःपुष्यरथं रथांगीक्षिप्रंक्षपानाथइवाधिरूढः॥२२॥ ध्वजाग्रधामाददृशेथशौ
रेः संक्रांतमूर्तिर्मणिमेदिनीषु॥ फणावतस्त्रासयितुंरसायास्तलंविविक्षन्निवपन्नगारिः
॥२३॥ प्रयास्यतस्तस्यमहीध्ररंध्रभिदापटीयान्पटहप्रणादः॥ जलांतराणीवमहार्णवौघःश
ब्दांतराण्यंतरयांचकार॥२४॥ यतःसभर्ताजगतांजगामधर्त्रीधरित्र्याःफणिनांततोधः॥ मह

नोरणोस्त्रीवहिर्द्रां २

क १

भग्नाभुग्नशिरःसहस्रसाहायँव्ययमुजंप्रसस्रे ॥२५॥ अथोँच्चकैस्तोरणसंगभंगभयावनम्रीकृ

तकेतनानि ॥ क्रियाफलानीवसुनीतिभाजंसैन्यानिसोमाचँपमच्युतं ॥२६॥ श्यामारुणौ

वारणदानतोयैरा लोडिताःकांचनभूपरागाः ॥ आनेमिमग्नैःशितिकंठपिछक्षोदद्युतश्चक्रु

दिरेरथौघैः ॥२७॥ नलंघयामाससमहाजनानांशिरांसिनैवोद्धतिमाजगाम ॥ अचेष्टतांष्टाय

दभूमिरेणुःपादाहतोयत्सहशीगरिम्नः ॥२८॥ निरुध्यमानायदुभिःकथंचिन्मुकुंदवृंदैर्द्वि

द्विपुरग्रपादान् ॥ धवगुन्नमार्गरुधःकरीन्द्रानुल्लंघ्यगेतुंतुरगाश्चदोषुः ॥२९॥ अवेच्छिता

नायतवल्गामयेतुरंगिभिर्यत्तनिरूढवाहैः ॥ अक्रीडितानंपांशुभिरैत्यतत्रींनिन्युर्जनंन्यः

श्युकानूपथिभ्यः ॥३०॥ दिहक्षमाणाःप्रतिरथ्यमीयुर्मुरारिमारादनघंजनौघाः ॥ अनेकशः

ऊतःपस्माक
दिङ्मुणोगुरुत्व
गुणमीमाहलम्प
चयद्दशमनुर
पमनवेष्टतेअर्थ
जाहयशहरुच्च

माघ०
७

या पृ: जलं समुद्रोदकं भित्त्वा उल्लसित नितिशेषः ३

परिधि नमपी मार्थः २

संस्तुतंमभ्यानल्पानवंनवंप्रीतिर्हिहोकरोति ॥३१॥ उपेयुषोवर्त्मनिरंतराभिरसौनिरुछ्वास
मनीकिनीभिः ॥ रथस्यतस्यांपुरिदत्तचक्षुर्विद्वान्विदामासशनैर्नयातं ॥३२॥ मध्येसमु
द्रंककुभः पिशंगीर्याकुर्वतीकांचनवप्रभासा ॥ तुरंगकांतामुखहव्यवाहज्वालेवभि
त्वाजलमुल्ललास ॥३३॥ कृतास्पदाभूमिभृतांसहस्रैरुदन्वदंभःपरिवीतमूर्त्तिः ॥ अनिर्विदा
यांविदधेविधात्रापृथ्वीपृथिव्याःप्रतियातनेव ॥३४॥ त्वष्टुःसदाभ्यासगृहीतशिल्प
विज्ञानसम्पत्प्रसरस्यसीमा ॥ अदृश्यतादर्शतलामलेषुछायेवयास्वर्जलधेर्जलेषु ॥ ३५
रथांगभर्त्रेभिनवंवराययस्याःपितेवप्रतिपादितायाः ॥ प्रेम्णोपकंठंमुहुरंकभाजोरत्ना
वलीरंबुधिराबबंध ॥३६॥ यस्यांचलद्वारिधिवारिवीचिछटोच्छलच्छंखकुलाकुलेन ॥ वप्रा

मुक्तो चन्द्रिक मर्थः १

छं १

राम

षमाध्रुजलनिर्गमाः १

नै

पर्यंतचरोऽंशुचक्रः सुमेरुवप्रोच्चहर्म्यचक्रकारि ॥३७॥ वनिकुपथेषु गृहक्षतानि यत्र भ्रमागतैः
रंवुभिरंवुराशेः ॥ लोलैरलोलद्युतिभांजि मुञ्चन्नरत्नानि रत्नाकरतामवाप ॥३८॥ अभ्रस्थु
तःकोमलस्त्वराशीर्नृपांनिधिःफेणापिनद्धनासः ॥ यत्रापि दालुमिवोपतल्प्यैर्विस्तारयामा
सं गृहैस्तैः ॥३९॥ यच्छालमुत्तुंगतया विजेतुं दूरादुदस्थीयत सागरस्य ॥ महोर्मिभिर्व्याह
तवांछितार्थैर्व्रीडादिवाभ्यासगतैर्विलिल्ये ॥४०॥ कुतूहलेनैव जवादुपेत्य प्राकारभित्त्या
सहसानिषिद्धः ॥ रसन्नरोदीद्भृशमंवुवर्षव्याजेन यस्या वहिरंवुवाहः ॥४१॥ यद्दंगनारूप
सरूपतायाः कंचिद्गुणं भेदकमिच्छतीभिः ॥ आराधितोद्धामनुरप्सरोभिश्चक्रे प्रजाः स्वाः
सनिमेषचिह्नाः ॥४२॥ स्फुरत्तुषारांशुमरीचिजालैर्विनिह्नुताः स्फटिकसौधपंक्तीः ॥ आरुह्य ना

अपह्नुताः स्फटिकस्य इमे स्फाटिकाः १
नरैकरूपा
पत्नेरग्लयमा [?]
पाइस्पर्श [?] [illegible] पालंकारः [illegible]

[illegible] यत्र [illegible] नरैकरूपा [illegible]

पयस्यां न हेतु ... त्रिविधतपार ... नाम ... रतिकाले २
... आलेख्यं कर्तुमशक्नुवंतो युवानः प्रति ... पयसां समूहमूहुर्वहंतिस्म २
विंबितांगाः स्वयं तासु संक्रांतमूर्तयः संतः ॥ रत्नभित्तीः सजीवचित्राः सचेतनचित्रवतीरिव चक्रुः ४

माघ० १८

र्यैः स्तनाद्यासु यस्यां न भोगं तं दिवांगनाश्च व्यराजन ॥४३॥ कांतेंदुकांतोपलकुट्टिमेषु प्रतिक्षपं हर्म्यतले

षु यत्र ॥ उच्चैरधःपातिपयोमुचोपि समूहमूहुः पयसां प्रणाल्यः ॥४४॥ रतौ ह्रियायत्र निशा — निवर्णाप्य २

म्य दीपान् जालागतेभ्योधिगृहं गृहिण्यः ॥ विभ्युर्विडालेक्षणभीषणाभ्यो वैदूर्य्यकुड्येषु श

शिद्युतिभ्यः ॥४५॥ यस्यामतिश्लक्ष्णतया गृहेषु विधातुमालेख्यमशक्नुवंतः ॥ चक्रुर्युवानः

प्रतिविंबितांगाः सजीवचित्रा इव रत्नभित्तीः ॥४६॥ सावर्ण्यभाजां प्रतिमागतानां लक्ष्यैः स्म — सामान्यालक्ष्यैः ५

स्मरापांडुतया ... वर्णत्वात् ... — रापांडुतयांगनानां ॥ यस्यां कपोलैः कलधौतधामस्तंभेषु भेजे मतिदर्पणताश्रीः ॥४७॥ शुकां — १८ राम

गनीलोपलनिर्मितानां लिप्तेषु भासा गृहदेहलीनां ॥ यस्यामलिंदेषु न चक्रुरेव मुग्धांगना

गोमयगोमुखानि ॥४८॥ गोपानसीषु क्षणमास्थितानां मालेव बिभ्रत् शिंदु किरीकलापैः ॥ हरि

गारुत्मतं मरकतमश्मगर्भं हरिन्मणि

वलीकनीध्रे पटलप्रांते पटलं छदिः। छादनपर्यायो पटल १ पटलांते रविरेजुः १ तुल्लासाम्ये त्वन पीठे ... तिजे १
छदिः स्त्री। तदंते वा सिनी वली कनीध्रे। छदिरा धारो वं... यं जे
गोपानसी त्रिविंक:

रामणिश्यामलताभिरामैर्गृहाणि नीध्रैरिव यत्र रेजुः ॥४९॥ दृढन्तुलैरप्यतुलैर्वितानमालाव-
अभ्रमूर्मैः नद्धैरपि वावितानैः ॥ रेजे विचित्रैरपि यास चित्रैर्गृहैर्विशालैरपि भूरिशालैः ॥५०॥ चित्रेंसयाकृ-
त्रिमपत्रिपंक्तेः कपोतपालीषु निकेतनानां ॥ मार्जारमप्यायतनिश्चलांगं यस्यां जनः कृत्रिम-
मेवमेने ॥५१॥ क्षितिप्रतिष्ठोपि मुखारविंदैर्वधूजनश्चंद्रमधश्चकार ॥ अतीत नक्षत्रपथानि
यत्र प्रासादशृंगाणि मृषाध्यरुक्षन् ॥५२॥ रम्या इति प्राप्तवतीः पताकाः रागं विविक्ता इति वर्ध-
कृतीकंनीडेर त्रि ३ यंतीः ॥ यस्यामसेवंत नमद्वलीकाः (त्रिवलीः) समं वधूभिर्वलभीर्युवानः ॥५३॥ सुगंधितामप्रतियत्नपू-
र्वां बिभ्रंति यत्र प्रमदाय पुंसां ॥ मधूनि वक्त्राणि च कामिनीनामामोदकर्मव्यतिहारमीयुः ॥
५४॥ रतांतरे यत्र गृहांतरेषु वितर्दिनिर्यूहविटंकनीडः ॥ रुतानि शृण्वन्वयसां गणोंतेवासित्वमापस्फुटमंगनानां

कूटागारं तु वलभी इति ३ अन्योन्याग्रं धेना योग्यं
वासयामा तुरित्यर्थः २

परस्फुटमीगनानौ॥५५॥ छनेष्वपिस्पष्टतरेषुयत्रस्वच्छानिनारीकुचमंडलेषु॥ आकाशसाम्यं
माघ १९ धुरंबराणिननामतःकेवलमर्थतोपि॥५६॥ यस्यामजिह्मामहतीमपंकाःसीमानमत्या
त्यजीतः॥ जनैरजातस्खलनैर्नजातुद्वयेप्यमुच्यंतविनीतमार्गाः॥५७॥ परस्परस्पर्द्धिपरार्द्ध्यरूपाः
पौरस्त्रियोयत्रविधायवेधाः॥ श्रीनिर्मितिप्राप्तघुणक्षतैकवर्णोपमावाच्यमलंममार्ज॥५८॥
त्वसंश्रयेक्तःकरणेनवृक्षाःफलंतिकल्पोपपदास्तदेव॥ अध्यूषुषस्तामभवन्जनस्यैयाःसं १९
म्पदस्ताम्मनसोप्यभूमिः॥५९॥ कलादधानःसकलाःस्वभाभिरुद्भासयन्सौधसिताभिरा राम०
शाः॥ यरिवतीजानिरियेषहातुंनरौहिणोप्येनचरौहिणीशः॥६०॥ बाणाहवव्याहतशंभुशु
क्तैरासन्निर्माप्रासाद्यजनार्दनस्य॥ शरारिताजेत्रशरेणयत्रनिःशंकमूषेमकरध्वजेन॥६१॥

वलीकनीध्रेपटलप्रांतेषुपटलंछदिः । छादनपर्यायो पटल । पटलांतैरिव रेजुः १ तुलासाम्ये सूत्रभपीठेइति वैज १
छदिषी । तदंचलानवा चिनीवलो कनीध्रे । छदिरा धारोवंशपंजे
गोगोपानसीनि विवेकः

अश्मूनरे

रामणीश्यामलताभिरामैर्गृहाणि नीलैरिव यत्र रेजुः ॥४९॥ बृहत्तुलैरप्यतुलैर्वितानमालाव
नद्धैरपि चावितानैः ॥ रेजे विचित्रैरपि या सचित्रैर्गृहैर्विशालैरपि भूरिशालैः ॥५०॥ चित्रस्थकृ
त्रिमपत्रिपंक्तेः कपोतपालीषु निकेतनानां ॥ मार्जारमप्यायतनिश्चलांगं यस्यां जनः कृत्रिम
मेव मेने ॥५१॥ क्षितिप्रतिष्ठोपि मुखारविंदैर्वधूजनश्चंद्रमधश्चकार ॥ अतीत नक्षत्रपथानि
यत्र प्रासादशृंगाणि वृथाध्यरुक्षन् ॥५२॥ रम्या इति प्राप्तवतीः पताका रागं विविक्ता इति वर्द्ध
यंतीः ॥ यस्यामसेवंत नमद्वलीकाः (त्रिवली) समं वधूभिर्वलभीर्युवानः ॥५३॥ सुगंधितामप्रतियत्नपू
र्वां बिभ्रंति यत्र प्रमदाय पुंसां ॥ मधूनि वक्त्राणि च कामिनीनामामोदकर्मव्यतिहारमीयुः ॥
५४॥ रत्नांतरे यत्र गृहांतरेषु वितर्दिनिर्यूहविटंकनीडः ॥ रुतानि शृण्वन्वयसां गणोंतेवासि

कूटागारं तु वलभी इति ३ अन्योन्यगंधेनान्योन्यं वासयामासुरित्यर्थः २

कूलीकनीडइ
ति ३

निषेव्यमानेन शिवैर्मरुद्भिरध्यास्यमाना हरिणा चिराय ॥ उद्रश्मिरत्नांकुरधाम्नि सिंधौ वाक्रान्त
मेरावमरावतीया ॥६२॥ स्निग्धांजनश्यामरुचिः सुवृत्तो वध्वा इवाध्वंसितवर्णकांतेः ॥ विशेषको वा
विशिशेषयस्याः श्रियं त्रिलोकीतिलकः स एव ॥६३॥ तामीक्षमाणः सपुरंपुरस्तात्प्रापत्प्रतोली
मतुलप्रतापः ॥ वज्रप्रभोद्भासिसुरायुधश्रीर्यां देवसेनेव परैरलंघ्या ॥६४॥ प्रजा इवांगादर
विंदनाभेः शंभोर्जटाजूटतटादिवापः ॥ मुखादिवाथ श्रुतयो विधातुः पुरान्निरीयुर्मधुजिद्ध्व
जिन्यः ॥६५॥ श्लिष्यद्भिरन्योन्यमुखाग्रसंगस्खलत्खलीनं हरिभिर्विलोलैः ॥ परस्परोत्पीडि
तजानुभागं दुःखेन निश्चक्रमुरश्ववाराः ॥६६॥ निरंतरालेपि विमुच्यमाने दूरं पथि प्राणभृ
तां गणेन ॥ तेजो महद्भिस्तमसेव दीपैर्द्विपैरसंबाधमयांबभूवे ॥६७॥ शनैरनीयंत रयात्पतंतो

माघ० रथ्याः क्षितिंहस्तिनखादखेदैः ॥ सयत्रसूतायतरश्मिभुग्नग्रीवाग्रसंसक्तयुगैस्तुरंगैः ॥६९॥ वेलो
२० र्मिभिस्तत्क्षणहीयमानरथ्याभुजायावलयैरिवास्याः ॥ प्रायेणनिःक्रामतिचक्रपाणौनेष्टं
पुरोद्वारवतीत्वमासीत् ॥६९॥ योजलंनीरनिधेरपश्यन्मुरारिरानीलपलाशराशीः ॥ वनाव
लीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः ॥७०॥ लक्ष्मीभृतोंभोधितटाधिवासा
न्द्रुमानसौनीरदनीलभासः ॥ लतावधूसंप्रयुजोधिवेलंबहूकृतान्स्वानिवपश्यतिस्म
॥७१॥ आश्लिष्टभूमिंरसितारमुच्चैर्लोलद्भुजाकारबृहत्तरंगं ॥ फेनायमानंपतिमापगानाम् २०
सावपस्मारिणमाशशंके ॥७२॥ पीत्वाजलानांनिधिनातिगार्ध्याद्वृद्धिंगतेप्यात्मनिनैव राम०
मांतीः ॥ क्षिप्तांइवेंदोःसरुचोधितीरंमुक्तावलीराकलयांचकार ॥७३॥ साटोपमुर्वीमनि

ससंभ्रमं आडंबरसहितं १

शं नदंतो यैः प्लावयिष्यंति समंततो मां ॥ तान्यैकदेशान्निभृतं पयोधेः सोंभांसि मेघान्नपि
वतो ददर्श ॥१७४॥ उद्धृत्य मेघैस्तत एव तोयमर्थं मुनींद्रैरिव संप्रणीताः ॥ आलोकयामा
स हरिः पतंतीर्नदीः स्मृतावंदिमिवांबुराशेः ॥१७५॥ विक्रीय दिश्यानि धनान्युत्तीर्णाहि पण्यान
सांयुत्तमलाभभाजः ॥ तरीषु तत्रत्यमफल्गुभांडं संयात्रिकानावप तोभ्यनेदत्त ॥१७६॥ उ
त्पित्सवोंतर्नदमंतुरुच्चैर्गरीयसा निश्वसितानिलेन ॥ पयांसि भंक्त्वा पागतरुद्धं जस्य ध्वजा
निवोच्चिच्छिदिपि रेफतांतीद्वाः ॥१७७॥ तर्मांगतैर्वीचिपयुगांतवंधुर्मुत्संगशय्याशयमंबुराशिः ॥ प्र
त्युज्जगामैव गुरुप्रमोदप्रसारितोत्तुंगतरंगबाहुः ॥१७८॥ उत्संगितं भः कणिकोनभस्वानुद
न्चतः स्वेदलवान्ममार्ज ॥ तस्यां तु वेलं व्रजतोंऽनुवेलमेलालतास्फालनलब्धगंधः ॥१७९॥ उत्ता

उन्नतनालीवन१

माघ० लतालीवनसंवृद्धसमीरसीमेतितकेतकीकाः॥ आसेदिरेलावणसैंधवीनांचमूचरैःकच्छ
२१ भुवांप्रदेशाः॥८०॥ लवंगमालाकलितावतंसास्तेनालिकेरांतरपःपिबंतः॥ आस्वादिता
र्द्रक्रमुकाःसमुद्रादभ्यागतस्यप्रतिपत्तिमीषुः॥८१॥ तुरगशताकुलस्यपरितःपरमेकतु
रंगजन्मनःप्रमथितभूभृतःप्रतिपथंमथितस्यभृशंमहीभृता॥ परिचलतोबलानुजबल
स्यपुरःसततंधृतश्रियश्चिरविगलच्छ्रियोजलनिधेश्चतदाभवदंतरंमहत्॥८२॥ इतिश्री २१
शिशुपालवधेमहाकाव्येमाघकृतौद्वारकावर्णनंनामतृतीयःसर्गः ३॥ निध्यासधूमंस राम०
हरत्नभाभिर्भित्वोत्थितंभूमिमिवोरगाणां॥ नीलोपलस्यूतविचित्रधातुमसौगिरिंरैव
तकंददर्श॥१॥ गुर्वीरजस्रंदृषदःसमंतादुपर्युपर्यंबुमुचांवितानैः॥ विध्यायमानैर्दिव

सस्ताभर्तुर्मार्गंवुनारेराहुमिवोत्लमरि: ॥२॥ क्रांतरुचाकांचनवप्रभाजानवप्रभाजालभृतांमणी
नां ॥ श्रितंशिलाश्यामलताभिरामंलताभिरामंत्रितषट्पदाभि: ॥३॥ सहस्रसंख्यैर्गगनंशिरो
भि:पादैर्भुवंव्याप्यवितिष्ठमानं ॥ विलोचनस्थानगतोष्णरश्मिनिशाकरंसाधुहिरण्यगर्भं ॥४॥
कचिज्जलापायविपांडुराणिधौतोत्तरीयप्रतिमछवीनि ॥ अभ्राणिविभ्राणमुमांगसंगविभक्त
भस्मानमिवस्मरारिं ॥५॥ छायोनिजस्त्रीचटुलालसानांमदेनकिंचिच्चटुलालसानां ॥[illegible]॥ कु
वीणामुत्पिंजलजातपत्रैर्विहंगमानांजलजातपत्रै: ॥६॥ स्कंधाधिरूढोज्ज्वलनीलकंठानुर्वीरुह:
श्लिष्टतनूनहींद्रै: ॥ प्रणालिंतानेकलताभुजायान्नुद्धानंनतानिवधारयंतं ॥ ॥७॥ विलंविन
लोत्पलकर्णपूरा:कपोलभित्तीरिवलोध्रगौरी: ॥ नवोलपालंकृतसेकताभा:शुचीरपःशैव

माघ० २२ लिनीर्दधाने॥८॥राजीवराजीवशलोलभृंगंमुष्णंतमुष्णंततिभिस्तरूणां॥कांतालकांताललनाः
सुराणांरक्षोभिरक्षोभितमुद्वहंतं॥९॥मुदेमुरारेरमरैःसुमेरोरानीययस्योपचितस्यशृंगैः
भवंतिनोद्दामगिरांकवीनामुच्छ्रायसौंदर्यगुणामृषोद्याः॥१०॥यतोमहार्घ्याणिभृतान्यनू
नैःप्रस्थैर्मुहुर्भूरिभिरुच्छिखानि॥आढ्यादपिप्रापणिकादजस्रंजग्राहरत्नान्यमितानिलो
कः॥११॥अखिद्यतासन्नमुदग्रतापंरविंदधानेप्यरविंदधाने॥भृंगावलिर्यस्यतटेनिपीतर २२
सानमत्तामरसानमत्ता॥१२॥यत्राधिरूढेनमहीरुहोच्चैरुन्निद्रपुष्पाक्षिसहस्रभाजा॥ राम०
सुराधिपाधिष्ठितहस्तिमल्ललीलांदधौराजतगंडशैलः॥१३॥विभिन्नवर्णागरुडाग्रजेनसूर्यस्य
रथ्याःपरितःस्फुरंत्या॥रत्नैःपुनर्यत्ररुचारुचंस्वामानिन्यिरेवंशकरीरनीलैः॥१४॥यत्रोज्झिता

निर्मुक्तंखुवाहेःसमुन्नमद्भिर्न्नसमुन्नमद्भिः॥ वनेववाधेविषपावकोत्थाविपन्नगानामवि
पन्नगानां॥१५॥ फलद्भिरुष्णांशुकराभिमर्शात्कार्शानवंधामपतंगकांतैः॥ शशंसयः
पात्रगुणाद्गुणानांसंक्रांतिमाक्रांतगुणातिरेकां॥१६॥ दृष्टोपिशैलःसमुहुर्मुरारेरपूर्ववद्वि
स्मयमाततान॥ क्षणेक्षणेयन्नवतामुपैतितदेवरूपंरमणीयतायाः॥१७॥ उच्चारणज्ञोथगि
रांदधानमुच्चारणात्पक्षिगणान्तटीस्तं॥ उत्कंधरंद्रष्टुमवेक्ष्यशौरिमुत्कंधरंदारुकइत्युवा
च॥१८॥ आच्छादितायतदिगंबरमुच्चकैर्गामाक्रम्यसंस्थितमुदग्रविशालशृंगं॥ मूर्ध्निस्फु
रत्तुहिनदीधितिकोटिमेनमालोक्यकोनभुविविस्मयतेगिरीशं॥१९॥ उदयतिविततोर्ध्वर
श्मिरज्जावहिमरुचौहिमधाम्नियातिचास्तं॥ वहतिगिरिरयंविलंबिघंटाद्वयपरिवारितवारणेंद्र

स ह वीः

माघ लीलां॥२०॥वहतियः परितः कनकस्थलीसहरितालसमाननवांशुकः॥ अचलएषभवानिवरा

२३ जतेसहरितालसमाननवांशुकः॥२१॥ पश्चात्यभागमिहसानुषुसन्निषण्णाः पश्यंतिशांतमल

सांद्रतरांशुजालं॥संपूर्णलब्धललनालपनोपमानमुत्संगसंगिहरिणस्यमृगांकमूर्त्तेः॥२२॥

कृत्वापुंवत्पातमुच्चैर्भृगुभ्योमूर्ध्निग्राव्णांजर्जरानिर्झरौघाः॥कुर्वंतिद्यामुत्पतंतःस्मरार्त्तस्वर्लो

कस्त्रीगात्रनिर्वाणमत्र॥२३॥ स्थगयंत्यमूःशमितचातकार्त्तस्वराजलदास्तडित्तुलितकांत २३

कार्त्तस्वराः॥ जगतीरिहस्फुरितचारुचामीकराः सवितुःक्वचित्कपिशयंतिचामीकराः॥२४॥

उत्क्षिप्तमुच्छ्रितशितांशुकरावलंबैरुत्तंभितोडुभिरतीवतरांशिरोभिः॥श्रद्धेयनिर्झरजल

व्यपदेशमस्यविष्वक्तटेषुपततिस्फुटमंतरिक्षं॥२५॥ एकत्रस्फटिकतटांशुभिन्ननीरानील

त्रि१

भ्रमद्घर्तिं दुरं भसोपरत्र॥ कालिंदीजलजनितश्रियः श्रियं ते वेदग्धी मिह सरितः सुरापगायाः॥२६॥ उ
तस्तातोस्मिन् विलसीतिमैरोः समानवप्रेमणिस्मानुरागाः॥ स्त्रियश्च पत्योसुरसुंदरीभिः समानवप्रे
मणिस्मानुरागाः॥२७॥ उच्चैर्महारजतराजिविराजितासौदुर्वर्णभित्तिरिह सांद्रसुधासवर्णा॥ अ
न्येतिभस्मपरिपांडुरितस्मरारेरूढस्फि लोचनललाममललाटलीलां॥२८॥ अयमतिजरठाः प्र
कामगुर्वीरलघुविलंविपयोधरोपरुद्धाः॥ सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटी
र्विभर्त्ति॥२९॥ धूमाकारं दधति पुरः सौवर्णवर्णोनाग्नेः शश्वच्छितरे पश्यामी॥ श्यामीभूताः कुसुमस
मूहेलीनां लीनां श्रेणीमिह तरवो विभ्राणाः॥३०॥ व्योमस्पृशः प्रथयता कलधौतभित्तीरुन्नि
द्रपुष्पचणाचंपककपिंगभासः॥ सौमेरवीमधिगतेन नितंबशोभामेतेन भारतमिलावृत्तं विभाति॥३०॥

माघ० तुचिरचित्रतनूरुहशालिभिर्विचलितैः परितः प्रियकव्रजैः। विविधिरत्नमयैरिव भात्यसाववयवै
२४ रिव जंगमतां गतैः ॥३२॥ कुशेशयैरत्र जलाशयोषिता मुदा रमंते कलभा विकस्वरैः ॥ प्रगीयते सिद्ध
गणैश्च योषिता मुदा रमंते कलभा विकस्वरैः ॥३३॥ आसादितस्य तमसा नियतेर्नियोगादाकांक्ष वाइवार्थे उप मायां विकल्पेवा इत्यमरः =५
तः पुनरपक्रमणेन कालं ॥ पत्युस्त्विषामिह महौषधयः कलत्रस्थानं परैरपरिभूतममूर्वहं
ति ॥३४ पुनः पतितस्कंधनिषण्णबालप्रवालहस्ताः प्रमदा इवात्र ॥ पुष्पेक्षणैर्लंभितलोचकैर्वा २४
मधुव्रतव्रातवृतैर्व्रततत्यः ॥३५॥ विहगाः कदंबसुरभाविह गाः कलयंत्यनुक्षणमनेककल राम
वैं ॥ भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः ॥३६॥ विहङ्गिरागमपरैर्विहृतै
कथंचिच्छ्रुत्वापि दुर्ग्रहैर्निश्चितधीभिरन्यैः ॥ श्रेयान् द्विजातिरिव हंतुमघानि दक्षं गूढार्थमेष

न१

जे २

तता विश्च ता
अनेक तमा
लाश्च ताला
२ श्च यास्मिन्

निधिमंत्रगणंविभर्त्ति ॥३७॥ विंबोष्टंवक्रमनुतेतुरंगवक्त्रंकंवंतमुखमिहकिन्नरंप्रियायाः॥श्लि
ष्यंतमुद्धरितरोपितेनिघ्नीमुत्तुंगस्तनभरभंगभीरुमध्यां॥३८॥यदेतदस्पर्शानुतटंविभर्त्तिकिंनंत
तानेकतमालतालं॥नपुष्पितान्त्रस्थगितार्करश्मावनंततानेकतमालतालं॥३९॥ दंतोज्वलासु
विमलोपलमेखलांतःसद्रत्नचित्रकटकासुबृहद्भृत्रितंवाः॥अस्मिन्भजंतिघनकोमलगंडशोल
नार्योनुरूपमधिवासमधित्यकासु॥४०॥अनतिविराजितस्यजलदेनचिरस्थितबहुबुद्बुदस्य
पयसोनुकृतिं॥विरलविकीर्णवज्रशकलासकलामिहविदधातिधौतकलधौतमही॥४१॥वर्ज
यंत्याजनैःसंगमेकांततस्तर्कयंत्यासुखंसंगमेकांततः॥योषयेषस्मरासन्नतापांगया
सेव्यतेनेकयासन्नतापांगया॥४२॥ सैकीरकीचककवनस्खलितैकबालविच्छेदकातरधि

घनाविपुला:
कोमला: श्लक्ष्णा
गंडशैलागंड
स्थलानिस्य
लोपलायासा
२४

लो२

माघ २५ प्रस्खलितुंचमर्य्यः॥ अस्मिन्न्मृदुश्वसनगर्भतदीयरंध्रनिर्यत्स्वनश्रुतिसुखादिवनोत्सहंते
॥४३॥ मुक्तंमुक्तागौरमिहक्षीरमिवाभ्रैर्वापीष्वंतर्लीनमहानीलदलेसु॥ शस्त्रीश्यामैरंशु
भिराशुद्रुतमंभः छायामछामृछतिनीलीसलिलस्य॥४४॥ यान्तययोप्रियमन्यवधूभ्यः
सारतरागमनायतमानैः॥ तेनसहेहबिभर्तिरहःस्त्रीसारतरागमनायतमानं॥४५॥ निन्द्रे
क्षुरत्नकिरणैः किरणोघ्धिहेंदोरुच्चावचैरुपगतेषुसहस्रसंख्यां॥ दोषापिनूनमहिमांशु २५
रसौकिलेतिव्याकोचकोकनदतांदधतेनलिन्यः॥४६॥ अपशंकमंकपरिवर्त्तनोचि रामः
ताश्चलिताःपुरःपतिमुपैतुमात्मजाः॥ अनुरोदतीवकरुणेनपत्रिणांविरुतेनवत्स
लतैष निम्नगाः॥४७॥ मधुकरविटपानमितास्तत्रुपंक्तीर्बिभ्रतोस्यविटपानमिताः॥ परिपा
पे

कपिशीगलत्तारजसारोधध्रुवकास्तिकपिशंगलता ॥४८॥ प्राग्प्रागतःपतदिहेदमुपत्यकासुशृंगा
रितायतमहेभकराभमंभः ॥ संलंघ्यते विविधरत्नकरानुविद्धमूर्द्धप्रसारितसुराधिपचापचार
॥४९॥ सवधूकाः सुखिनोस्मिन्ननवरतममंदरागतामरसदृशः ॥ नासेवंतेरसवन्ननवरतमम
दरागतामरसदृशः ॥५०॥ दधतिस्वविकसद्धिचित्रकल्पद्रुमकुसुमैरभिगुंफितानिवेताः ॥ स्तप
मलघुविलोलविपिछदाम्नः शिखरशिखाः शिखिशेखरानमुष्य ॥५१॥ व्याघ्राघ्रपुष्पपरमे
षमहांतमंतरावर्तिभिर्गृहकपोतशिरोधराभैः ॥ स्वांगानिधूमरुचिमागुरवींदधानैर्धूपाय
तीवपटलैर्नवनीरदानां ॥५२॥ अन्योन्यव्यतिकरचारुभिर्विचित्रैरत्रस्यन्नवमणिजन्मभि
र्मयूखैः ॥ विस्मेरान्गगनसदः करोत्यमुष्मिन्नाकाशेरचितमभित्तिचित्रकर्म ॥५३॥ समीरशि

माघ० २६

शिरःशिरस्सुवसतांसतांजवनिकानिकामसुखिनांविभर्त्तिजनयन्नयंमुदमपामपायधवला
वलीहकततीः॥५४॥ मैत्र्यादिचित्तपरिकर्मविदोविधायक्लेशप्रहाणमिहलब्धसवीजयोगाः॥ख्या
तिंचसत्वपुरुषान्यतयाधिगम्यवांछंतितामपिसमाधिभृतोनिरोद्धुं॥५५॥ मरकतमयमेदिनीषुभा
नोस्तरुविटपांतरपातिनोमयूखाः॥ अनेवतशितिकंठकंठलक्ष्मीमिहदधतिस्फुरिताणुरेणुजा
लाः॥५६॥ याविभर्त्तिकलवल्लकीगुणस्वानमानमतिकालिमालया॥ नात्रकांतमुपगीतया
तयास्वानमानमतिकालिमालया॥५७॥ सायंशशांककिरणाहतचंद्रकांतनिस्यंदिनीरनि २६
करेणकृताभिषेकाः॥ अर्कोपलोल्लसितवह्निभिरह्निदीप्तास्तीव्रंमहाव्रतमिवात्रचरंतिव राम०
प्राः॥५८॥ एतस्मिन्नधिकपयःश्रियंवहंत्यःसंक्षोभंपवनभुवाजवेननीताः॥ वाल्मीकेरहितरा

मलक्ष्मणानांसादृश्यंदधतिगिरांमहासरस्यः ॥५९॥ इहमुहुर्मुदितैःकलभैरवःप्रतिदिशंक्रियतेक
लभैरवः ॥ स्फुरतिचानुवनंचमरीचयःकनकरत्नभुवांचमरीचयः ॥६०॥ त्वक्साररंध्रपरिपू
रणलब्धगीतिरस्मिन्नसौमृदितपक्ष्मलरल्लकांगः ॥ कस्तूरिकामृगविमर्दसुगंधिरेतिरागी
४५ वसक्तिमधिकांविषयेषुवायुः ॥६१॥ प्रीत्यैयूनांव्यवहिततपनाःप्रौढध्वांतंदिनमिहजलदाः ॥
दोषामन्यंविदधतिसुरतक्रीडायासश्रमशमपटवः ॥६२॥ भग्नोनिवासोयमिहास्यपुष्पैःसदानते
येनविषाणिनागः ॥ तीव्रानितेनो[illegible]तिकोपितोसौस[illegible]दानतोयेनविषाणिनागः ॥६३॥ प्रा
लेयशीतमचलेश्वरमीश्वरोपिसांद्रेभचर्मवसनावरणोधिशेते ॥ सर्वर्तुनिर्वृतिकरेनिवसन्नु
पैतिनद्वंद्वदुःखमिहकिंचिदकिंचनोपि ॥६४॥ नवनगवनलेखाश्याममध्याभिराभिःस्फटिकक

उ ऊ

द्वि २ च २

माघ० रकभूमिर्न्नाटयत्येषशैलः ॥ अहिपरिकरभाजोभास्मनैरंगरागैरधिगतधवलिम्नः शूलपाणे

२७ रभिख्यां ॥ ६५ ॥ दधद्भिरभितस्तटौविकचवारिजांबूनदैर्विनोदितदिनक्लमाः कृतरुचश्चजांबू

नदैः ॥ निषेव्यमधुमाधवाः सरसमत्रकादंवरींहरंतिरतयेरहः प्रियतमांगकादंवरीं ॥ ६६ ॥ द

र्पणनिर्मलासुपतितेघनतिमिरमुषिज्योतिषिरौप्यभित्तिषुपुरः प्रतिफलतिमुहुः ॥ व्रीड २७

मसौसुषोपिरमणैरपहृतवसनाः कांचनकंदरासुतरुणीरिहनयतिरविः ॥ ६७ ॥ अनुकृ राम

तशिखरौघश्रीभिरभ्यागतेसौत्वयिसरभसमभ्युत्तिष्टती वाद्रिरुच्चैः ॥ द्रुतमरुदुपनु

न्नैरुन्नमद्भिः सहेलैर्हलधरपरिधानश्यामलैरंवुवाहैः ॥ ६८ ॥ इतिश्रीशिशुपालवधेमहाका

व्येश्रीअंकेरैवतकवर्णनोनामचतुर्थः सर्गः ॥ ४ ॥ इत्थंगिरः प्रियतमाइवसोव्यलीकाः शुश्राव

स्रुततनयस्पतदावलीकाः॥ रंतुं निरंतरमियेषततोवसाने तासांगिरौचवनराजिषुधरंवसाने॥१॥
तंसह्विपेंद्रतुलिताततुलतुंगशृंगमन्युल्लसत्कदलिकावनराजिरुच्चैः॥ विस्तारस्रुद्धवसुधान्व
चलंचचालललक्ष्मींदधत्प्रतिगिरेरलघुर्वलौघः॥१०२॥ भास्वत्करव्यतिकरोल्लसितांवरांताः
सापत्रपाइवमहाजनदर्शनेन॥ संविष्टकंवरविकाश्चिचमूसमुत्थंध्वीरजःकरभकंठकडार
माशाः॥१०३॥ आवर्तिनःशुभफलप्रदशुक्तिमुक्ताःसंपन्नदेवमणयोभृतरंध्रभागाः॥ अश्वाः
प्यधुर्वसुमतीमतिरोचमानाम्स्तूर्णपयोधयइवोर्मिभिरापतंतः॥१०४॥ आरत्तमग्रमवम
त्यशृणिंशिताग्रमेकःपलायतजवेनकृतार्तनादः॥ अन्यःपुनर्मुहुरुदप्लवतास्तभार
मन्योन्यतःपथिवताविभितामिभोष्ट्रौ॥१०५॥ आयत्तमेहततजनश्वलुलायपादंगाढंतमुष्ठ

नं२

लितचामरचारुमरुत्सखं ॥ नागंपुनर्मृदुसलीलनिमीलिताक्षंसर्वःप्रियःखलुभवत्यनुरूपचेष्टः
॥६॥ त्रस्तःसमस्तजनहासकरःकरेणोस्तावत्खरःप्रखरमुल्ललयांचकार ॥ यावच्चलासनविलो
लनितंबबिंबविस्रस्तवस्त्रमवरोधवधूःपपात ॥७॥ शैलोपशल्यनिपतद्रथनेमिधारानिष्पि
ष्टनिष्ठुरशिलातलचूर्णगर्भाः ॥ भूरेणवोनभसिबद्धपयोदचक्राश्चक्रीवदंगरुहधूम्ररु
चोविसस्रुः ॥८॥ उद्यत्कृशानुशकलेषुखुराभिघाताद्भूमीसमायतशिलाफलकाचितेषु
॥ पर्यंतवर्त्मसुविचक्रमिरेमहाश्वाःशैलस्यदर्दुरपुटानिववादयंतः ॥९॥ तेजोनिरोध
समतावहितेनयंत्रासम्यक्कशात्रयविचारविदानियुक्तः ॥ आरट्टजश्चटुलनिष्ठुरपात
मुच्चैश्चित्रंचकारपदमर्द्धपुलायितेन ॥१०॥ नीहारजालमलिनःपुनरुक्तसांद्राःकुर्वन्वधू

जनविलोचनपक्ष्ममालाः॥ क्षुण्णःक्षणंयदुबलैर्दिवमातितांसुःपांसुर्दिशांमुखमतुच्छयदुत्थितो
ऽद्रेः॥११॥उत्क्षिप्य विद्विषइवत्रसभंगमेंद्रानिंद्रानुजानुचरभूपतयोध्यावात्सुः॥ वन्येभमस्तकनि
खातनखाग्रमुक्तमुक्ताफलप्रकरभांजिगुहागृहाणि॥१२॥ विभ्राणयाबहलयावककपंकपिंगपि
छावचूलमनुमाधवधामजग्मुः॥ चंच्वग्रदष्टचटुलाहिपताकयान्येस्त्वावासभागमुरगाशनकेतु
यष्ट्या॥१३॥छायामपास्यमहतीमपिवर्त्तमानामागामिनींजगृहिरेजनतास्तरूणां॥सर्वै
र्हिनोपनतमप्यपचीयमानंवर्द्धिष्णुमाश्रयमनागतमभ्युपैति॥१४॥अग्रेगतेनवसतिंपरिगृ
ह्यरम्यामापत्यसैनिकनिराकरणाकुलेन॥यातोन्यतःप्लुततरस्वरमाशुदूरादुद्वाहुनाजुहुवि
रेमुहुरात्मवर्ग्याः॥१५॥सिक्ताइवामृतरसेनमुहुर्जनानांक्लांतिछिदोवनवनस्पतयस्तदानीं शाखा

सौविदल्लाः कंचुकिनः

वशाक्कवसनाभरणाभिरामाः कल्पद्रुमैः सह विचित्रफलैर्विरेजुः ॥१६॥ यानाज्जनः परिजनैरवरोप्यमाणा
राज्ञीर्निरापनयनाकुलसौविदल्लाः ॥ स्रस्तावगुंठनपटक्षणलक्ष्यमाणवक्त्रश्रियः सभयकौतुकमी
क्षतेस्म ॥१७॥ कंठावसक्तमृदुबाहुलतास्तुरंगाद्राजावरोधनवधूरवतारयंतः ॥ आलिंगनाद्यधि
कृताः स्फुटमापुरेव गंडस्थलीः शुचितया न कुचंबुरासां ॥१८॥ दृष्ट्वैव निर्जितकलापभरामधस्ता
द्व्याकीर्णमाल्यकबरीं कबरीं तरूण्याः ॥ प्रादुद्रुवत्सपदि चंद्रकवान्द्रुमाग्रात्संघर्षिणा सह गुणा
भ्यधिकेदुरासं ॥१९॥ रोविष्कृकांचनचयांसुपिशंगिताशा वंशाध्वजैर्जलदसंहतिमुल्लिखंतः
॥ भूभर्तुरायतनिरंतरसंनिविष्टाः पादा इवाभिवभुरावलयो रथानां ॥२०॥ छायाविधायिभिर
नुज्झितभूतिशोभैरुच्छ्रायिभिर्बहलपाटलधातुरागैः ॥ दूष्यैरिवक्षितिभृतां द्विरदैरुदारतारावली

विरचितैर्व्यरुचन्निवासाः॥२१॥ उन्निद्रितस्थकांडपरकांतरलीयमानमंदानिलप्रशमितश्रमघ
र्मतोयैः॥ दूर्वाप्रतानसहजास्तरणेषुभेजेनिद्रासुखंवसनसद्मसुराजदारैः॥२२॥ प्रस्वेदवारि
सविशेषनिषक्तमंगेकूर्पासकंस्तनतटक्षतमुत्क्षिपंती॥ आविर्भवद्घनपयोधरबाहुमूला
शातोदरीयुवदृशांक्षणमुत्सवोभूत्॥२३॥ यावत्सएवसमयःसममवतावदव्याकुलाःपर
मयान्यभितोवितत्य॥ पर्याप्तवन्क्रयिकलोकमगण्यपण्यपूर्णायणांविपणिनोविपणीं
वितेनुः॥२४॥ अल्पप्रयोजनकृतोरुतरप्रयासैरुद्गूर्णलोष्टलगुडैःपरितोनुरुद्धे॥ उद्घात
मुद्भितमनोकहजालमध्यादन्यःशशःगुणमकृनल्पमवन्नवाप॥२५॥ त्रासाकुलःपरिपतन्प
रितोनिकेतान्नुर्भिन्नकैश्चिदपिधन्विभिरन्वबंधि॥ तस्योतथापिनमृगःक्वचिदंगनाभि

३०
माघ०

राकर्णपूर्णनयनेषुहतेक्षणश्रीः॥२६॥आस्तीर्णतल्परचितावसथःक्षणेनवेश्याजनःकृ
तनवप्रतिकर्मकाम्यः॥खिन्नानखिन्नमतिरापततोमनुष्यान्प्रत्यग्रहीच्चिरनिविष्टइवोप
चारैः॥२७॥सस्नुःपयःपपुरनेनिजुरंबराणिजक्षुर्बिसंधृतविकाशिबिसप्रसूनाः॥सैन्याः
श्रियामनुपभोगनिरर्थकत्वदोषप्रवादममृजन्नगनिम्नगानां॥२८॥नाभीह्रदैःपरिगृही
तरयाणिनिम्नैःस्त्रीणांबृहज्जघनसेतुनिवारितानि॥जग्मुर्जलानिजलमंडुकवाद्यवल्गु
वल्गाध्वनस्तनतटस्खलितानिमंदं॥२९॥आलोलपुष्करमुखोल्लसितैरभीक्ष्णमुक्षांबभू
वुरभितोवपुरंबुवर्षैः॥खेदायतश्वसितवेगनिरस्तमुग्धमूर्द्धन्यरत्ननिकरैरिवहास्तिका
नि॥३०॥येपक्षिणःप्रथममंबुनिधिंगतास्तेयेपींद्रपाणितुलितायुधलूनपक्षाः॥तेजग्मु

३०॥
राम०

रद्रिपतयःसरसीर्विगाढुमाक्षिप्तकेतुकुथसैन्यगजछलेन।।३१।।आत्मानमेवजलधेःप्रति
बिंबितांगमूर्मेर्महत्यभिमुखापतितंनिरीक्ष्य।।क्रोधादधावदपभीरतिनूर्णमन्यनागाभि
युक्तइवमुक्तमदोमहेभः।।३२।।नादातुमन्यकरिमुक्तमदांबुतिक्तंधूतांकुशेनविहातुमपी
छतांभः।। रुद्धेगजेनसरितःसरुषावतारेरिक्तोदपात्रकरमास्तचिरंजनोघः।।३३।।पंथानमा
शुविजहीहिपुरस्तनौतपश्यन्नपातिद्विरदकुंभविशोकिचेताः।। स्तंबेरमःपरिणिनंसुरसावुपे
तिखिन्नेरगद्यतससैन्त्रममेवमेका।।३४।।कीर्णंशनैरनुकपोलमनेकपानांहस्तैर्विगाढमदताप
रुजःश्रमाय।।र्क्ककर्णमुल्लसितमंबुविकाशिकाशनीकाशमापसमतांसितचामरस्य।।३५।।गं
डूषमुज्झितवतापयसःसरोषंनागेनलब्धपरवारणमारुतेन।।ऽंभोधिरोधसिपृथुप्रतिमानभा

३१ गरुढोरुदंतमुशलप्रसरंनिपेते ॥३६॥ दानंददत्यपिजलैःसहसाधिरूढे कोविद्यमानगतिरा
माघ॰ सितुमुत्सहेत ॥ यद्दंतिनःकटकटाहतटान्मिमंक्षोर्मंक्षूदपातिपरितःपटलैरलीनां ॥३७॥ अंतर्जलौ
घमवगाढवतःकपोलौहित्वाक्षणंविततपक्षतिरंतरिक्षे ॥ द्रव्याश्रयेष्वपिगुणेषुरराज
नीलोवर्णःपृथग्गततदुवालिगणोगजस्य ॥३८॥ संसर्पिभिःपयसिगैरिकरेणुरागैरंभोजगर्भर
जसांगविशेषिणाच ॥ क्रीडोपभोगमनुभूयसरिन्महेभावन्योन्यवस्त्रपरिवर्त्तमिवव्यधत्तां ३१
॥३९॥ यांचंद्रकैर्मदजलस्यमहानदीनांनेत्रश्रियंविकसतोविदधुर्गजेंद्राः ॥ तांप्रत्यवापुरवि राम
लंवितमुन्नरंतोधौतांगलग्ननवनीलपयोजपत्रैः ॥४०॥ प्रत्यन्यदंतिनिशितांकुशदूरभिन्ननि
र्याणनिर्यदसृजंचलितंनिषादी ॥ रोद्धुंमहेभमपरिस्खलितिमानमागादाक्रांतितोनवशमेतिमहानपरस्य ॥४१॥

सेव्योपिसानुन[illegible]यमाकलनाययैत्रानीतेनवन्यकरिदानकृताधिवासः॥नाभाजिकेवलम
भाजिगजेनशास्त्रीनान्यस्यगंधमपिमानभृतःसहंते॥४२॥शृंगाद्रकुंजवरकुंजरगंडकाषसं
क्रांतदानपयसोवनपादपस्य॥सेनागजेनमथितस्यनिजप्रसूनैर्मन्त्रेयथागतमगामिकुलैर
लीनं॥४३॥नोद्धैर्यदातरुतलेषुममुस्तदानीमाधोरणैरभिहिताःपृथुमूलशाखाः॥वंधा
यचिछिदुरिभास्तरसात्मनेवनैवात्मनीनमथवाक्रियतेमदांधैः॥४४॥उच्छ्रोच्छ्रशीकरस्रजः
प्रवलोष्मणोंतरुत्फुल्लनीलनलिनोदरतुल्यभासः॥एकान्नविशालशिरसोहरिचंदनेषुना
गान्ववंधुरपरानमनुजानिरासुः॥४५ कंडूयतःकटभुवेकरिणोमदेनस्कंधंसुगंधिमनुलीनवतान
गस्य॥स्थूलेंद्रनीलशकलावलिकोमलेनकंठेगुणत्वमलिनांवलयेनभेजे॥४६॥निर्द्धूतवीतमपि चा१

त्वग्नरादुधिनश्रीवान्मांसस्युमध्यनादपि॥ संज्ञानल
नतेयस्तुगजोगंभीरवेद्यसौ = ४

३२ माघ० लकमुत्त्वलंतंयंताक्रमेणापरिसांत्वनतर्जनाभिः॥ शिक्षावशेनशनकैर्वशमानिनायशास्त्रे
हिनिश्चितधियांक्वनसिद्धिमेति॥४७॥ स्तंभेमहांतमुचितंसहसामुमोचदानंददावतितरांसरसा
ग्रहस्तः॥ बद्धापराणिपरितोनिगडान्यलावीत्स्वातंत्र्यमुज्वलमवापकरेणुराजः॥४८॥ जह्ने
जनैर्मुकुलिताक्षमनाददानेसैरंध्रहस्तिपकनिष्ठुरचोदनाभिः॥ गंभीरवेदिनिपुरःकवलेक
रीदृमंदोपिनामनमहानवगृह्यसाध्यः (वित्त ध्य)॥४९॥ क्षिप्तंपुरोनजगृहेमुहुरिक्षुकांडंनापेक्षतेस्म ३२
निकटोपगतांकरेणुं॥ सस्मारवारणपतिःपरिमीलिताक्षमिच्छाविहारवनवासमहोत्सवानां॥५०॥ राम०
दुःखेननोजयितुमाशयितास्वशाकतुंगाग्रकायमन[illegible]मेतमनादरेण॥ उत्क्षिप्तहस्ततलदत्तपि
धानपिंडस्नेहस्रुतिस्नपितवाङ्कुरिनाथिराजे॥५१॥ शुक्लांशुकोपरिचितानिनिरंतराभिर्वेश्मानिरश्मि

विततानिनराधिपानां॥चंद्राह्वतीनिगजमंडलिकाभिरुच्चैर्नीलाभ्रपंक्तिपरिवेषमिवाधिजग्मुः॥५२॥
गत्यूनमार्गगतयोऽप्यगतोरुमार्गाःस्वैरंसमाचकृषिरेभुविवेल्लनाय॥दर्पोदयोल्लसितफेन
जलानुसारसंलक्ष्यपल्ययनवध्रपदास्तुरंगाः॥५३॥आजिघ्रतिप्रलातमूर्द्धनिवाह्लिजेष्वेतस्यां
गसंगमसुखानुभवोत्सुकायाः॥नासाविरोकपवनोल्लसितंतनीयोरोमांचतामिवजगामरजः
पृथिव्याः॥५४॥हेम्नःस्थलीषुपरितःपरिहृत्यवाजीधुन्वन्वपुःप्रविततायतकेशपंक्तिः॥ह्ला
लाकणारुणारुचानिकरेणरेतोःशेषेणतेजसइवोल्लसताररराज॥५५॥दंतालिकाधरणानि
श्चलपाणियुग्ममद्धोदितोहरिरिवोदयशैलमूर्द्धः॥स्तोकेननाक्रमतवल्लभपालमुच्चैःश्रीवृ
त्तकीपुरुषकोत्रमितायकायः॥५६॥रेजेजनैःस्नपनसांद्रतराईमूर्तिर्देवैरिवानिमिषदृष्टिभि

रिक्ष्यमाणः ॥ श्रीसन्निधानरमणीयतरोऽश्वउच्चैरुच्चैश्रवाजलनिधेरिवजातमात्रः ॥५७॥ आश्र
विभ्रमिपतिभिःसृणावीतनिद्रैरश्वैर्नुपुरोहरितकंमुदमादधानः ॥ ग्रीवाग्रलोलकलकिंकिणि
कानिनादमिश्रंन्यधद्दशनचुर्चुरशब्दमश्वः ॥५८॥ उत्खायदर्पचलितेनसहैवरज्वाकीलंप्रय
त्नपरमानवदुर्ग्रहेण ॥ आकुल्यकारिकटकस्तुरगेणतूर्णमश्वेतिविद्रुतमनुद्रवताश्वमन्यं ॥५९
अध्याकुलंप्रकृतमुत्तरधेयकर्मधाराःप्रसाधयितुमव्यतिकीर्णरूपाः ॥ सिद्धंमुखेनव
वीथिषुकश्चिदश्वंवल्गाविभागकुशलोगमयांबभूव ॥६०॥ मुक्तास्तृणानिपरितःकटकं
चरंतस्सुग्रह्रितानतनिकाव्यतिषंगभाजः ॥ सस्तुःसरोषपरिचारकवार्यमाणादामांचन
सवलितलोलपदंतुरंगाः ॥६१॥ उत्तीर्णभारलघुनाप्यलघूलपौघसौहित्यनिःसहतरेण

३हो

तरोरधस्तात्॥ रोमंथमंथरचलद्गुरुसास्नमासां चक्रे निमीलदलसेक्षणमौक्षकेन॥६१॥ मर्ति
इशेखरितकोटिभिरर्द्धचंद्रं शृंगैः शिखाग्रगतलक्ष्ममलंकृतस्रिः॥ उद्दंगिताच्छवृषभाः स
रितां नदंतो रोधांसि धीरमपचस्करिरे महोक्षाः॥६३॥ मेदस्विनः सरभसोपगतानभीकान् भेत्ता
परानतुहोमुकुराहवेन॥ ऊर्जस्वलेन सुरभीमनु निःसपत्नं जग्मे जयोद्धुरविशालविषाण
मुक्ष्णा॥६४॥ विभ्राणमायतिमतीमवृथां शिरोधिं रन्ध्यगतामतिरसामधिकं दधंति॥ लो
लोमोच्चकमुदयमुखं तरूणामभ्रंलिहानि लिलिहे नवपल्लवानि॥६५॥ सार्द्धं कथंचिदु
चितैः पिचुमंदपत्रैरास्यांतरालगतमाम्रदलं म्रदीयः॥ दासेरकः सपदि संवलितं निषादै
र्विप्रं पुरा पतगराडिव निर्जगार॥६६॥ स्पष्टं बहिः स्थितवतेऽपि निवेदयंतश्चेष्टाविशेषमनुजी

३४ माघ०

स१

विज्ञनापराज्ञां वैतालिकाः स्फुटपदप्रकटार्थमुच्चैर्भोगावलीः कलगिरोवसरेषुपेठुः ॥६७॥ उन्न
म्रताम्रपटमंडपमंडितं तदानीलनागकुलसंकुलमावभासे ॥ संध्यांशुभिन्नघनकर्बुरितां
तरिक्षलक्ष्मीविडंबिशिबिरं शिवकीर्त्तनस्य ॥६८॥ घरस्योच्छ्रितोसित्वमितिनन्नुसर्वत्रजगति
प्रतीतस्तत्किं मामतिभरमधः प्रापयिषुः ॥ उपालब्धेवोच्चैर्गिरिपतिरितिश्रीपतिम
सौवलाक्रांतः क्रीडद्द्विरदमथितोर्वीरुहरवैः ॥६९॥ इतिश्रीशिशुपालवधेमहाकाव्येश्र्यंकेमा ३४
घकृतौ करकवर्णनोनामपंचमः सर्गः ॥५॥ ॥ अथरिरंसुममुंयुगपद्गिरौकृतयथास्वतरुप्र राम०
स२ सवश्रिया ॥ ऋतुगणेन निषेवितुमादधे भुविपदं विपदंतकृतं सतां ॥१॥ नवपलाशपला
शवनं पुरः स्फुटपरागपरागतपंकजं ॥ मृदुलतांतलतांतमलोकयत्ससुरभिंसुरभिंसुमनो

वसंतं=१

४=पिशितंतरसंमांसमित्यमरः=४

ले।

नैरेः॥२॥विलुलितालकसंहतिरामृशन्मृगदृशांश्रमवारिललाटजं॥तनुतरंगततीःसरसांदलत्कुवलयं
वलयन्मरुदाववौ॥३॥तुल यतिस्मविलोचनतारकाःकुरवकस्तवकव्यतिषंगिणि॥गुणवदाश्र
यलब्धगुणोदयेमलिनिमालिनिमाधवयोषितां॥४॥स्फुटमिवोज्ज्वलकांचनकांतिभिर्युतमशोक
मशोभतचंपकैः॥विरहिणांहृदयस्यभिदाभृतःकपिशितंपिशितंमदनाग्निना॥०५॥स्मरहुता
सनमुर्मुरचूर्णतांदधुरिवाम्रवणस्यरजःकणाः॥निपतिताःपरितःपथिकव्रजानुपरितेपरितेनु
रतोभ्रमं॥०६॥रतिपतिप्रहितेवकृतक्रुधःप्रियतमेषुवधूरनुनायिका॥वकुलपुष्परसासवपे
शलध्वनिरगान्निरगान्मधुपावलिः॥०७॥प्रियसखीसदृशंप्रतिबोधिताःकिमपिकाम्यगिराप
रपुष्टया॥प्रियतमायवपुर्गुरुमत्सरच्छिदुरयाँदुरयांचितमंगनाः॥०८॥मधुकरैरपवादकरैरिवस्म

ऋगात्वक्स्रात=२

०३५
माघ०

तिभुवःपथिकाहरिणाइव॥ कलतयावचसःपरिवादिनीस्वरजितारजितावशामायकुः॥९॥ समभि
स्रतपरसादवलंबितःप्रमदयाकुसुमावचिचीषया॥ अविनमन्नरराजहृथोद्यकैरहृतयाहृतयाव (पुंस्त्विन)
नपादपः॥१०॥ इदमपास्यविरागिपरागिणीरलिकदंवकमंवुरुहांततीः॥ स्तनभरेणजितस्त
(भावति) वकानमन्नवलतेवलतेभिमुखंतव॥११॥ सुरभितोच्छ्वसितेदधतस्तृषंनवसुधामधुरेचतवाधरे॥ अ
लमलेरिवगंधरसावमूनममसौमनसौमनसोमुदे॥१२॥ इतिवदंतमनंतरमंगनाभुजयुगोन्नमनो
च्चतरस्तनी॥ प्रणयिनंरभसादुदरश्रियावलिभयालिभयादिवसस्वजे॥१३॥ त्रिभिर्विशेषकं॥ ॥ ३५
वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया॥ चलितयाविदधेकलमेखलाकलकलोल राम
(नगणयत् तिस्म) कलोलदृशान्यया॥१४॥ अजगणन्नृगणाशःप्रियमग्रतःप्रणतमप्यभिमानितयानया॥ सति
(बहुधा:१)

उदरश्रियाउपलक्षितेतिशेषः=२ जातावेकवचनंप्रियानित्यर्थः:१

त्यागाच्चिकृतिरपि श्रियस्तनोतीति न्यायात् ३

इति किमु वक्तव्यमित्यर्थः २

अग्रे १

मधावनवन्मदनव्यथाविधुरितां धुरिताः कुकुरस्त्रियः ॥१५॥ कुसुमकार्मुककार्मुकसंहितद्रुत
शिलीमुखखंडितविग्रहाः ॥ मरणमप्यपराः प्रतिपेदिरे किमु मुहुर्मुहुर्गतभर्तृकाः ॥१६॥ रु
दिषावदनांबुरुहश्रियः सुतनु सत्यमलंकरणायते ॥ तदपि संप्रति संनिहिते मधावधिगमं धिग्
४ वर्तमानसामीप्ये लट् मंगलमश्रुणः ॥१७॥ त्यजति कष्टमसावचिराद्सून्विरहवेदनयेत्यघशंकिभिः ॥ प्रियतयागदि
ताः स्त्वयि बंधुवैरवितथा वितथाः सखि मा गिरः ॥१८॥ नखलु दूरगतोप्यतिवर्तते महमसाविति
बंधुतयोदितैः ॥ प्रणयिनो निशमय्य वधूर्बहिः स्वरमृतैरमृतैरिव निर्ववौ ॥१९॥ त्रिभिर्विशेषकं ॥
मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया ॥ मधुकरांगनया मुहुरुन्मदध्वनिभृ
ता निभृताक्षरमुज्जगे ॥२०॥ अरुणिताखिलशैलवना मुहुर्विदधती पथिकान्परितापिनः ॥

२ अथ कस्याश्चित्प्रोषितभर्तृकाया बन्धुजना श्वासनमित्यशेषकेनाह

निन्दितमनोमाहेति भाव:३

विकचकिंशुकसंहतिरुच्चकैरुदवहद्धवहव्यभुजःश्रियं॥२१॥अथग्रीष्मवर्णनं॥रवितुरंगतनू
रुहतुल्यतांदधतियत्रशिरीषरजोरुचः॥उपययौविदधन्नवमल्लिकाःशुचिरसौचिरसौरभसं
पदः॥२२॥दलितकोमलपाटलकुड्मलेनिजवधूश्वसितानुविधायिनि॥मरुतिवातिविलासि
भिरुन्मदभ्रमदलोमदलौल्यमुपाददे॥२३॥निदधिरेदयितोरसितद्गुणंस्नपनवारितुषारभृ
तःस्तनाः॥सरसचंदनरेणुरनुक्षणंविचकरेचकरेणवरोरुभिः॥२४॥अथवर्षावर्णनं॥स्फुरद
धीरतडिन्नयनामुहुःप्रियमिवागलितोरुपयोधरा॥जलधरावलिरप्रतिपालितस्वसमयासम
याज्जगतीधरं॥२५॥गजकदंबकमेचकमुच्चकैर्नभसिवीक्ष्यनवांबुदमंबरे॥अभिससारनवल्लभ
मंगनानचकमेचकमेकरसीरहः॥२६॥अनुययौविविधोपलकुंडलद्युतिवितानकसंवलितां

अनुचकार तद्रुमो१

अविरलो विः विद्युल्लता=२

विचित्रता१

शुके धृतधनुर्वलयस्य पयोमुचः शबलिमा बलिमाननुषो वपुः ॥२७॥ द्रुतसमीरचलैः क्षणाल

क्षितव्यवहिता विटपैरिव मंजरी ॥ नवतमालनिभस्य नभस्तरोरचिररोचिररोचत वारिदैः ॥२८॥

अबंधुरंद्री नंयथास्यात् पटलमंबुमुचां पथिकांगना सपदि जीवितसंशयमेष्यती ॥ सनयनांबुसखीजनसंभ्रमाद्विधुर

बंधुरबंधुरमैक्षत ॥२९॥ प्रवसतः सुतरामुदकंपयद्विदलकंदलकंपनलालितः ॥ नमयति स्म भूकंदल्यपि कदली तिशब्दाः एवं ४

वनानि मनस्विनीजनमनोनमनो घनमारुतः ॥३०॥ जलदपंक्तिरनर्तयदुन्मदं कलविलापि

कलापिकदंबकं ॥ कृतसमार्जनमर्दलमंडलध्वनिजया निजया स्वरसंपदा ॥३१॥ नवकदंबर

जोरुणितांबरैरधिपुरंध्रि शिलींध्रसुगंधिभिः ॥ मनसि रागवतामनुरागिता नवनवा वनवा

युभिराद्धे ॥३२॥ शमिततापमपोढमहीरजः प्रथमबिंदुभिरंबुमुचोंभसां ॥ प्रविरलैरचलांगनमंग

कंदल्याश्च शिलींध्रः स्यादिति शब्दार्णवात् २

बलसौधवलौऽर्जुनः=१

६३

३७ नाजनं नसुगंनसुगंधिनचक्रिरे॥३३॥द्विरददंतवलक्षमलक्ष्यत स्फुरितभृंगमृगछविकेतकी॥घ

माघ० नघनौघविघट्टनया दिवः कृशशिखंशशिखंडमिवच्युतं॥३४॥ दलितमौक्तिकचूर्णविपां

डवः स्फुरितनिर्झरशीकरचारवः॥ कुटजपुष्पपरागकणाः स्फुटं विदधिरे दधिरे च विडंबनं॥३५

नवपयःकणकोमलमालतीकुसुमसंततिसंततसंगिभिः॥ प्रचलितोडुनिभैः परिपांडिमा

शुभरजोन्नरजोलिभिराददे॥३६॥ निजरजःपटवासमिवाकिरद्धृतपरागमवारिमुचां दिशां॥प्रिय ३७

हंत्री कदंबावलिः

वियुक्तवधूजनचेतसामनवनीनवनीपवनावलिः॥३७॥ प्रणयकोपभृतोपिपराङ्मुखाः राम

सपदिवारिधरारवभीरवः॥ प्रणयिनः परिरब्धुमनंतरंववलिरेवलिरे वितमध्यमाः॥३८॥वि

गतरागगुणोपिनरोनकं ध्वलतिवातिपयोदनभस्वति॥ अभिहितेलिभिरेवमिवोच्चकैरनन्

किल्लेत्पलीके भयादेवनकिं तुरागादेवेतिभावः १

तेनच्छतेंवपल्लवैः ॥३९॥ अरमयन्नभवनाद्विरहकृतेः किलभयादययातुमनिच्छवः ॥ यदुनरेंद्रग
णीतरुणीगणास्तमथमन्मथमंथरभाषिणीः ॥४०॥ अथशरद्वर्णनं ॥ ददृतमंतुरिताहिमदीधितेरव अथशरद्वर्णनं ३
गकुलायकुलायनिलायितां जलदकालमवोधकृतं दिशामपरथापरथावयवावुधः ॥४१॥ स
विकचोत्पलचक्षुषमैक्षतक्षितिभृतोंकगतांदयितामिव ॥ शरदमच्छगलद्वसनोपमाक्षम
घनामघनाशनकीर्तनः ॥४२॥ जगतिनैशमशीतकरः करैर्वियतिवारिदवृंदमयंतमः ॥ जल
जराजिषुनैद्रमदिद्रवन्नमहतामहताः क्वचनारयः ॥४३॥ समयएवकरोतिबलाबलंप्रणिगदं
तइतीवशरीरिणां ॥ शरदिहंसरवाः परुषीकृतस्वरमयूरमयूरमणीयतां ॥४४॥ तनुरुहाणि
पुरोविजितध्वनेरमलपक्षविहंगमकूजितैः ॥ जगलुरक्षममेवशिखंडिनः परिभवोरिभवो

वाणोवृक्षविशेषः तस्यपुष्प
वलयः=१

हिमदुःसहः ॥४५॥ अनुवनंवनराजिवधूमुखेबहलरागजपाधरचारुणि ॥ विकचबाणदलाव
लयाधिकंरुरुचिरेरुचिरेक्षणविभ्रमाः ॥४६॥ कनकभंगपिशंगदलैर्दधेसरजसारुणताकेसरचा
रुभिः ॥ प्रियविमानितमानवतीरुषांनिरसनैरसनैरवृथार्थता ॥४७॥ मुखसरोजरुचंमदपा
टलामनुचकारचकोरदृशांयतः ॥ धृतनवातपमुत्सुकतामतोनकमलेकमलेभयदंभसि ॥४८
६=इषआश्विनेमासि विगतसस्यजिघत्समघट्टयत्कलमगोपवधूर्नमृगव्रजं ॥ श्रुततदीरितकोमलगीतकध्वनि
मिषेनिमिषेक्षणमग्रतः ॥४९॥ कृतमदंनिगदंतइवाकुलीकृतजगत्त्रयमूर्जमतंगजं ॥ ववुरयु
वायवः
क्छदगुच्छसुगंधयः सततगास्ततगानगिरोलिभिः ॥५०॥ विगतवारिधरावरणाः क्वचिद्द
दृशुरुल्लसितामलतासिताः ॥ क्वचिदिवेंद्रगजाजिनकंचुकाः शरदिनीरदिनीर्ददृशुर्दिशः ॥५१॥

ऊर्ज्जंकार्त्तिकं=२

विलुलितामनिलैः शरदंगनानवसरोरुहकेसरसंभवां ॥ विकरितुंपरिहासविधित्सयाहरि
वधूरिवधूलिमुदक्षिपत ॥५२॥ हरितपत्रमयीवमरुद्गणैः स्रगवनद्धमनोरमपल्लवा ॥ मधुरि
पौरभिताभ्रमुखीमुदे दिविततावितताम्बुकावली ॥५३॥ स्मितसरोरुहनेत्रसरोजलाम
तिसितांगविहंगहसद्दिवं ॥ अकलयन्मुदितामिवसर्वतः सशरदंशरदंतुरदिङ्मुखीं ॥५४॥
अथहेमंतवर्णानं ॥ गजपतिद्वयसीरपिहैमनस्तुहिनयन्सरितः पृषतांपतिः ॥ सलिलसंतति
मध्वगयोषितामतनुतातनुतापकृतंदृशोः ॥५५॥ इदमयुक्तमहोमहदेवयद्वरतनोः स्मरय
त्यनिलोन्मदं ॥ स्मरतियौवनसोष्मपयोधरान्सतुहिनस्तुहिनस्तुवियोगिनः ॥५६॥ प्रियतमे
मार्गशीर्षे
नययासरुषास्थितेनसहसासहसापरिरभ्यते ॥ श्लथयितुंक्षणमक्षमतांगनानसहसासहसा

स२

२९॥ कृतवेपथुः ॥५७॥ भृशमदूयत याधरपल्लवक्षतिरनावरणा हिममारुतैः ॥ दशनरश्मिपटेन च
माघ० सीत्कृतैर्नि॥ वसिते वसितेन सुनिर्ववौ ॥५८॥ धृताभृतासुतनोः कलसीत्कृतस्फुरितदं
नमरीचिमयं दधे ॥ स्फुटमिवावरणं हिममारुते मृदुतपादुतयाधरलेखया ॥५९॥ धृततु
षारकणस्य नभस्वतस्तरुलतांगुलितर्जनविभ्रमाः ॥ द्युनिरंतरमिष्टभुजांतरं वनित ३८
यानितया न विषेहिरे ॥६०॥ हिमऋतावपि ताः स्म भृशस्विदो युवतयः सुतरामुपकारिणि राम०
॥ प्रकटयत्यनुरागमकृत्रिमं स्मरमयं रमयंति विलासिनः ॥६१॥ अथ शिशिरवर्णनं ॥ कुसु
प्रियंगुलताः
मयत्नफलिनीरलिनीरवैर्मदविकाशिभिराहितहुंकृतिः ॥ उपवनं निरभर्त्सयत प्रियान्वि
युवतीर्युवतीः शिशिरानिलः ॥६२॥ उपचितेषु परेष्वसमर्थतां व्रजति कालवशाद्बलवानपि

माघे
तपसिमंदगभस्तिभिरंशुमान्नहिमहाहिमहानिकरोभवत्॥६३॥ अभिषिषेणयिषुंभुव
नानियस्मरमिवाख्यतलोध्ररजश्चयः॥ क्षुभितसैन्यपरागविपांडुरद्युतिरयंतिरयन्नुद
गाद्दिशः॥६४॥ शिशिरमासमपास्यगुणोस्यनः कइवशीतहरस्यकुचोष्मणः॥ इतिधिया
स्तरुषः परिरेभिरेघनमतोनमतोनुमता प्रियाः॥६५॥ अधिलवंगममीरजसाधिकंमलि
नीताः सुमनोदलतालिनः॥ स्फुरमितिप्रसवेनपुरोहसत्सपदिकुंदलतादलतालिनः
॥६६॥ अतिसुरभिरभाजिपुष्पश्रियामतनुतरतयेवसंतानकः॥ तरुणपरभृतःस्वनंरागिणा
मतनुतरतयेवसंतानकः॥६७॥ नोज्झितुंयुवतिमाननिरासेदक्षमिष्टमधुवासरसारं॥ चू
तमालिरलिनामतिरागादक्षमिष्टमधुवासरसारं॥६८॥ जगद्वशीकर्तुमिमाः स्मरस्यप्रभा

अथषतुर्जिर्वसंतवर्णनं २

वनीकेतनवैजयंती॥ इत्यस्य तेनेकदलीमधुश्रीः प्रभावनीकेतनवैजयंती॥१६९॥ स्मरराग
यीवपुस्तमिश्राप रितस्तारस्वरेस त्यवक्ष्यं॥ प्रियमपदि वापि को किले स्त्री परितस्तारर
वरेस त्यवक्ष्यं॥१७०॥ ग्रीष्मवर्णनमेकेन॥ वपुरंबुविहार हिमं शुचिनाम चिरं कमनीयतर
गमिता॥ रमणेन रमता पचिरां शुलताड्डुचिरां कमनीयतरागमिता॥१७१॥ वर्षावर्णनं द्वाभ्यां॥
मुदमदद्भुवाम पोमयूराः सहसायेतनदीपपाटलाभे॥ अलिनारमतालिनी शिलींध्रे
सहसायंतनदीपपाटलाभे॥१७२॥ कुरजा निर्वीह्य शिखिभिः शिखैरां दंसमयावनौघ
नमदभ्रमराणि॥ गगणं वगीतनिनदस्य गिरेर्द्धैः समयावनौघमदभ्रमराणि॥१७३॥ अथ
त्रिभिः शारदं वर्णयति॥ अभीष्टमासाद्य चिराय काले समुद्धृताशं कमनीचकाशे॥ योषिन्मनो

जन्मसुखोदयेषुसमुद्धृताशोकमनीचकास्ते॥७४॥स्तनयोःसमयेनतांनामभिनद्धारसमान
सारसेन॥परिरंभरुचिंततिर्जलानामभिनद्धारसमानसारसेन॥७५॥जातप्रीतिर्यामधुरे
रागानुवनांतंकामकांतेसारसिकांकुरुतेन॥तत्संपर्केंप्राप्यपुरामोहनलीलंकामकांते
सारसिकाकाकुरुतेन॥७६॥अथैकेनहेमंतंवर्णयति॥कात्ताजनेनरहसिप्रसभंगृहीतकेश
रतेःस्मरसहासवतोषितेन॥प्रेम्णागमनःसुरजनीष्वपिहेमनीषुकेशरतेस्मरसहासवतो
षितेन॥७७॥अथैकेनशिशिरंवर्णयति॥गतवतामिवविस्मयमुच्चकैरसकलामलपल्लवलील
या॥मधुकृतामसहकृजिरमावलीरसकलामलपल्लवलीलया॥७८॥कुर्वंतमित्यतिभरेणान
गानवाचःपुष्पैर्विराममलिनांचवनगानवाचः॥श्रीमान्ममस्तमनुसानुगिराविहर्तुंविभ्र

त्वानोदिसमयूरगिराविहर्तुं॥७९॥इतिश्रीशिशुपालवधेमहाकाव्येमाघकृतौऋतुवर्णनंनाम
 षष्ठः सर्गः॥६॥अनुगिरमृतुभिर्वितायमानामथसविलोकयितुंवनांतलक्ष्मीं॥निरग
मदभिराहुमाद्दतानांभवतिमहत्सुननिःफलःप्रयासः॥१॥दधतिसुमनसोवनानि
वह्वीर्युवतिषुतायदवःप्रयातुमीषुः॥मनसिशयमहास्त्रमन्यथामीकुसुमभंचंपक
मप्यलंविसोढुं॥०२॥अवसरमधिगम्यहूहरंत्योहृदयमयत्नकृतोज्वलस्वरूपाः॥अवनि
षुपदमंगनास्तदानीन्यदधतविभ्रमसंपदोंगनासु॥०३॥नखरुचिरचितेंद्रचापलेखंल
लितगतेषुगतागतंदधाना मुखरितवलयंपृथौनितंबेभुजलतिकामुहुरस्खलत्तरुण्याः
॥४॥अतिशयपरिणाहवान्वितेनेवकृतरमर्पितरत्नकिंकिणीकः॥अलघुनिजघनस्थ

१=परिणाहोविशालतेत्यमरः=१

ल्पस्याध्वनिमधिकंकलमेखलाकलापः॥५॥गुरुनिबिडनितंबबिंबभाराक्रमणनिपीडितमंगना
जनस्य॥ चरणयुगमसुस्रुवत्पदेषुस्वरसमसक्तमलक्तकछलेन॥०६॥तवसपदिसमीपमानयेता
महमितितस्यमयाग्रतोभ्यधायि॥ अतिरभसकृतालघुप्रतिज्ञामनृतगिरंगुणगौरिमाकृथामा॥०७॥
नचसुतनुनवेद्मियन्महीयान्सुनिरसकृतावनिश्चयः परेण॥ वितथयतिनजातुमद्वचोसाविति चत
थापिसखीषुमेभिमानः॥०८॥सततमनभिभाषणंमयातेपरिपणितंभवतीमनानयंत्या॥ त्वयितदिति
विरोधनिश्चितायांभवतिभवत्वसुहृज्जनःसकामः॥०९॥गतधृतिरवलं बितुंबतासून्नलमनालप
नादहंभवत्याः॥ प्रणयिनियदिनप्रसादबुद्धिर्भवममानिनिजीवितेदयालुः॥१०॥प्रियमितिव
निततिनितांतमागःस्मरणसरोषकषायिताक्षी॥ चरणगतसखीवचोनुरोधात्किलकथमप्यनु

कूलयांचकार ॥११॥ पंचभिः कुलकं ॥ कृतपदमितिमावयस्ययासीर्नेनुसुतनुंपरिपालयानुयांती ॥ नहिन
विदितखेदमेतदीयस्तनजघनोद्वहनेतवापिचेतः ॥१२॥ इतिगदतिसखीजनेनुरागाद्दयिततमाम
परस्थिरंप्रतीत्य ॥ तदनुगमवशादनायतानिन्यधितमिमानइवावनिंपदानि ॥१३॥ कुग्मी ॥ यदिमयि
लघिमानमागतायांत्वदधृतिरस्त्रिगतास्मिसंप्रतीयं ॥ कृततरपतपात्तमापपातप्रियमितिकोपपदे
नकापिसख्या ॥१४॥ अविरलपुलकः सहव्रजंत्याः प्रतिपदमेकतरः स्तनस्तरुण्याः ॥ घटितविघटितः ४२
प्रियस्यावक्षस्तटभुविकंदुकविभ्रमंबभार ॥१५॥ अशिथिलमपरावसज्यकंठेदृढपरिरब्धबृहद्वहिस्तनेन राम
॥ हृषिततनुरुहाभुजेनभर्तुर्मृदुममृदुव्यतिविद्धमेकबाहुं ॥१६॥ मुकुरस्तुसममाप्नुतीनितांतंप्राणादि
तकांचिनितिवमंडलेन ॥ विषमितपृथुहारयष्टितिर्यक्कुचमितरांतदुरस्थलेनिपीड्य ॥१७॥ गुरुतर

कलनूपुरानुनादंस्खलितनिर्मितवामपादपद्मा ॥ इतरदनतिलोलमादधानापदमथमन्मथमं
थरंजगाम ॥१८॥ त्रिभिर्विशेषकं ॥ लघुललितपदंतदंशपीठद्वयनिहितोभयपाणिपल्लवान्या ॥ सक
ठिनकुचचूचुकप्रणोदंप्रियमवरोहविलासमन्वियाय ॥१९॥ जघनमलघुपीवरोरुकृच्छ्रादुरुनिविड
स्तनितीवभारखेदि ॥ दयिततमशिरोधरावलंबिविस्तृभुजलताविभवेनकाचिदूहे ॥२०॥ अनुवपुरपरे
णबाहुमूलप्रहितभुजाकलितस्तनेननिन्ये ॥ निहितदशनवाससाकपोलेविषमवितीर्णप
दंबलादिवान्या ॥२१॥ अनुवनमसितिभ्रुवःसखीभिःसहपदवीमपरःपुरोगतायाः ॥ उरसिसर
सरागपादलेखाप्रतिमतयानुययावसंशयानः ॥२२॥ मदनरसमहौघपूर्णनाभीह्रदपरिवाहि
तरोमराजयस्ताः ॥ सरितइवसविभ्रमप्रयातप्रणदितहंसकभूषणाविरेजुः ॥२३॥ अतिपथमधु

रागिसारसानामनुनदिशुश्रुविरुतानिताभिः॥ विदधतिजनतामनःशरीरव्यधपटुमन्मथचा
पनादशंकं॥२४ मधुमथनवधूरिवाह्वयंतिभ्रमरकुलानिजगुर्यदुत्सुकानि॥ तदभिनयमिवा
वलिर्वनानामततुतनूतनपल्लवांगुलीभिः॥२५॥ श्रुतसकलकलिकाकुलीकृतालिस्खलनविकी
र्णविकाशिकेशराणां॥ मरुदवनिरुहांरजोवधूभ्यःसमुपहरन्विचकारकोरकाणि॥२६॥ उप
वनपवनानुपातदक्षैरलिभिरलाभियदंगनाजनस्य॥ परिमलविषयस्तदुन्नतानामनुगम
नेखलुसंपदोग्रतस्थाः॥२७॥ रथचरणधरांगनाकराब्जव्यतिकरसंपदुपात्तसौमनस्याः
॥ जगतिसुमनसस्तदादिनूनंदधतिपरिस्फुरमर्थतोभिधानं॥२८॥ अभिमुखपतितैर्गुण
प्रकर्षादयचितमुद्धतिमुज्ज्वलांदधानैः॥ तरुकिशलयजालमग्रहस्तैःप्रसभमनीयतभंग

मंगनानानां ॥२९॥ मुदितमधुभुजोभुजेनशाखाश्चलितविशृंखलशंखकंधुवंत्याः ॥ तरुरतिश
यितापरांगनायाःशिरसिमुदैवमुमोचपुष्पवर्षं ॥३०॥ अनवरतरसेनरागभाजाकरजपरिक्ष
तिलब्धसंस्तवेन ॥ सपदितरुणपल्लवेनवध्वाविगतदयंखलुखंडितेनमम्ले ॥३१॥ प्रियमभि
कुसुमोद्यतस्यबाहोर्नवनखमंडनचारुमूलमद्राक् ॥ मुकुरितकराहितेनपीनस्तनतट
रोधितिरोदधेंशुकेन ॥३२॥ विततवलिविभाव्यपांडुलेखाकृतपरभागविलीनरोमराजिः
॥ कृशमपिकृशतांपुनर्नयंतीविपुलतरोन्मुखलोचनावलग्नं ॥३३॥ प्रसकलकुचबंधुरोद्धु
रोरःप्रसभविभिन्नतनूत्तरीयबंधा ॥ अवनमदुदरोष्ठसद्दुकूलस्फुरततरलस्त्यगभीरनाभिमू
ला ॥३४॥ व्यवहितमिवजानतीकिलांतर्वणभुविवल्लभमभिमुख्यभाजे ॥ अधिविटपिसलि

लमग्रपुष्पग्रहणापदेन चिरं विलंघ्य का चित् ॥ ३५ ॥ अथ किल कथिते सखीभिरत्र क्षणमपरेव
ससंभ्रमा भवंती ॥ शिथिलितकुसुमाकुलाग्रपाणिः प्रतिपदसंयमितांशुका हृतांगी ॥ ३६ ॥
कृतभयपरितोषसंनिपातं सवकितसस्मितवक्त्रवारिजश्रीः ॥ मनसिजगुरुतत्क्षणोपदिष्टं
किमपि रसेन रसांतरं भजंती ॥ ३७ ॥ अवनतवदनेंदुरिछती वक्तुमवधिरधीरतया यदास्थिता
स्मै ॥ अहरत सुतरामतोस्य चेतः स्फुटमभिभूषयति स्त्रियस्त्रपैव ॥ ३८ ॥ कुलकं ॥ किशलयश
कलेष्ववाचनीयाः पुलकिनि केवलमंगके निधेयाः ॥ नखपदलिपयोपि भाविताथाः प्रति
धिरे दयितैरनंगलेखाः ॥ ३९ ॥ कृतकृतकरुषा सखीमपास्य च समकुशलेति कयाचिदात्मने
व ॥ अभिमतमभिसाभिलाषमाविः कृतभुजमूलमबंधिमूर्द्धि माला ॥ ४० ॥ अभिमुखमुपयाति

दीपिताद्यौ : ३

मास्मकिंचित्वमभिदधाःपरलेमधुव्रतानां॥ मधुसुरभिमुखाब्जगंधलुब्धैरधिकमधिव्वदनेन
मानिपाति॥४१॥ सरजसमकरंदनिर्भरासुप्रसवविभूतिषुभूरुहांविरक्तः॥ ध्रुवममलतनाम
वांछ्यासावधरममुंमधुपस्तवाजिहीते॥४२॥ इतिवदतिसखीजनेनिमीलद्विगुणितसांद्र
तराक्षिपक्ष्ममाला॥ अपतदलिभयेनभर्तुरंकंभवतिहिविक्लवतागुणोंगनानां॥४३॥ कु
लकं॥ मुखकमलकमुन्नमय्ययूनायदभिनवोढवधूर्बलादचुंबि॥ तदपिनकिलबालपल्लवा
ग्रग्रहपरयाविविदेविदग्धसख्या॥४४॥ व्रततिविततिभिस्तिरोहितायांप्रतियुवतोवदनंप्रि
यःप्रियायाः॥ यदधयदधरावलोपनृत्यत्करवलयध्वनितेनतद्विवब्रे॥४५॥ विलसितमनु
कुर्वतीपुरस्ताद्धरणिरुहाधिरुहोवधूर्लतायाः॥ रमणमृजुतयापुरःसखीनामगणित

चापलदोषमालिलिंग ।।४६।। सललितमवलंब्य पाणिनांसे सहचरमुच्छ्रितगुच्छवांछयान्या ।।
सकलकलशकुंभविभ्रमाभ्यामुरसि रसादवतस्तरे स्तनाभ्यां ।।४७।। मृदुचरणतलाग्रदुःस्थितत्वा
दसहतराकुचकुंभयोर्भरस्य ।। उपरिनिरवलंबनं प्रियस्य न्यपतदथोच्चतरुच्चिचीषयान्या ।।४८।।
उपरिजकुसमानियाचमानां कुशलतया परिरंभलोलुपोन्यः ।। प्रथितपृथुपयोधरां गृहाणस्वय
मितिमुग्धवधूमुदासदोर्भ्यां ।।४९।। इदमिदमितिभूरुहां प्रसूनैर्मुहुरतिलोभयता पुरः पुरोन्या ।।
अनुरहसमनायि नायिकेन त्वरयतिरं तु महोजनं मनोभूः ।।५०।। अभिपतितुमनालघुस्तनीभी
तेरभवदमुंचति वल्लभेति गुर्वी ।। विजनमिति बलादमुं गृहीत्वा क्षणमथवीक्ष्य विपक्षमं
तिकेन्या ।।५१।। अधिरजनि जगाम धाम तस्याः प्रियतमयेति रुषा स्रजावनद्धः ।। पदमपि

स्व १

चलितुंयुवानसेहेकिमिव नशक्तिरंससाधसानां ॥५१॥ नखलुवयममुष्यदानयोग्याः
पिबतिचपातिचयासकौरहस्त्वां ॥ व्रजविटपममुंददस्वतस्यैभवतुयतःसदृशश्चिराययोगः ॥
॥५२॥ तवकितवकिमाहितैर्वृथानःक्षितिरुहपल्लवपुष्पकर्णपूरैः ॥ ननुजनविदितैर्भ
वद्व्यलीकैश्चिरपरिपूरितमेवकर्णयुग्मं ॥५३॥ मुहुरुपहसितामिवालिनादैर्वितरसिनःकलि
कांकिमर्थमेनां ॥ वसतिमुपगतेनधाम्नितस्याःशठकलिरेवमहांस्त्वयापिदत्तः ॥५४॥ इति
गदितवतीरुषाजघानस्फुरितमनोरमपक्ष्मकेसरेण ॥ श्रवणनियमितेनकांतमन्या
सममसितांबुरुहेणचक्षुषाच ॥५५॥ कुलकं ॥ स्फुटमिदमभिचारमंत्रएवप्रतियुवतेरभिधा
नमंगनानां ॥ वसतनुरमुनोपहूयपत्याम्रदुकुसुमेनयदाहताप्यमूर्छत ॥५६॥ विनयतिसुदृशोः

४६ दृशः परागं प्रणयिनि कौसुममाननानिलेन ॥ तदहितयुवतेरभीक्ष्णमक्ष्णोर्द्वयमपि रो
घ० षरजोभिरापुपूरे ॥५८॥ समदनमवतंसमिते धिकर्णं प्रणयवता कुसुमेषुमध्यमायाः ॥ व्र
जदपि लघुतां वभूव भारः सपदि हिरण्मयमंडनं सपत्न्याः ॥५९॥ अनजितममुना तवाहम
स्त्रागरुचिरतयेत्यवनम्रलज्जयेव ॥ श्रवणकुवलयं वि लासवत्या भ्रमररुतैरुपकर्णमा
चचक्षे ॥६०॥ अवचितकुसुमा विहाय वल्लीर्युवतिषु कोमलमाल्यमालिनीषु ॥ पदमुप
दधिरे कुलान्यलीनां न परिचयो मलिनात्मनां प्रधानं ॥६१॥ श्लथशिरसिजपाशपातभा ४६
रादिव नितरां नतिमज्झि रंसभागैः ॥ मुकुलितनयनैर्मुखारविंदैर्घनमहतामिव पक्ष्मणां राम०
भरेण ॥६२॥ अधिकमरुणिमानमुद्वहद्भिर्विलसदशीतमरीचिरश्मिजालैः ॥ परिचित

परिचुंबनाभियोगादपगतकुंकुमरेणुभिः कपोलैः ॥६३॥ अवसितललितक्रियेण बाह्वोर्ललि
ततरेण तनीयसा युगेन ॥ सरसकिशलयानुरंजितैर्वा करकमलैः पुनरुक्तरक्तभाभिः ॥
६४॥ स्मरसरसमुरःस्थलेन पत्युर्विनिमयसंक्रमितांगरागरागैः ॥ भृशमतिशयखेदसंपदे
व स्तनयुगलैरितरेतरं निषण्णैः ॥६५॥ अतनुकुचभरानतेन भूयः क्लमजनितानतिना
शरीरकेण ॥ अनुचितगतिसादनिःसहत्वं कलभकरोरुभिरूरुभिर्दधानैः ॥६६॥ अप
हृतनवयावकैश्चिराय क्षितिगमनेन पुनर्वितीर्णरागैः ॥ कथमपि चरणोत्पलैश्चलद्भि
र्भृशविनिवेशबलात्परस्परस्य ॥६७॥ मुहुरिति वनविभ्रमाभिषंगादतमितदा नितरां नि
तंबिनीभिः ॥ मृदुतरतनवोलसाः प्रकृत्या चिरमपि ताः किमुत प्रयासभाजः ॥६८॥ सप्तभिः कुलकं॥

प्रथममलघुमौक्तिकाभमासीद्घर्मजलमुद्गलगंडमंडलेषु॥ कठिनकुचतटाग्रपाति
पश्चादथशातशर्करतांजगामतासां॥६९॥ विपुलकमपियौवनोद्धतानांघनपुलकोदय
कोमलंचकासे॥ परिमिलितमपिप्रियैःप्रकामंकुचयुगमुज्ज्वलमेवकामिनीनां॥७०॥ अ
विरतकुसुमावचायखेदान्निहितभुजालतयैकयोपकंठं॥ विपुलतरनिरंतरावलग्नस्तन
पिहितप्रियवक्षसाललंबे॥७१॥ अभिमतमभितःकृतांगभंगाकुचयुगमुन्नतिवित्तमुन्नम
य्य॥ तनुरभिलषितंक्लमच्छलेनव्यवृणुतवेल्लितबाहुवल्लरीका॥७२॥ हिमलवसदृशः
श्रमोदविंदूनपनयताकिलनूतनोढवध्वाः॥ कुचकलशकिशोरकौकथंचित्तरलतया
तरुणेनपस्पृशाते॥७३॥ गाढोढेकंजघनपुलिनेरुद्धमध्यप्रदेशःक्रामन्नूरुद्रुमभुजलताः

पूर्णानाभीह्रदांतः॥ उल्लंघ्योच्चैःकुचतटभुवंप्लावयन्रोमकूपान्स्वेदापूरोयुवतिसरितां
व्यापगंडस्थलानि॥७४॥ प्रियकरपरिमार्गादंगनायांयदाभूत्पुनरधिकतरेवस्वेदतो
योदयश्रीः॥ अथवपुरभिषेक्तुंतास्तदांभोभिरीषुर्वनविहरणखेदम्लानमम्लानशोभाः
॥७५॥इतिश्रीशिशुपालवधेमहाकाव्येमाघकृतौकुसुमविहारोनामसप्तमःसर्गः॥७॥ आयास
दलघुतरस्तनैस्तनांगीःश्रांतानामविकचलोचनारविंदैः॥ अभ्यंभःकथमपियोषितांस
मूहेस्तैरुर्वीनिहितचलत्पदंप्रचेले॥१॥ यांतीनांसमममसितभ्रुवांनतत्वादंसानांमहतिनितांतमं
तरेपि॥ संसक्तैर्विपुलतयामिथोनितंबैःसंबाधंबृहदपितद्बभूववर्त्म॥२॥ नीरंध्रद्रुमशिशिरांभु
वंव्रजंतीःसाशंकंमुहुरि वकौतुकात्करैस्ताः॥ पस्पर्शुस्तागामनिलाकुलीकृतानांशारवाना

मलुहिनरश्मिभिरंतराले ॥५३॥ एकस्यास्तपनकरैःकरालितायाविभ्राणःसपदिसितोष्णवारणत्वं ॥ से
वायैवदनसरोजनिर्जितश्रीरागत्यप्रियमिवचंद्रमाश्चकार ॥५४॥ स्वंरागादुपरिवितन्वतोत्तरीयंकां
तेनप्रतिपदवारितातपायाः ॥ सच्छत्रादपरविलासिनीसमूहाछायासीदधिकतरा तदापरस्याः
॥५५॥ संस्पर्शप्रभवसुखोपचीयमानेसर्वांगेकरतललग्नवल्लभायाः ॥ कौशेयंव्रजदपिगाढ
तामजस्रंसंस्रंसेविगलितनीविनीरजाक्ष्याः ॥५६॥ यांतीरलसमवेक्ष्यविस्मयिन्यस्तास्तन्वी ४८
र्नविदधिरेगतानिहंस्यः ॥ बुद्ध्वावाजितमपरेणकाममाविःकुर्वीतस्वगुणमपत्रपःकएव ॥५७॥ रामः
श्रीमद्भिर्जितपुलिनानिमाधवीनामारोहैर्निविडबृहन्नितंबबिंबैः ॥ पाषाणस्खलनविलोल
मांशुनम्रंनैवलक्ष्याद्यदुरवरोधनानिसिंधोः ॥५८॥ मुक्ताभिःसलिलरयात्तशुक्तिपेशीमुक्ताभिः

कृतत्रुविसैकतंनदीनां॥ स्त्रीलोकः परिकलयांचकारतुल्यंपल्यंकैर्विगलितहारचारुभिःसैचैः
॥९॥ आघ्रायश्रमजमनिंद्यगंधवंधुंनिःश्वासश्वसनमसक्तमंगनानां॥ आरण्याःसुमनस
ईषिरेनभृंगैरोचित्यंगणयतिकोविशेषकामः॥१०॥ आयांत्यानिजधुवतीवनात्सशंकंवर्हा
णामपरशिखंडिनीभरेण॥ आलेकव्यवदधतंमयूरमारात्कामिन्यःश्लद्दधुरनार्जवंनरेषु॥११॥
४ माघवीका आलापैस्तुलितरवाणिवाणिनीनांमाधुर्यादमलपतत्रिणांकुलानि॥ अंतर्द्धामुपययुरु
त्पलावलीषुप्रादुःष्यात्कइवजितःपुरःपरेण॥१२॥ मुग्धायाःस्मरललितेषुचक्रवाकानिः
शंकंदयित तमेनव्रतुंविवितायाः॥ प्राणेशानभिविदधुर्विधूतहस्ताःसीत्कारंसमुचितमुत्तरं
तस्याः॥१३॥ उन्मिलिन्नस्फुरितसरोरुहार्घमुच्चैःसस्नेहंविहगरवैरिवालपंती॥ नारीणामथ

सरसीसफेणहासाप्रीत्येवव्यातनुतपाद्यमूर्मिहस्तैः ॥१४॥ नित्यायायानिजवसतेर्निरासिरेयद्रागेता
श्रियमरविंदतः कराग्रैः ॥ व्यक्तंत्वंनियतमनेननिष्ठुरस्याः सापत्न्यंक्षितिसुतविद्विषोमहि
ष्याः ॥१५॥ आस्कंदत्कथमपियोषितोनयावद्गीमत्यः प्रियकरधार्यमाणहस्ताः ॥ श्रोत्सु
कात्त्वरितममूस्तद्वेवुतावत्संक्रांतप्रतिमतयादधाविवांतः ॥१६॥ ताः पूर्वंसचकितमागम
य्यगाधंकचाथोम्रदुपदमंतराविशंत्यः ॥ कामिन्योमनइवरागिणांस्मरांगैरंगैस्तज्जलमनु
रंजयांबभूवुः ॥१७॥ संत्तोभंपयसिमुहुर्महेभकुंभश्रीभाजाकुचयुगलेननीयमाने ॥ विश्ले ॥४९
षीयुगमगमद्रथांगनाम्नोरुद्धृत्तः कइवसुखावहः परेषां ॥१८॥ आसीनातटभुविसस्मितेत ॥राम०
नभर्त्रारंभोरूरवतरितुंसरस्यनिच्छुः ॥ धुन्वानाकरयुगमीक्षितुंविलासांशीतालुः सलि

न१

लातेनसिच्यतेस्म॥१९॥नेच्छंतीसमममुनासरोविगाढंरोधस्तःप्रतिजलमीरितासखीभिः॥आ
श्लिष्यद्भयचकितेक्षणंनवोढावोढारंविपदिनदूषितातिभूमिः॥२०॥तिष्ठंतंपयसिपुमांसमंस
मात्रेतद्घ्नंतदवयती किलात्मनोपि॥अभ्येतुंसुतनुरभीरियेषमोग्ध्यादाश्लेषिद्रुतममुना
निमज्जतीति॥२१॥(तिष्ठंतंपयसि) आनाभेःसरसिनतभ्रुवावगाढेचापल्यादथसरसस्तरंगह
स्तैः॥ उच्छ्रायिस्तनयुगमध्यरोहिलब्धस्पर्शानांभवतिकुतोथवाव्यवस्था॥२२॥ कोतानां
कुवलयमप्यपास्तमक्ष्णोःशोभाभिर्नमुखरुचाहमेकमेव॥संहर्षादलिविरुतैरितीव
गायल्लोलोर्मौपयसिमहोत्पलंननर्त्त॥२३॥त्रस्यंतीचलशफरीविघट्टितोरूर्वामोरूरतिशय
मापविभ्रमस्य॥क्षुभ्यंतिप्रसभमहोविनापिहेतोर्लीलाभिःकिमुसतिकारणेरमण्यः॥२४॥

५०
माघ०

आकृष्टप्रतनुवपुर्लतैस्तरङ्गैस्तस्यांभस्तदथसरोमहार्णवस्य ॥ अन्तोभिप्रसृतविलोलबा
हूपस्तैर्योषाणामुरुभिरुरोजगंडशैलैः ॥२५॥ गांभीर्य्यंदधदपिरंतुमंगनाभिः प्रक्षोभंजघ
नविघट्टनेननीतः ॥ अंभोधिर्विकसितवारिजाननोसौ मर्य्यादांसपदिविलंघयांबभूव ॥२६॥
आदातुंदयितमिवावगाढमारादूर्मीणांततिभिरभिप्रसार्य्यमाणः ॥ कस्याश्चिद्विततच
लच्छिखांगुलीकोलक्ष्मीवान्सरसिरराजकेशहस्तः (केश समूहः) ॥२७॥ उन्निद्रप्रियकमनोरमंरमण्याः ५०
संरेजेसरसिवपुःप्रकाशमेव ॥ पुंस्क्रानांविमलतयातिरस्क्रियायैनाक्रामन्नपिहिभवत्य राम०
लंजलौघः ॥२८॥ किंतावत्सरसिसरोजमेतदारा दाहोस्विन्मुखमवभासतेयुवत्याः ॥
संशय्यक्षणमितिनिश्चिकायकश्चिद्बिब्बोकैर्बकसहवासिनांपरोक्षैः ॥२९॥ शृंगारि

बिब्बोकैर्विलासैः ॥

द्रुतकनकोज्वलानिगंधाःकौसुंभंपृथुकुचकुंभसंगिवासः॥माद्वीकंप्रियतमसंनिधा
नमासन्नारीणामितिजलकेलिसाधनानि॥३०॥उत्तुंगादनिलचलांशुकास्तटांताद्वे
त्तोभिःसहभयदर्शिनांप्रियाणां॥श्रोणीभिर्गुरुभिरतूर्णमुत्पतंत्यस्तोयेषुद्रुततरमंगना
निपेतुः॥३१॥मुग्धत्वादविदितकैतवप्रयोगागछंत्यःसपदिपराजयंतरुण्यः॥ताःकांतैः
सहकरपुष्करेरितांबुव्यात्युक्षीमभिसरणग्लहामदीव्यन्॥३२॥योग्यस्यत्रिनयनलोचना
नलार्चिर्निर्दग्धस्मरपृतनाधिराज्यलक्ष्म्याः॥कांतायाःकरकलशोद्धृतैःपयोभिर्वक्रेंदोर
कृतमहाभिषेकमेकः॥३३॥सिंचत्याःकथमपिबाहुमुन्नमय्यप्रेयांसंमनसिजदुःखदुर्बलायाः॥
सौवर्णवलयमवागलत्कराग्राल्लावण्यश्रियइवशेषमंगनायाः॥३४॥स्निह्यंतीदृशमपरानि

धायपूर्णाममूंतेनप्रणयरसेनवारिणेव॥कंदर्पप्रवणमनाःसखीसिसिक्षुर्लक्षेणप्रति
युवमंजलिंचकार॥३५॥आनंदंदधतिमुखेकरोदकेनश्यामायादयिततमेनसिच्यमाने॥
ईर्ष्यान्त्यावदनमसिक्तमप्यनल्पस्वेदांभःस्नपितमजायतेतरस्याः॥३६॥उद्दीप्यप्रियकर
कुड्मलापविद्धैर्वक्षोजद्वयमभिषिक्तमन्यनार्याः॥अंभोभिर्मुहुरसिचद्वधूरमर्षीदात्मीयं
स्फुटतरनेत्रयुग्ममुक्तैः॥३७॥कुर्वद्भिर्मुखरुचमुज्ज्वलामजस्रंयैस्तोयैरसिचतवल्लभांवि
लासी॥तैरेवप्रतियुवतेरकारिदूरात्कालुष्यंशशधरदीधितिच्छटाच्छैः॥३८॥रागांधीकृत
नयनेननामधेयव्यत्यासादभिमुखमीरितःप्रियेण॥मानिन्यावपुषिपतन्निसर्गमंदे
भिंदानोहृदयमसाहिनोदवज्रः॥३९॥प्रेमार्णोरःप्रणयिनिसिंचतिप्रियायासंतापंनव

जलविक्षुब्धोग्रहीष्या॥उद्धूताःकठिनकुचस्थलाभिघातादासन्नांभृशमपरांगनामधासुः॥४०॥
संक्रांतंप्रियतमवक्षसोंगरागंसाध्वस्याःसरसिहरिष्यतेधुनांभः॥ तुष्ट्वैवंसपदिहृतेपितत्रते
पेकस्याश्चिित्स्फुरनखलक्ष्मणःसपत्न्या॥४१॥ हृतायाःप्रति[illegible]सखिकामिनांचनाम्ना
ह्रीमत्याःसरसिगलन्मुखेंदुकांतेः॥ अंतर्छिद्रुतमिवकर्तुमश्रुवर्षैर्भ्रमानंगमयितुमीषिरेप्यां
सि॥४२॥सिक्तायाःक्षणमवसिच्यपूर्वमन्यामन्यस्याःप्रणयवतावतावलायाः॥ कालिम्ना
समधितमन्युरेववक्त्रंघ्राप्यास्याोर्गलदपशाद्मेजनांभः॥४३॥उद्वोढुंकनकविभूषणान्यश
क्ताःसध्रीचावलयितपद्मनालसूत्रः॥ आरूढप्रतिवनिताकटाक्षभारःसाधीयोगुरुरभव
वद्भुजस्तरुण्याः॥४४॥आवद्धप्रचुरपरार्द्ध्यकिंकिनीकोरामाणामनवरतोदगाहभाजां॥नारं

श्रारावंशरवृं=१

माघ॰ वंवातनुतमेखलाकलापःकश्चिच्चासजद्गुणेऽगिरांपदुच्चं॥४५ पर्य्यच्छेसरसिहृतेंशुकेपयोभि
र्लोलाक्षेसुरतगुरावपत्रपिष्णोः॥सुश्रोण्यपादलसेवंनेनवीचिहस्तन्यस्तेनद्रुतमकृताह्निनी
सखीत्वं॥४६॥नारीभिर्गुरुजघनस्थलाहतानामास्यश्रीविजितविकाशिवारिजानां॥लोल
त्वादपहरतांतदंगरागांसंजज्ञेसकलुषआशयोजलानां॥४७॥सोगंधंदधदपिकाममंगनानां
दूरत्वाऽकृतमहमाननोपमानं॥नेदीयोजितमितिलज्जयेवतासामालोलेपयसिपयोरुहंम ५२
मज्ज॥४८॥त्वभ्रष्टैःसरभससंभ्रमसौवगाहक्रीडाभिर्विदलितयूथिकापिशंगैः॥आकल्येस टाम॰
रसिकुरतामयैर्वधूनामोर्वाग्निद्युतिशकलैरिवद्युराजि॥४९॥आस्माकीयुवतिदृशामसौ
तनोतिछायैवश्रियमनपायिनींकिमेभिः॥मत्वैवंस्वगुणापिधानसाभ्यसूयैःपानीयैररिति

सुरे ४

विदधाविरेजनानि॥५०॥निर्द्धौतेतिसतिहरिचंदनेजलौघैरापांडौर्गतपरभागयांगनायाः॥
अच्छायस्तनकलशद्वयादुपेयेविच्छेदःसहृदयएवहारयष्ट्या॥५१॥अच्छूनंगुणममतस्य
धारयंतीप्रोत्फुल्लस्फुरितसरोरुहावतंसा॥प्रेयोभिःसहसरसीनिषेव्यमाणारक्तत्वंव्यधित
वधूदृशांच॥५२॥स्नातीनांवृहदमलोदविंदुचित्रैरेजातेरुचिरदृशामुरोजकुंभौ॥हाराणां
मणिभिरिवाश्रितौसमंतादुत्पन्नैर्गुणवदुपघ्नकाम्ययैव॥५३॥आरूढःपतितइतिस्वसंभवो
पिस्वच्छानांपरिहरणीयतामुपैति॥कर्णेभ्यश्च्युतमसितोत्पलंवधूनांवीचीभिस्तटमनुयत्रि
रासुरापः॥५४॥दंतानामधरमयावकंपदानिप्रत्यग्रास्तनुमविलेपनांनखांकाः॥आनिन्युः
श्रियमधितायमंगनानांशोभायैविपदिसदाश्रिताभवंति॥५५॥कस्याश्चिन्मुखमनुधौत

अविलेपिनी रद्धि:२

पत्रैरेवंव्यातेनेसलिलभरखवलेविनीभिः॥किंजल्कव्यातिकरपिंजरांतराभिश्चित्रश्रीरल
मलकाग्रवल्लरीभिः॥५६॥वक्षोभ्योघनमनुलेपनंपद्भूनामुत्तंसानहरतवारिमूर्द्धजेभ्यः॥
नेत्राणांमदरुचिरक्षतैवतस्थौचक्षुष्यःखलुमहतांपरैरगम्यः॥५७॥योवाह्यःसखलुजलै
र्निरासिरागोयश्चित्तेसतुतदवस्थएवतेषां॥धीराणांव्रजतिहिसर्वएवनांतःपातित्वादभि
भवनीयतांपरस्य॥५८॥फेनानामुरसिरुहेषुहारलीलाचेलश्रीर्जघनतटेषुसैवलानां॥गंडे
षुस्फुटरचनाचपत्रवल्लीपर्याप्तंपयसिविभूषणांवधूनां॥५९॥त्रस्यद्भिर्जलमभिभूषणैर्व
धूनामंगेभ्यो गुरुभिरमज्जिलज्जयेव॥निर्माल्यैरथननृतेवधीरितानाम
पुष्टैर्भवतिलघीयसांहिधार्ष्ट्यं॥६०॥आमृष्टास्तिलकरुचःस्रजोन्निरस्तानीरक्तंवसन

मपाहृतोंगरागः॥ कामः स्त्रीरनुशयवानिवस्वपक्षव्याघातादितिसुतरांचकारचारूः॥६१॥
शीतार्त्तिंबलवदुपेयुषेवनीरैरासेकाच्छिशिरसमीरकंपितेन॥ रामाणामभिनवयौवनो
ष्माभाजोराश्लेषिस्तनतटयोर्नवांशुकेन॥६२॥ श्च्योतद्भिः समधिकमात्तमंगसंगाल्लावण्यं
तनुमदिवांबुवाससोंतैः॥ उत्तेरेतरलतरंगरंगलीलानिष्णातैरथसरसःप्रियासमूहैः॥६३॥
दिव्यानामपिकृतविस्मयांपुरस्तादंभस्तः स्फुरदरविंदचारुहस्तां॥ उद्वीक्ष्यश्रियमिवकां
चिदुत्तरंतीमस्मार्षीज्जलनिधिमंथनस्यशौरिः॥६४॥ श्लक्ष्णंयत्परिहितमेतयोःकिलांतर्द्धा
नार्थंतदुदकसेकसक्तमूर्व्वोः॥ नारीणांविमलतरौसमुल्लसंत्याभासांत र्द्दधतुरुद्रदुकूलमे
व॥६५॥ वासांसिन्यवसतयानियोषितस्ताः शुभ्राभ्रद्युतिभिरहासितैर्मुदेव॥ अत्याक्षुःस्न

५४ यानि १

माघ॰ वनगलज्जलानिस्थूलाश्रुस्रुतिभिररोदितेः शुचेव॥६६॥ आर्द्रत्वादतिशयिनीमुपेयिवद्भिः

संसक्तिं भृशमपि भूरिशोवधूतैः॥ अंगेभ्यः कथमपि वामलोचनानां विश्लेषोवतनवरक्तकैः

प्रपेदे॥६७॥ प्रत्यंसं विलुलितमूर्द्धजा चिराय स्नान्ती वपुरुदवाप पत्त्रिलेखा॥ नाजानादभिम

तमंतिकेभिवीक्ष्य स्वेदांबुद्रवमनवत्तरांगुनस्तत्॥६८॥ सीमंतं निजमववध्नतीकराभ्यामालक्ष्यस्त

नतटवाकुमूलभागा॥ भर्त्रान्यामुकुरभिलक्ष्यतानिदध्ये नैवाहो विरमति कौतुकं प्रियेभ्यः॥६९॥

स्वच्छांभःस्नपनविधौतमंगमोष्ठस्तांबूलद्युतिविशदो विलासिनीनां॥ वासश्च प्रतनुविवि ५४

क्तमस्त्वितीयान्नाकल्पो यदि कुसुमेषुणा न शून्यः॥७०॥ इति धौतपुरंध्रिमत्सरान्सरसिम राम॰

ज्जनेन श्रियमाप्तवतोतिशायिनीमपमलांगभासः॥ अवलोकयतेदेवयादवानपरवारिराशेः

शिशिरेतरोऽशिषाप्यपां ततिभमंक्रमीषे ७१ इतिश्री शिशुपालवधे महाकाव्ये माघेकृतौ श्र्यंके विव
क्षितो जलक्रीडासंपादनोनामाष्टमः सर्गः ८ अभितापसंपदमथोष्णरुचिर्निजतेजसामसहमानइव पय
सिप्रपित्सुरपरांबुनिधेरधिरोढुमस्तगिरिमभ्यपतत् १ गतया पुरः प्रतिगवाक्षमुखं दधती रतेन भृशमुत्सुकतां
मुकुरं तरालमवमस्तगिरेः सवितुस्त्रयोपि हि समीतदृशा २ विरलातपच्छविरनुष्णवपुः परितोभिपांडु दधदभ्रशि
रः अभवद्गतः परिणतिं शिथिलः परिमंदसूर्यनयनो दिवसः ३ अपराह्णशीतलतरेण शनैरनिलेन लोलित
लतांगुलये निलयाय शाखिन इवाह्वयते ददुराकुलाः खगकुलानि गिरः ४ उपसंध्यमास्त तनु सानुमतः शिख
रेषु तत्क्षणमशीतरुचः करजालमस्तसमयेऽपि सतामुचितं खलूच्चतरमेव पदं ५ प्रतिकूलतामुपगते हि
विधौ विफलत्वमेति बहुसाधनता अवलंबनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ६ नवकुंकुमारुण

पयोधरयास्तकरावसक्तमुक्तरुचिरांवरया अतिसक्तिमेत्य वरुणस्य दिशाभृशमन्वरज्यदतुषा
रकरः ७ गतवत्यराजतजपाकुसुमस्तवकद्युतौ दिनकरेवनतिं बहलानुरागकुरुविंददलप्रति
वद्धमध्यमिवदिग्वलयं ८ द्रुतशातकुंभनिभमंशुमतोवपुरर्द्धमग्नवपुषः पयसि रुरुचेविरिंचिनखभि
न्नवृहज्जगदंडकैकतरखंडमिव ९ अनुरागवंतमपिलोचनयोर्दधतंवपुःसुखमतापकरं निरका
शयद्रविमपेतवसुंवियदालयादपरदिग्गणिका १० अभितिग्मरश्मिचिरमाविरमादवधानखिन्न
मनिमेषतया विगलन्मधुव्रतकुलाश्रुजलं न्यमिमीलदब्जनयनंनलिनी ११ अभितावतारकम
दृष्टहिमद्युतिविंवमस्तमितभानुनभः विरतोरुतापमतमिस्रमभादपदो

५५

८:-३
सायंसंध्यापितृप्रसूःदिनांते ग१

ष्टतैवविगुणत्वमस्यगुणः॥१२॥ शुचिधाम्निभर्त्तरिभृशंविमलाःपरलोकमभ्युपेतेविविशुः॥ ज्वलनंत्विषः
कथमिवेतरथासुलभोन्यजन्मनिसएवपतिः॥१३॥ विहितांजलिर्जनतयादधतीविकसत्कु
सुंभकुसुमारुणतां॥ चिरमुज्झितापितनुरोज्झदसौनपितृप्रसूःप्रकृतिमात्मभुवः॥१४॥ अथसो
ढ्रसांध्यकिरणारुणितोनिहारिहेतिकृतिमिथुनंपततोः॥ पृथगुत्पपातविरहार्त्तिदलद्धृदयस्रुतास्र
गनुलिप्तमिव॥१५॥ निलयःश्रियःसततमेतदितिप्रथितंयदेवजलजन्मतया॥ दिवसात्य
यतदपिमुक्तमहोचपलाजनंप्रतिनचोद्यमदः॥१६॥ दिवसोनुमित्रमगमद्विलयंकिमिहास्य
तेवतमयावलया॥ रुचिभर्त्तुरस्यविरहाधिगमादितिसंध्ययापिसपदिव्यगमि॥१७॥ पतितेपतंग
मृगराजिनिजप्रतिबिंबरोषितइवांबुनिधौ॥ अथनागयूथमलिनानिजगत्परितस्तमांसिपरितस्त

रिरे ॥१८॥ व्यसरन्नुभूधरगुहांतरतःपटलैर्वहिर्वहलपंकरुचि ॥ दिवसावसानपटुनस्तमसोवहि
रेत्यचाधिकमभक्तगुहाः ॥१९॥ किमलंवतांवरविलग्नमधःकिमवर्द्धतोर्द्धमवनीतलतः ॥ वि
ससारतिर्यगथदिग्भ्यइतिप्रचुरीभवन्ननिरधारितमः ॥२०॥ स्थगितांवरक्षितितलेपरितस्तिमिरे
जनस्यदृशामंधयति ॥ दधिरेरसांजनमपूर्वममीः प्रियवेश्मवर्त्मसुदृशोददृशुः ॥२१॥ अवधार्य
कार्यगुरुतामभवन्नभयायसांद्रतमसंतमसं ॥ सुतनोस्तनौचदयितोपगमेतनुरोमराजिपथ
वेपथवे ॥२२॥ सवितुस्त्विषाहनिनयोददृशेसतमीतमोभिरधिगम्यततां ॥ द्युतिमग्रहीद्ग्रह ५६
गणोलघवःप्रकटीभवंतिमलिनाश्रयतः ॥२३॥ अनुलेपनानिकुसुमान्यवलाःकृतमन्यवः राम०
पतिषुदीपशिखाः ॥ समयेनतेनसुचिरंशयितद्रुतवोधितस्मरमवोधिषत ॥२४॥ वसुधांतनिः

स्ततमिवाहिपतेः परलंफणामणिसहस्त्ररुचां॥ स्फुरदंशुजालमथशीतरुचः ककुभंसम
स्कुरुतमाघवती॥२५॥ विशदप्रभापरिगतंविवभावुदयाचलव्यवहितंदुवपुः॥ मुखमप्रका
शदशनंशनकैःसविलासहासमिवशक्रदिशः॥२६॥ नवचंद्रिकाकुसुमकीर्णतमःकवरी
भृतोमलयजार्द्रमिव॥ दहशेललाटतटहारिहरेर्हरितोमुखस्यहिमरश्मिदलं॥२७॥ कलयातुषा
रकिरणस्यपुरःपरिमंदभिन्नतिमिरौघजटं॥ क्षणमभ्यपद्यतजनैर्नमृषागगनंगणाधिपतिमू
र्त्तिरिति॥२८॥ प्रथमंकलाभवदथार्द्धमथोहिमदीधितिर्महदभूदुदितः॥ दधतिस्फुटंक्रमतए
वनतुप्रथितोजसोपिसहसोपचयं॥२९॥ उदमज्जिकैरभजितःशयनादपनिद्रपांडुरसरोजरुचा ३१
॥ प्रथमप्रबुद्धनदराजसुतावदनेंदुनेवतुहिनद्युतिना॥३०॥ अथलक्ष्मणानुगतकांतवपुर्ज

५१

माघ.

लधिंद्यतीत्यशशिदाशरथिः ॥ परिवारितः परितऋक्षगणैस्तिमिरौघराक्षसकुलंविभिदे ॥३१॥
उपजीवतिस्मसततंदधतः परिमुग्धतांवणिगिवोडुपतेः ॥ घनवीथिवीथिमवतीर्णवतोनि
धिरंभसामुपचयायकलाः ॥३२॥ रजनीमवाप्यरुचिमाप्यशशीसपदिव्यभूष्यदसावपितां ॥
अविलंवितक्रममहोमहतामितरेतरोपकृतिमच्चरितं ॥३३॥ दिवसंभृशोष्णरुचिपाददहतां
रुदतीमिवानवरतालिरुतैः ॥ मुकुरान्मृशन्मृगधरोग्रकरैरुदशिश्वसत्कुमुदिनीवनितां ॥३४॥
प्रतिकामिनीतिदहशुश्चकिताः स्मरजन्मघर्मपयसोपचिताः ॥ सुदृशोपि भर्तृशशिरश्मिगल
ज्जलविंदुमिंदुमणिदारुवधूः ॥३५॥ अमतद्भवैर्विदधदन्धदृशामपमार्गमोषधिपतिःस्वकरैः ॥
परितोविसर्पिपरितापिजनत्रपाश्रवपुषावतारयतिमानविषं ॥३६॥ अमलात्मसुप्रतिफलन्नु

प्रि३

५१

राम.

मितत्तरुणीकपोलफलकेषुमुकः॥ विससर्पसोद्भुततरमिंदुरुचामधिकावभासितदिशोनिकरः॥३७॥
उपगूढवेलमलघूर्मिभुजैःसरितामचुक्षुभदधीशमपि॥रजनीकरःकिमिवचित्रमदोयद्रागि
णांगणमनंगलघुं॥३८॥भवनोदरेषुप्रतिमंदतयाशयितोल[illegible]त्स्फटिकयष्टिमुखैः॥अ
वलंब्यजालकमुखोपगतानुदतिष्ठदिंदुकिरणान्मदः॥३९॥अविभावितेषुविषयःप्रथमंमद
नोपिनूनमभवत्तमसा॥ उदितेदिशःप्रकटयत्यमुनायदधर्मधाम्निधनुराचकृषे॥४०॥पुन
पद्विकाशमुदयाद्भ्रमितेशशिनःशिलीमुखगणोलभता॥द्रुतमेत्यपुष्पधनुषोधनुषःकुमुदा
नामनसिचावसरं॥४१॥ककुभांमुखानिसहसोर्ज्ज्वलयन्ददाकुलत्वमधिकंरतये॥अदिदीपदिं
दुरपरोदहनःकुसुमेषुमत्रिनयनप्रभवः॥४२॥इतिनिश्चित्यप्रियतमागतयःसितदीधितावुदित

मेक

वन्यवलाः॥ प्रतिकर्मकर्त्तुमुपचक्रमिरेसमयेहिसर्वमुपकारिकृतं॥४३॥ सममेवदधतुःसुतनोर्गु
रुहारभूषणमुरोजघटौ॥ घटतेहिसंघटहततयाजनितामिदमेवनिर्विवरतांदधतोः॥४४॥ कदली
प्रकांडरुचिरोरुतरौ जघनस्थलीपरिसरेमहति॥ रसनाकलापकगुणेनवधूर्मकरध्वजद्विरद
दमाकयत्॥४५॥ अधरेषुलक्तकरसःसुदृशां विशदंकपोलभुविलोध्ररजः॥ नवमंजनंनय
नपंकजयोर्विभिदेनशंखनिहितात्पयसः॥४६॥ स्फुरदुज्वलाधरदलेविलसद्दशनांशुकेस
रजैःपरितः॥ धृतमुग्धगंडफलकेव्यरुचच्चिकसन्निरास्यकुसुमेःप्रमदा॥४७॥ भजतेविदेशम
धिकेनजितस्तदनुप्रवेशमथवाकुशलः॥ मुखमिंदुरुज्वलकपोलमतःप्रतिमाछलेनसु
दृशामविशत्॥४८॥ ध्रुवमागताःप्रतिहतिंकठिनेमदनेषवःकुचतटेमहति॥ उतरांगवन्त्र

केमलैः

[illegible marginal note]

पदिदंगरिमस्थपितावलग्नमगमत्तनुतां॥४९॥नमनोरमास्वपि विशेषविदां निरचेष्टयोग्यमिद
मेतदिति॥ गृहमेष्यति प्रियतमे सुदृशां वसानांगरागसुमनःसुमनः॥५०॥वपुरन्वलिप्तपरिरंभसु
खव्यवधानभीरुकतयानवधूः॥ त्वममस्यवाढमिदमेवहियत्प्रियसंगमेष्वनवलेपदमः॥५१॥ नि
जपाणिपल्लवतटस्खलनादभिन्नासिकाविवरमुत्पतितैः॥ अपरापरीक्ष्यशनकैर्मुमुदे मुखवा
समास्यकमलश्वसनैः॥५२॥विधृते दिवा सवयसा वपुरःपरिपूर्णमंडलविकाशभृति॥ हिमधा
म्नि दर्पणतले च मुहुः स्वमुखश्रियं मृगदृशो ददृशुः॥५३॥अधिजानुबाहुमुपधायनमत्करपल्ल
वार्पितकपोलतलं॥ उदकंठिकं परिवर्तिकलस्वरषट्पदगानपरया ऽ परया॥५४॥प्रणयप्रका
शनविदो मधुरः सुतरामभीष्टजनचित्तहृतः॥ प्रतिघायकांतमनुमुग्धतरस्तरुणीजनोहृदयशः

हृतः १

५९ माघ१

वायसखीः ॥५५॥ नचमेवगछतियथालघुतांकरुणांयथाचकुरुतेसमयि ॥ निपुणेतथैवनमुप
गम्यंवदेरभिदूतिकाचिदितिसंदिदिशे ॥५६॥ दयितांमानपरयाऽपरयात्वरितंययावगदितापि
सखी ॥ किमुचोदिताःप्रियहितार्थकृतःकृतिनोभवंतिसुहृदःसुहृदां ॥५७॥ प्रतिभिद्यकांतम
पराधकृतंयदितावदस्यपुनरेवमया ॥ क्रियतेनुहन्निरुचितेषततः कलयेदमानमनसंसखिमां
॥५८॥ अवधीर्य्यधैर्य्यकलितादयितेविदधेविरोधमथतेनसह ॥ तवगोप्यतेकिमिवकर्तुमिदंन
सहासिमसाहसमसाहसिका ॥५९॥ तदुपेत्यमांप्रस्मितमुपालभथाननहिदोषमस्यकिलवि ५९
द्मवयं ॥ इतिसंप्रधार्य्यरमणायवधूर्विहितागसेपिविससर्जसखीं ॥६०॥ त्रिभिर्विशेषकं ॥ ननु राम
संदिशेतिसुदृसोदितयात्रपयानकिंचनकिलाभिदधे ॥ निजमेत्तिमिदमनिशंनिशितैःकृश

तंशरीरमशरीरिशरेः॥६१॥ब्रुवतेस्मइत्यउपसृत्यनरान्तरवन्यगत्स्वमतिगाभिर्गिरः॥सुरुदर्थमीहितम
२९ जिन्नधियांप्रकृतेर्विराजतिविरुद्धमपि॥६२॥ममनृपकीर्त्तिर्महरद्दियस्त्वदनुप्रसक्तहृदयेयमि
ति॥त्वयिमत्स्मरादिवनिरस्तदयःसुतरांक्षिणोतिखलुतांमदनः॥६३॥तवसाकथासुपरिध
ह्यतिश्रवणंयदंगुलिमुखेनमुहुः॥घनतांध्रुवंनयतितेनभवद्गुणपूगपूरितमतृप्तया॥६४॥
उपतप्यमानमलघूष्मभिःश्वसितैःसितेतरसरोजदृशः॥द्रवतांननेतुमधरेन्दुमतेनवनाग
वल्लिदलसांगरसैः॥६५॥दधतिस्फुटंरतिपतेरिषवःशिततांयदुत्पलपलाशदृशः॥हृदयंनि
रंतरवृहत्कठिनस्तनमंडलावरणमप्यभिदन्॥६६॥कुसुमादपिस्मितसरोजदृशःसुतरांसुकु
मारमंगमितिनापरथा॥अनिशंनिजेरकरुणःकरुणांकुसुमेषुरुत्तपतियद्धिशिखैः॥६७॥

कुसुमैः

श्वसनमर्यक्तहसिनिमग्नकुचद्वितयोन्नगाढमुपगूढवता॥ दयितेन तत्क्षणचलज्जघनाकलकिं
किणीरवमुदासि वधूः ॥७४॥ कररुद्धनीविदयितोपगतोल्लसितं त्वराविरहितासनया॥ हृता
हृष्टहाटकशिलासदृशस्फुरदूरुभित्तिवसनं ववसे ॥७५॥ पिदधानमन्यचयुगुंपगम्य दृशौ ब्रुवते ज
नेय वदकोयमिति॥ अभिधातुमध्यवससौ न गिरा पुलकैः प्रियं नववधून्यगदत् ॥७६॥ उदि
तोरुसाददमुतिवेपथुमत्कु दृशो भिन्नलदविधुरं त्रपया॥ वपुरादरातिशयशंसि पुरः प्रतिपत्तिमू
ढमपि वाढमभूत् ॥७७॥ परिमंथराभिरलघूरुभरादधिवेश्म पत्युरुपचारविधौ॥ स्खलिताभि
रप्यनुपदं प्रमदाः प्रणयातिभूमिमगमन्गतिभिः ॥७८॥ मधुरोन्नतभ्रुललितं च दृशोः सकचग्रये
गचतुरं च वचः॥ प्रकृतिस्थमेव निपुणागमितस्फुरणाय्यली लमैव सुतनोः ॥७९॥ तदभु

मेपि १ नि...१

त्कं मगतव विश्वसृजानहृतेप्यदीक्षणसहस्रतयं ॥ व्रकरीकृता जगति येन खलु स्फुटमिंद्रता
हामयि गोत्रभिदा ॥७९॥ [illegible] न विभावयत्यनिशमक्षिगतामपि मां भवा नतिसमीप
तया ॥ हृदयस्थितामपि पुनः परितः कथमीक्षते बहिरभीष्टतमां ॥८०॥ इति गां तुमिछुमेमिध
यपुरः क्षणाद्दृष्टिपात विहसद्वदनां ॥ स्वकरावलंबनविमुक्तगलत्कलकांचिकां चिदरुणात्तस
ताः ॥८२॥ त्रिभिर्विशेषकं ॥ अपयातिसरोषया निरस्तेकृतकं कामिनि चुचुंबे मृगाक्ष्या ॥ कल
यन्नपि सव्यथोवतस्थे शकुनेन स्खलितः किलैतरोपि ॥८३॥ आलोक्य प्रियतममंशुके वि
नीवी यत्तस्थे नमितमुखेंदुमानवत्या ॥ तन्नेनेपदमवलोकयां बभूवे मानस्य द्रुतमुदयानमी
स्थितस्य ॥८४॥ सुदृशः सरसव्यलीकतप्तस्तरसाश्लिष्टवतः सपौवनोष्मा ॥ कथमप्यभवत्स्म

रानलोष्मः स्तनभारो न नखंपचः प्रियस्य ॥८५॥ दधत्युरोजद्वयमुर्वशीतलं भुवो गतेवस्वय

मुर्वशीतलं ॥ वभौ मुखेनाप्रतिमेन काचन श्रियाधिकातां प्रतिमेन काचन ॥८६॥ इत्थंनारीर्घट

यितुमलं कामिभिः काममासन्प्रालेयांशोः सपदि रुचयः शांतमानांतरायाः ॥ आचार्य्य

त्वं रतिषु विकसन्मन्मथश्रीविलासा ह्रीप्रत्यूहप्रशमकुशलाः सीधवश्चक्रुरासां ॥८७॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये चंद्रोदयवर्णनं नाम नवमः सर्गः ॥९॥ सज्जितानि

सुरभीण्यथ यूनामुल्लसन्नयनवारिरुहाणि ॥ आपपुः सुघटितानि सुरायाः पात्रतां प्रि

यतमावदनानि ॥०१॥ सोपचारमुपशांतविचारं सानुतर्षमनुतर्षपदेन ॥ तैर्मुहूर्त्तमथ मूर्त्ते मुवानः २

मपीप्यन्प्रेममानमवधूतवधूस्वाः ॥०२॥ कांतकांतवदनप्रतिविंबे भग्नवालसहकारसुगंधौ

मघोष्विनं २

परिस्रुत्तदसुरा ... जेवु भ्रमरः पीतवर्णं चासीत ५ कश्यं क्रत्वं तथा मर्थे भैरेयं कापिशायनमिति वैजयंती १

स्वादुनिप्रणदितालिनिशीतेनिर्ववारमधुनींद्रियवर्गः॥३॥कापिशायनसुगंधिविघूर्ण
न्नुन्मदोधिशयितुंसमशेत॥फुल्लदृष्टिवदनेदयितानामब्जचारुचषकंचषडंघ्रिः॥४॥
विंवितंभृतपरिस्रुतिजानन्भाजनेजलजमित्यवलायाः॥घ्रातुमक्षिपततिभ्रमरःस्म
भ्रांतिभाजिभवतिक्वविवेकः॥५॥दत्तमिष्टतमयामधुपत्युर्वीक्ष्यमाणपिवतोरसवत्तां॥य
त्सुवर्णमुकुटांशुभिरासीच्चेतनाविरहितैरपिपीतं॥६॥स्वादनेनसुतनोरविचारादोष्ठतः
सममचरिष्टरसोत्र॥अन्यथान्यदिवपन्मधुनूनःस्वादुमिष्टमतनिष्टतदेव॥७॥विभ्रतोम
धुरतामतिमात्रंरागिभिर्युगपदेवपपाते॥आननैर्मधुरसोविकसद्भिर्नासिकाभिरसि
तोत्पलगंधः॥८॥पीतवत्यभिमतेमधुतुल्यस्वादुमोष्ठरुचकंविदिदंस्तो॥लभ्यतेस्मपरि

४ चेतनाविरहितैरचेतनैः सुवर्णमुकुटांशुभिरपि मधुनिप्रसृ ४ तैरिति भावः

स्वादुतां प्रियतां च ॥ मधुरं रसवत्स्वादु प्रियेषु मधुरोऽन्यवदिति विश्वः २

ति१

रक्ततयात्मायावकेनवियतापिप्रुवत्याः॥९॥कस्यचित्समदनंमदनीयप्रेयसीवदनपा
नपरस्य॥स्वादितःसहृदिवासवएवप्रत्युतक्षणविदंशपदेऽभूत्॥१०॥पीतसीधुमधुरैर्मिथु
नानामाननैःपरिहृतेचषकांतः॥व्रीडयाहृदिवलिविरावैर्नीलनीरजमगच्छदधस्ता
त्॥११॥प्रीतिभिर्त्रिसरकेणगतानांवक्रवाक्यरचनारमणीयः॥गूढसूचितरहस्यसहास्यःसु
भ्रुवांप्रववृतेपरिहासः॥१२॥हावहारिहसितंवचनानांकौशलंदृशिविकारविशेषाः॥च लं५
क्रिरेभृशमृजोरपिवध्वाःकामिनेवतरुणेनमदेन॥१३॥अप्रसन्नमपराद्धरिपत्यौकोप
दीप्तमुररीकृतधैर्यं॥क्षालितन्नुशमितन्नुवधूनांद्रावितन्नुहृदयंमधुवारैः॥१४॥संततेमव
चिरमप्रकृतत्वादप्रकाशितमदीद्युतदंगे॥विभ्रमंमधुमदःप्रमदानांधातुलीनमुपसर्गइवार्थं॥१५॥

सावशेषपदमुक्तमुपेक्षास्त्रस्तमाल्यवसनाभरणेषु ॥ गंतुमुत्थितमकारणतः स्मद्योतयंतिमदवि
भ्रममासां ॥१६॥ मध्यमेदविगलत्त्रपमीषच्चक्षुरुल्लसितपक्ष्ममदेन ॥ वीक्ष्यतेस्मशनकै
र्नववध्वाकामिनोमुखमधोमुखयेव ॥१७॥ याकथंचनसखीवचनेनप्रागभिप्रियतमं
प्रजगल्भे ॥ व्रीडजाड्यमनजन्मधुपास्तांस्वांमदात्प्रकृतिमेतिहिसर्वः ॥१८॥ छादितःकथम
पित्रपयांतर्थैः प्रियंप्रतिचिरायरमण्याः ॥ वारुणीमदविशंकमथाविश्चकारघोभवदसावि
वरागः ॥१९॥ आगतानगणितप्रतियाताच्चवल्लभानभिसिसारयिषूणां ॥ प्रापिचेतसिसविभ्र
तिसारेसुभ्रुवामवसरःसरकेरा ॥२०॥ मापुनस्तमभिसीसृमागस्कारिणांमदविमोहितचित्ता ॥ ६३
योषिदित्यभिललाषनहालांदुस्त्यजःखलुसुखादपिमानः ॥२१॥ कीविमोहमहरद्दयिता राम
नामेतिकंरतिसुखायनिनाय ॥ सप्रसादमितिसेवितमासीत्स्वाद्यएवफलदंमधुतासां ॥२२॥

दत्तमात्तमदनंदयितेनव्याप्तमातिशयिकेनरसेन॥ सस्वदेमुखसुरंप्रमदाभ्योनामरूपमपिचव्यु
दपादि॥२३॥ लब्धसौरभगुणोमदिराणामंगनास्यचषकस्यचगंधः॥ मोहितालिरितरेतरमोगाद
न्यतामभजतातिशयत्नुः॥२४॥ मानभंगपटुनासुरतेछांतचतापृथयताहृशिरागं॥ लेभिरेसख
दिभाववत्ततांतर्योषि [illegible] तःप्रापितेनवमदेन॥२५॥ मानधौतनवयावकपंकैसुभ्रुवोनि
भृतचुंवदत्ताः॥ प्रेयसामधररागरसेनस्वंकिलाधरमुपालिरंगुः॥२६॥ अर्पितंरसितवत्य
पिनामग्राहमन्यसुवतेदयितेन॥ उज्झतिस्मममदमप्यपिवंतीवीक्ष्यमद्यमपरायममाद॥२७॥
अन्ययान्यवनितागतचित्तंचित्तनाथमभिशंकितवत्या पीतभूरिसुरयापिनमेदेनिर्वृतिर्हिम
नसोमदहेतुः २८ कोपवत्यनुनयानगृहीत्वाप्रा [illegible] गा [illegible] योमदमदाहितमोहा कोपितंविरहरवेदि

चित्ताकांतमेवकलयंत्यनुनिन्ये ॥३०॥ कुर्वतामुकुलिताक्षियुगानामंगसादमवसादित
वाचां ॥ ईर्ष्ययेवहरताह्रियमासां तद्गुणः स्वयमकारिमदेन ॥३१॥ गंडभित्तिषुपुरासदृशी
षुव्याजिनांचिरदृश्यतप्रतिमेंदुः ॥ पानपादलितकांतिषुपश्चाल्लोध्रचूर्णतिलकाकृतिरा
सीत् ॥३२॥ उद्धतैरिवपरस्परसंगादीरितान्युभयतःकुचकुंभैः ॥ योषितामतिमदेनजुघूर्णु
र्विभ्रमाभिनवपुंषिवपूंषि ॥३२॥ चारुतावपुरभूषयदासांतामनूननवयौवनयोगः ॥
तंपुनर्मकरकेतनलक्ष्मीस्तांमदोदयितसंगतिरेनं ॥३३॥ क्षीवतामुपगतास्वनुवेलंतासुरो
षपरितोषवतीषु ॥ अग्रहीन्नुसशरंधनुरुज्झामासनक्षितनिषंगमनंगः ॥३४॥ शंकया
न्यप्लुवतोवनिताभिःर्दैत्यभेदिदयितःस्फुटमेव ॥ नक्षमंभवतितत्त्वे विचारेमत्सरे

ग३

णाहतसंहृतिविचेतः॥३५॥ आननैर्विचकसेहृषिताभिर्वल्लभानभितनूभिरभावि॥ आर्द्रतां
हृदयमापचरोषोलोलतिस्मवचनेषुवधूनां॥३६॥ रूपमप्रतिविधानमनोज्ञंप्रेमकार्य्य
मनपेक्ष्यविकाशि॥ चाटुचारुकृतकसंभ्रममासांकार्मणत्वमगमद्रमणेषु॥३७॥ लीलयैववसु
तनोस्तुलयित्वागौरवाद्गुमपिलाघवनीकेन॥ मानवंचनविदावचनेनक्रीतमेवहृदयं
दयितस्य॥३८॥ स्पर्शभाजिविशदच्छविचारौकल्पितेस्मगृहदर्शांसुरताय॥ सन्नतिंदधतिपे
त६ तुरजस्रंदृष्टयःप्रियमेशयनेच॥३९॥ रूनिरागतरलैरपितिर्य्यक्पातिभिःकृतिगुणानकु
तस्य॥ दीर्घदर्शिभिरकारिवधूनांलंघनंननयनैःश्रवणस्य॥४०॥ संकथेच्छुरभिधातु
मनीशासंमुखीनचवभूवदिदृक्षुः॥ स्पर्शनेनदयितस्यनतभ्रूरंगसंगचपलापिचकंपे॥४१॥

उत्तरीयविनयात्त्रपमाणारुंधतीकिलतदीक्षणमार्गं॥आवरिष्टविकटेनविवोढुर्वक्ष
सैवकुचमंडलमन्या॥४२॥श्रेशुकेहृतवलात्तनुबाहुस्वस्तिकापिहितमुग्धकुचाग्रा॥
भिन्नशंखवलयंपरिणेत्रापर्यरंभिरभसादचिरोढा॥४३॥सैजहारसहसापरिरब्धप्रेय
सीक्षुविरहव्यविरोधं॥संहितंरतिपतेःस्मितभिन्नक्रोधमाप्लुतसाश्रुमहेषु॥४४॥श्लेसमान
मुपयंतरिवद्धाःश्लिष्टवत्युपसपत्निरसेन॥आत्मनैवरुरुधेकृतिनेवस्वेदसंगिवसनंजघ
नेन॥४५॥पीडितेपुरउरःप्रतिपेषंभर्तरिस्तनयुगेनयुवत्याः॥स्पष्टमेवद तःप्रति ल६
नार्यास्तन्मयत्वमभवद्धृदयस्य॥४६॥दीपितस्मरमुरस्यपपीडंवल्लभेघनमभिघ ६५
जमाने॥वक्रतांनयपतुःकुचकुंभौसुभ्रुवःकठिनतातिशयेन॥४७॥संप्रवेष्टुमिवयोषित राम

६१ मीक्षुः श्लिष्यतां हृदयमिष्टतमानां ॥ आत्मनः सततमेव तदंतर्वर्त्तिनो न खलु नूनमजानन् ॥४८॥
स्नेहनिर्भरमधत्त वधूनामार्द्रतां वपुरसंशयमंतः ॥ दूनिगाढपरिरंभणि वस्त्रक्नोपमंबुबु
धेयदनेन ॥४९॥ न स्म मातिवपुषः प्रमदानामंतरिष्टतमसंगमजन्मा ॥ यद्बहुर्वहिरवा
प्यविकाशं व्यानशे तनुरुहाग्रपपिहर्षः ॥५०॥ प्राप्तप्रियव्यतिकरा· स्त्रमदानामंगजेन पु
लकेन वद्रूवे ॥ प्रापिते न भृशमुच्छ्वसिताभिर्नीविभिः सपदि वंधनमोक्षः ॥५१॥ ह्रीभरा
दवनतं परिरंभे रागवानवटुजेष्ववहृच्छ ॥ अर्पितोष्ठदलमाननपद्मं योषितो मुकुलित
क्षमधासीत् ॥५२॥ पल्लवोपमितिसाम्यसपक्षं दृष्टवत्यधरविंबमभीष्टे ॥ पर्य्यकूजिस
रुजेव तरुण्यास्तारलोलवलयेन करेण ॥५३॥ केनचिन्मधुरमुल्वणरागं वाष्पतप्तमधिके
नै१

६६

माघ॰

विरहेषु॥ उत्पल्लवमपास्यमुकुलंसुभ्रुवःससमद्दिचुचुंबे॥५४॥ रेचितंपरिजनेनमहीयःकेवला
भिरतदपतिधाम॥ साम्यमापकमलासखविघ्नकुसेनसेवितनुगांतपयोधेः॥५५॥ आवृतान्य
पिनिरंतरमुच्चैर्योषितामुरसिजद्वितयेन॥ रागिणामितउतोविमृशद्भिःपाणिभिर्जग्रहिरेङ्गद
यानि॥५६॥ कामिनामसकलाभिविभुग्नैःस्वेदवारिमृदुभिःकरजाग्रैः॥ अक्रियंतकठिनेषु
कथंचित्कामिनीकुचतटेषुपदानि॥५७॥ सोष्मणस्तनशिलाशिखरायाद्दात्तधर्मसलिलैस्त
रुणानां॥ उच्छ्वसत्कमलचारुषुहस्तैर्निम्ननाभिसरसीषुनिपेते॥५८॥ आमृशद्भिरभि ६६
तोवलिवीचीर्लोलमानविततांगुलिहस्तैः॥ सुभ्रुवामनुभवात्प्रतिपेदेमुष्टिमेयमिति राम॰
मध्यमभीष्टैः॥५९॥ प्राप्यनाभिह्रदमज्जनमाशुप्रस्थितंनिवसनग्रहणाय॥ औपनीविक

मरुद्धकिलस्त्रीवल्लभस्यकरमात्मकराभ्यां॥६०॥कामिनःकृतरतोत्सवकालक्षेपमाकु
लवधूकरसंगि॥मेखलागुणविलग्नमस्यांदीर्घसूत्रमकरोत्परिधानं॥६१॥स्वेदवारिविन
यतःप्रियपाणेर्योषितश्चकरयोःकलहस्य॥वारणामिववविधातुमभीक्ष्णंकक्षयाचवलये
श्वासिसिंजे॥६२॥ग्रंथिमुद्ग्रथयितुंहृदयेशेवाससःस्पृशतिमानधनायाः॥भ्रूयुगेनस
पदिप्रतिपेदेरोमभिश्चसममेवविभेदः॥६३॥आहुलंघितवतीष्टकराग्रेनीविमर्द्धमुकुली
कृतदृष्ट्या॥रक्तवैणिकहताधरतंत्रीमंडलक्कणितचारुचुकूजे॥६४॥आयतांगुलिरभू
दतिरिक्तःसुभ्रुवांकृशिमशालिनिमध्ये॥श्रोणिषुप्रियकरःपृथुलासुस्पर्शमापसक
लेनतलेन॥६५॥चक्षुरेखललतारुसुराजीःस्पर्शलोभवशलोलकराणां॥कामिना।मसि

नौ १

हितान्यपिरं भास्त्तं भकोमलतरेषुनखानि ॥६६॥ ऊरुमूलचपलेक्षणमन्ध्रं चैर्वतंसुकुसुमैः
प्रियमेताः ॥ चक्रिरेसपदिताभिर्यथार्थंमन्मथस्यकुसुमायुधनाम ॥६७॥ धैर्यमुल्वण
मनोभवभावावामतांचवपुर्पितवत्यः ॥ व्रीडितंललितसोरतधार्ष्ट्यास्तेनितंभिरुचितेषु
तरुणाय: ॥६८॥ पाणिरोधमनिरोधितवांछंभर्त्सनाश्चमधुरस्मितगर्भाः ॥ कामिनस्मकुरु
तेकरभोरूर्हारिशुष्क रुदितंचसुखेपि ॥६९॥ वारणार्थपदगद्गदवाचामीर्ष्ययामुहुरुपत्रप
याच ॥ कुर्वतेस्मसुदृशामनुकूलंप्रातिकूलिकतयेवयुवानः ॥७०॥ अन्यकालपरिहार्य्यम
जस्त्रंतद्द्वयेनविदधेद्वयमेव ॥ धृष्टतारहसिभर्तृषुताभिर्निर्दयत्वमितरैरबलासु ॥७१॥ वाक्र
पीडनकचग्रहणाभ्यांव्याहतेननखदंतनिपातैः ॥ बोधितस्तनुशयस्तरुणीनामुन्मि

मीलविशिखं विषमेषुः ॥७२॥ कांतया सपदि कोप्युपगूढः प्रौढपाणिरपनेतुमियेष ॥ संहतस्तन
तिरस्कृतदृष्टिर्भ्रष्टमेव न दुकूलमपश्यत् ॥७३॥ आहतं कुचतटेन तरुण्याः साधु सोढममुनेति मणितं रतिकूजितं =२
तिपपात ॥ त्रुट्यतः प्रियतमोरसि हारात्पुष्पवृष्टिरिव मौक्तिकवृष्टिः ॥७४॥ सीत्कृतानि मणि
तं करुणोक्तिः स्निग्धमुक्तमलमर्थवचांसि ॥ हासभूषणरवाश्च रमण्याः कामसूत्रपदतामु
पजग्मुः ॥७५॥ उद्धतैर्निभृतमेकमनेकैश्छेदवन्मृगदृशामविरामैः ॥ श्रूयते स्म मणितं कलकां
चीनूपुरध्वनिभिरक्षतमेव ॥७६॥ ईदृशस्य भवतः कथमेतल्लाघवं मुहुरितीव रतेषु ॥ क्षिप्त
मायतमदर्शयदुर्व्यां कांचिदामजघनस्य महत्त्वं ॥७७॥ प्राप्यते स्म गतचित्रकचित्रैश्चित्रमार्द्र
नखलक्ष्म कपोलैः ॥ दध्रिरे च रभसच्युतमाल्याः स्वेदबिंदुकुसुमान्यलकांताः ॥७८॥ यद्यदे
वरुरुचे रुचितेभ्यः सुभ्रुवो रहसि तत्तदकुर्वन् ॥ आनुकूलिकतया हि नराणामाक्षिपंति हृदया

३स

विरमापुः॥७९॥ प्राप्यमन्मथरसादतिभूमिंदुर्वहस्तनभराःसुरतस्य॥ शश्रमुःश्रमजलार्द्रलला
टश्लिष्टकेशमसितायतकेश्यः॥८०॥ संगताभिरुचितैस्खलितापिप्रागमुच्यतचिरेणसखीव॥
भूयएवसमगंस्ततरंतांतेह्रीविधुभिरहाविरहस्य॥८१॥ प्रेक्षणीयकमिवक्षणमासन्ह्रीविभे
गुरविलोचनपाताः॥ संभ्रमद्रुतगृहीतदुकूलछाद्यमानवपुषःसुरतांताः॥८२॥ त्रत्रभूतमत
नीयसितच्छीकोचिधान्निपिहितैकतरोरुः॥ क्षौममाकुलकराविचकर्षक्रांतपल्लवमभीष्टत
मेन॥८३॥ मृष्टचंदनविशेषकभक्तिर्भ्रष्टभूषणकदर्थितमाल्यः॥ सापराधइवमंडनमासी
दात्मनैवसुदृशामुपभोगः॥८४॥ योषितःपतितकांचनकांचौमोहनातिरभसेननितंबे॥
मेखलेवपरितःस्मविचित्राराजतेनवनखक्षतलक्ष्मीः॥८५॥ भातुनामसुदृशांदशनांकःप

५२ टलो धवलगंडतलेषु ॥ दंतवाससि समानगुणश्रीः संमुखोपि परभागमवाप ॥८६॥ सुभ्रुवा
मधिगेयाधरपीठं पीडिते स्फुरितवत्यपि पेतुः ॥ मुक्तमौक्तिकलघुर्गुणशेषा हारयष्टिरत्नवकुरुरेव ॥८७
विश्रमार्थमुपगूढमजस्रं यत्प्रियैः प्रथमरत्यवसाने ॥ योषितामुदितमन्मथमादौ तद्द्वितीयसु
रतस्य बभूव ॥८८॥ आस्तृतेभिनवपल्लवपुष्पैरप्यनारततरतारभिरताभ्यः ॥ दीयते स्म शयितुं श
यनीयेन क्षणः क्षणदयापि वधूभ्यः ॥८९॥ योषितामतिरतात्ररवलनं गात्रमुज्ज्वलतयानख
लूनं ॥ क्षोभमाशु हृदयं नयदूनां रागवृद्धिमकरोन्नयदूनां ॥९०॥ इति मदमदनाभ्यां रागिणः
स्पष्टरागाननवरततरतश्रीसंगिनस्तानवेक्ष्य ॥ त्रिभजॆ परिवृत्तिं साथ पर्यस्तहस्ता रजनिरवनतें
दुर्लज्जयाधोमुखीव ॥९१॥ इति श्रीशिशुपालवधे महाकाव्ये मधुपानवर्णनं नाम दशमः सर्गः ॥१०॥

श्रुतिसमधिकमुच्चैः पंचमंपीडयंतः सततमृषभहीनंभिन्नकीकृत्यषड्जं ॥ प्रणिजगदुरकाकुश्राव
कस्निग्धकंठाः परिणतिमितिरात्रेर्मागधामाधवाय ॥१॥ रतिरभसविलासाभ्यासतांतंनया
वन्नयनयुगममीलत्तावदेवाहतोसौ ॥ रजनिविरतिशंसीकामिनीनांभविष्यद्विरहविहितनि
द्राभंगमुच्चैर्मृदंगः ॥२॥ स्फुटतरमुपरिष्टादल्पमूर्तेर्ध्रुवस्यस्फुरतिसुरमुनीनांमंडलंव्यस्तमि
तत् ॥ शकटमिवमहीयःशैशवेशार्ङ्गपाणेश्चपलचरणकाव्यप्रेरणोत्तुंगितांग्रं ॥३॥ प्रहरकम
लनीयंस्वंनिदिद्रासतोच्चैः प्रतिपदमुपहूतः केनचिज्जागृहीति ॥ मुहुरविशदवर्णांनिद्रयाशू
न्यशून्यांददद्पिगिरमंतर्बुध्यतेनोमनुष्यः ॥४॥ विपुलतरनितंबाभोगरुद्धेरमण्याः शयितुम
नधिगच्छन्जीवितेशोवकाशं ॥ रतिपरिचयनश्यन्नैद्रतंद्रः कथंचिद्गमयतिशयनीयेशर्वरीं किं

करोतु।।५।। क्षणशयितविबुद्धाः कल्पयंतः प्रयोगानुदधिमहतिराज्ये काव्यवद्दुर्विगाहे।।गहन
मपररात्रप्राप्तबुद्धिप्रसादाः कवयइवमहीपाश्चिंतयंत्यर्थजातं।।६।। क्षितितरशयनीतादुत्थि
तैर्दानपंकक्लुतबहलशरीरं शाययत्येषभूयः।। मृदुचलदपरांतोदीरितांदूनिनादं गज
पतिमधिरोहः पस्त्यकव्यत्ययेन।।७।। द्रुततरकरदक्षाः क्षिप्तवैशाखशैले दधतिदधनिधी
रानारवान्वारिणीव।। शशिनमिवसुरौघाः सारमुद्धर्तुमेते कलशिमुदधिगुर्वीं वल्लवालो
डयंति।।०८।। अनुनयमगृहीत्वाव्याजसुप्तापराचीकृतमथचक्रवाकोस्तारमाकर्ण्यकल्ये।।
कथमपिपरिवृत्तानिद्रयांधाकिलस्त्रीमुकुलितनयनैवश्लिष्यतिप्राणनाथं।।०९।। गतमनु
गतवीणै^तांवेणुनादैः कलमविकलतालंगायनैर्बोधहेतोः।। असकृत्कलवरवलमुरवरागो
^दनवगीतंगीतमा

रेक

७०
माघ

कर्णायेताः सुखमुकलितनेत्रा यांति निद्रां नरेंद्राः ॥१०॥ परिशिथिलितकर्णग्रीवमामीलिता
क्षः क्षणमयमनुभूय स्वप्नमूर्द्धज्ञुरेव ॥ रिरसयिषति भूयः शष्पमग्रे विकीर्णं पटुतरचपलोष्ठः प्र
स्फुरत्प्रोथमश्वः ॥११॥ उदयमुदितदीप्तिर्याति यः संगतौ मे पतति न वरमिंदुः सोपरमेषगत्वा ॥
स्मितरुचिरिव सद्यः सभ्यसूयंप्रभेति स्फुरति विशदमेषा पूर्वकाष्ठांगनायाः ॥१२॥ चिररतप
रिखेदप्राप्तनिद्रासुखानां चरममपि शयित्वा पूर्वमेव प्रबुद्धाः ॥ अपरिचलितगात्राः कुर्वते
न प्रियाणामशिथिलभुजचक्राश्लेषभेदं तरुण्यः ॥१३॥ कृतधवलिमभेदैः कुंकुमैव किंचि नै६
न्मलयरुहरजोभिर्भूषयन्पश्चिमाशां ॥ हिमरुचिररुणिम्ना राजते रज्यमानैर्जरठकमलकंदछे ७१
दगौरैर्मयूखैः ॥१४॥ दधदसकलमेकं खंडितामानमद्भिः श्रियमपरमपूर्णामुछ्वसद्भिः रम०

१२४

पलाशैः ।। कलमुपगीतैःषट्पदौघेनधत्तः कुमुदकमलखंडे तुल्यरूपामवस्थां ।।१५।। मदरुचि
मरुचिमरुणो नीरुद्धछतालंभितस्यात्यजतश्चचिरायस्थायिनीमाशुलज्जां ।। वसनमिवमुखस्य
स्रंसते संप्रतीदं सितकरकरजालं वासवाशाप्लुवत्याः ।।१६।। अविरतरतलीलायासजातश्रमाणा
मुपशममुपयातं निःसहैरंगणानां ।। पुनरुषसि विविक्तैर्मातरिश्वावचूर्ण्य ज्वलयति मदना
ग्निं मालतीनां रजोभिः ।।१७।। अनिमिषमविरामारागिणां सर्वरात्रं नवनिधुवनलीलाः कौतु
केनाभिवीक्ष्य ।। शदमुदवसितानामस्फुटालोकसंपन्नयनमिवसनिद्रं घूर्णते दीपमर्च्चिः ।।१८।।
विकचकमलगंधैरंधयन्भृंगमालाः सुरभितमकरंदं मंदमावातिवातः ।। प्रमदमूनमाद्यद्योव
नोद्दामरामारमणरभसखेदस्वेदविच्छेददक्षः ।।१९।। लुलितनयनताराः क्षामवक्त्रेंदुबिंबा

द्दा

७१ नय१
रजःस्वनिद्राक्रांतनीलोत्पलास्त्यां ॥ तिमिरमिवदधानाःस्रंसिनःकेशपाशानवनिपति
माघ० गृहेभ्योयांत्यमूर्वारवध्वः ॥२०॥ शिशिरकिरणकांतंवासरांतेभिसार्यश्वसनसुरभिगंधिः
सांप्रतंसत्वरेव ॥ व्रजतिरजनिरेषातन्मयूखांगरागैःपरिमलितमनिंद्यैरंवरांतंवहंती ॥२१॥
नवकुमुदवनश्रीहासकेलिप्रसंगादधिकरुचिरशेषामप्युषांजागरित्वा ॥ अयमपरदि
शांकेमुंचतिस्रस्तहस्तःशिशयिषुरिवपांडुम्लानमात्मानमिंदुः ॥२२॥ सरभसपरिरंभारंभ ७१
संरंभभाजोयदधिनिशमपास्तंवल्लभेनांगनायाः ॥ वसनमपिनिशांतेनेष्यतेतत्प्रदातुं राम०
रथचरणविशालश्रोणिलोलेक्षणेन ॥२३॥ सपदिकुमुदिनीभिर्मीलितंहाक्षपापिक्ष
यमगमदपेतास्तारकास्ताःसमस्ताः ॥ इतिदयितकलत्रश्चिंतयन्नंगमिंदुर्वहतिकृशम

शोषं भ्रष्टशोभं शुचेव ॥२४॥ व्रजति विषयमक्ष्णामंशुमालीनयावत्तिमिरमखिलमस्तं ताव
देवारुणेन ॥ परपरिभवितेजस्तन्वतामाशुकर्त्तुं प्रभवति हि विपक्षोच्छेदमग्रेसरोपि ॥२५
॥ विगततिमिरपंकं पश्यति व्योम यावद्धुवति विरहखिन्नः पक्षती यावदेव ॥ रथचरणस
माह्वस्तावदौत्सुक्यनुन्नासरिदपरतटांतादागता चक्रवाकी ॥२६॥ मुदि तयुवमनस्कास्तु
ल्यमेव प्रदोषे रुचमदधुरुभय्यः कल्पिता भूषिताश्च ॥ परिमलरुचिराभिर्न्यक्कृतास्तु प्रभा
ते युवतिभिरुपभोगान्नीरुचः पुष्पमालाः ॥२७॥ विलुलितकमलौघः कीर्णवल्लीवितानः
प्रतिवनमवधूताशेषशाखिप्रसूनः ॥ क्वचिदयमनवस्थः स्थास्नु तामेति वायुर्मधुकुसु
मविमर्द्दैरूंधिवेश्मांतरेषु ॥२८॥ नखपदवलिनाभीसंधिभागेषु लक्ष्यः क्षतिषु च दशनानां

त्रावर

७२ मंगनायाःसशेषः॥ अपिरहसिकृतानां वाग्मिहीनोपिजातःसुरतविलसितानांवर्णकोव
माघ० र्णकोसौ॥२९॥ प्रकटमलिनलक्ष्माम्रष्टपात्रांगुलीकैरधिगतरतिशोभैःप्रत्युषःप्रोषित
श्रीः॥ उपहसितइवासौचंद्रमाःकामिनीनांपरिणतशरकांडापांडुभिर्गंडभागैः॥३०॥ सक
लमपिनिकामंकामलोलान्यनारीरतिरभसविमर्दैर्भिन्नवत्पांगरागे॥ इदमतिमहदेवाश्च
र्यमाश्चर्यधाम्नस्तववरवलुमुषंरागोयन्नभेदंप्रयातः॥३१॥ प्रकटतरमिमंमाज्ञात्कुरन्यार
मणपःस्फुटमितिसविशंकंकांतयातुल्यवर्णाः॥ चरणतलसरोजाक्रांतिसंक्रांतयासौव ७२॥
पुषिनखविलेखोलाक्षयारक्षितस्ते॥३२॥ तदवितथमवादीर्यन्ममत्वंप्रियेतिप्रियजनपरिभु राम०
क्तंयद्दुकूलंदधानः॥ मदधिवसतिमागाःकामिनांमंडनश्रीर्व्रजतिहिसफलत्वंवल्लभालोकनेन॥३३

५८

नवनखपदमंगंगोपयस्यंशुकेनस्थगयतिमुहुरोष्टंपाणिनादंतदष्टं॥ प्रतिदिशमपरस्त्रीसंग
शंसीविसर्पन्नवपरिमलगंधःकेनशक्योवरीतुं॥३४॥ इतिकृतवचनायाःकश्चिदभेत्य
विभ्यस्खलितनयनवारेर्यातिपादावनामं॥ करुणमपिसमर्थंमानिनांमानभेदेरुदितमुदि
तमस्त्रंयोषितांविग्रहेषु॥३५॥ इतिकृतवचनायाः॥कुलकं॥ मदमदनविकाशस्पाष्टधार्ष्योद
यानांरतिकलविकीर्णैर्भूषणैरर्चितेषु॥ विदधतिनगृहेषूत्फुल्लपुष्पोपहारंविफलविनय
यत्नाःकामिनीनांवयस्याः॥३६॥ करजदशनचिह्नंनैशमन्यांगनारीजनितमतिसरोषा
मीर्ष्ययाशंकमानां॥ स्मरसिनखलुदत्तंमत्तयैतत्त्वयैवक्षिप्रमनुनयतीत्थंव्रीडमानोविलासी॥
३७॥ कृतगुरुतरहारछेदमालिंगनपत्योपरिशिथिलितगात्रेगंतुमापृच्छमाने॥ विगलितन

७३ वमुक्तास्थूलवाष्पांवुविंदुस्तनयुगमवलायास्तत्क्षणंरोदितीव ॥३८॥ वकुजगदुरस्ताञ्चस्यमत्ता
माघ० किलाहंचकरचकिलचाटु प्रौढयोषिद्वदस्य ॥ विदितमितिसखीभ्योरात्रिवृत्तंविचिंत्यव्यपग
तमदयाक्लिष्टक्रीडितंमुग्धवध्वा ॥३९॥ अरुणजलजराजीमुग्धहस्ताग्रपादावहुलमधुपमाला
कज्जलेंदीवराक्षी ॥ अनुपततिविरावैःपत्रिणांव्याहरंतीरजनिमचिरजातापूर्वसंध्यासुतेव ॥४०॥
५२ प्रतिशरणमशीर्णज्योतिरग्न्याहितानांविधिविहितविरिब्धैःसामिधेनीरधीत्य ॥ कृतगुरु
रितौघध्वंसमध्वर्युवर्यैर्हुतमयमवलीढेसाधुसान्नाय्यमग्निः ॥४१॥ प्रकृतजपविधीनामा ७३
स्रमुद्भिदंतंमुहुरपिहितमोसैरच्चैरलंलक्ष्यमन्यैः ॥ अनुकृतिमनुवेलंघात्दितोद्वहतस्यव्र रामे०
जतिनियमभाजांमुग्धमुक्तापुटस्य ॥४२॥ नवकनकपिशंगंवासराणांविधातुःककुभिकु

लिशपाणोर्भातिभासांविताने॥ जनितभुवनदाहारंभमंभासिदग्धाचलितमिवमहाब्धेरूर्ध्वमौर्वा
नलार्चिः॥४३॥ विततपृथुवरत्रातुल्यरूपैर्मयूखैः कलशइवगरीयान्दिग्भिराकृष्यमाणः॥
कृतचपलविहंगालापकोलाहलाभिर्जलनिधिजलमध्यादेषउत्तार्यतेऽर्कः॥४४॥ पयसिसलि
लराशेर्नक्तमंतर्निमग्नःस्फुटमनिशमतापिज्वालयावाडवाग्नेः॥ यदयमिदमिदानीमंगमुग्ध
नूर्दधातिज्वलितखदिरकाष्ठांगारगौरंविवस्वान्॥४५॥ अलतुहिनरुचिनासौकेवलंनोदया
द्रिःक्षणामुपरिगतेनक्ष्माभृतःसर्वएव॥ नवकरनिकरेणस्पष्टबंधूकसूनस्तवकरचितमे
तेशेखरंविभ्रतीव॥४६॥ उदयशिखरिशृंगप्रांगणेष्वेषरिंगन्सकमलमुखहासंवीक्षि
तःपद्मिनीभिः॥ विततमृदुकराग्रःशब्दयंत्यावयोभिःपरिपततिदिवोंकेहेलयाबालसूर्यः॥४७॥
ते१

ह्णामयमुपविष्टः क्ष्मातलन्यस्तपादः प्रणतिपरमवेक्ष्य प्रीतमह्नाय लोकं॥ भुवनतलमशेषं प्र
त्यवेक्षिष्यमाणः क्षितिधरतलपीठादुत्थितः सप्तसप्तिः॥४८॥ परिणतमदिराभं भास्करेणांशु
बाणैस्तिमिरकरिघटायाः सर्वदिक्षु क्षतायाः॥ रुधिरमिव वहंत्यो भांति बालातपेन छुरितमुभय
रोधो वारितं वारि नद्यः॥४९॥ दधति परिपतंत्यो जालवातायनेभ्यस्तरुणतपनभासो मंदिराभ्यं
तरेषु॥ प्रणयिषु वनितानां प्रातरिच्छत्सु गंतुं कुपितमदनमुक्तोत्तप्तनाराचलीलां॥५०॥ अ
धरजनि वधूभिः पीतमैरेयरिक्तं कनकचषकमेतद्रोचनालोहितेन॥ उदयदहिमरोचिर्ज्यो
तिषाक्रांतमंतर्मधुन इव तथैवापूर्णमद्यापि भाति॥५१॥ सितरुचि शयनीये नक्रमेकांतमुक्तं
दिनकरकरसंगव्यक्तकौसुंभकांति॥ निजमिति रतिबंधोर्जानती मुत्तरीयं परिहसति सखीस्त्री

मादधानांदिनादौ॥५२॥ क्षतमिवशिशिरांशोरंशुभिर्यन्निशासुस्फटिकमयमराजद्राजताद्रि
स्थलाभं॥ अरुणितमकठोरैर्वेश्मकाश्मीरजांभःस्नपितमिवतदेतद्भानुभिर्भातिभानोः॥५३॥
सरसनखपदांतर्लग्नकेशप्रमोकंप्रणयिनिविदधानेयोषितामुल्लसंत्यः॥ विदधतिद
शनानांसीत्कृताविःकृतानामभिनवविभासःपद्मरागानुकारं॥५४॥ अविरतदयितां
गासंगसंचारितेनछुरितमभिनवासृक्कांतिनाकुंकुमेन॥ क[illegible]नकनिकषलेखाकोमलीका
मिनीनांभवतिवपुरवाप्तच्छायमेवातपेपि॥५५॥ सरसिजवनकांतिंबिभ्रदभ्रांतवृत्तिःकरनय
नसहस्रंहेलयालोकशंकैः॥ अखिलमतिमहिम्नालोकमाक्रांतवंतंहरिरिवहरिदश्वोतम
स्तंहिनस्ति॥५६॥ अवतमसभिदापोभास्वताभ्युद्यतेनप्रसभमुडुगणोसौदर्शनीयोप्यपास्तः॥
साधुवृत्तं हिः

७५ निरसितुमरिमिच्छोर्यैतदीयाश्रयेनश्रियमधिगतवंतस्तेपिहंतव्यपक्षे॥५७॥प्रतिफलतिकरौ
माघ° घैसंमुखावस्थितायांरजतकटकभित्तौसांद्रचंद्रांशुगौर्य्यां॥वहिरभिहतमंदैःसंहतंकंदरां
तर्गतमपितिमिरौघैर्घर्मभानुर्भिनत्ति॥५८॥वहिरपिविलसंत्यःकामबान्नियैरप्यह्निवस्तक
सं ४ रत्नुचैस्तैर्ध्वांतमंतर्गृहेषु॥नियतविषयवृत्तेरप्यनल्पप्रतापक्षतसकलविपक्षस्तेजसःसत्त्वभा
वः॥५९॥चिरमतिरसलोल्याद्बंधनंलंभितानांपुनरयमुदयायप्राप्यधामस्वमेव॥दलितद
लकपाटःषट्पदानांसरोजेसरभसइववगुप्तिस्फोटमर्कःकरोति॥६०॥युगपदयुगसप्तिस्तुल्य ७५
संख्यैर्मयूखैर्दशशतदलभेदंकौतुकेनाशुकृत्वा॥श्रियमलिकुलगीतैर्लालितां[illegible]पंक राम°
जांतर्भवनमधिशयानामादरात्पश्यतीव॥६१॥उदयमिवकराग्रैरेषनिःपीड्यसद्यःशश

धरमहराद्रौरागवानुष्णरश्मिः॥ अवकिरतिनितांतंकांतिनिर्यासमच्छक्षतनवजलपांडुपुंड
रीकोदरेषु॥६२॥प्रविकसतिचिरायद्योतिताशेषलोकेदशशतकरमूर्त्तौवह्निणाविह्नितीये॥
सितरुचिवपुषासौलक्ष्यतेसंप्रतिद्योर्विगलितकिरणेनच्छिंगितैकेक्षणेव॥६३॥कुमुदवन
मपश्रिश्रीमदंभोजखंडंत्यजतिमुदमुलूकःप्रीतिमांश्चक्रवाकः॥ उदयमहिमरश्मिर्यातिशी
सितांशुरस्तंहतविधिलसितानांहीविचित्रोविपाकः॥६४॥क्षणमतुहिनधाम्निप्रोष्य
भूयःपुरस्तादुपगतवतिपाणिग्राहवद्दिग्वधूनां॥द्रुततरमुपयातिस्रंसमानांशुकोसा
वुपपतिरिवनीचैःपश्चिमांतेनचंद्रः॥६५॥प्रलयमखिलतारालोकमह्नायनीत्वाश्रि
यमनतिशयश्रीःसानुरागांदधानः॥गगनसलिलराशिंरात्रिकल्पावसानेमधुरिपुरि

व भास्वानिहसएकोधिशेते ॥६६॥ कृतसकलजगद्विबोधोविधूतांधकारोदयःक्षपितकुमुदतारा
काश्रीर्वियोगंनयन्कामिनः॥ गुरुतरगुणदर्शनादभ्युपेताल्पदोषःकृतीतववरदकरोतुसु
प्रातमह्नामयंनायकः॥६७॥इतिश्रीशिशुपालवधेमहाकाव्येमाघकृतौप्रत्यूषवर्णनंनामएका
दशःसर्गः॥११॥इत्थंरथाश्वेभनिषादिनांप्रगेगणोनृपाणामथतोरणाद्बहिः। प्रस्थान
कालक्षमवेशकल्पनाकृतक्षणक्षेपमुदैक्षताच्युतं॥१॥ स्वच्छंसुपत्रंकनकोज्वल
द्युतिंजवेननागान्जितवंतमुच्चकैः॥ आरुह्यतार्क्ष्यंनभसीवभूतलेययावनुद्घातसुखेन
सोध्वना॥२॥ हस्तस्थिताखंडितचक्रशालिनोद्विजेंद्रकांताःश्रितवक्षसःश्रिया॥सत्यानुरक्तंनर
कस्यजिष्णवोगुणैर्नृपाःशार्ङ्गिणमन्वयासिषुः॥३॥ शुक्लैःसतारैर्मुकुलीकृतैःस्थुलैःकुमुद्वती

नांकुमुदाकरैरिव॥ चतुःसंप्रयाणांचवि[illegible]योगवेदनाविदूननारीकमनत्वसमंसदा॥४॥ उच्चि
स्नगात्रःस्मविडंवयन्नभःसमुत्पतिष्यंतमगेंद्रमुच्चकैः॥ आकुंचितप्रोहनिरूपितक्रमंक
रेणुरारोढयतेनिषादिने॥५॥ स्वैरंकृतास्फालनलालितान्खुरःस्फुरत्तनूत्वदर्शितलाघवक्रि
याः॥ वंकावलग्नैकसवल्गपाणयस्तुरंगमंनारुरुहुस्तुरंगिणः॥६॥ अश्नाययावक्त्रचकार
नूपसेनिषेदिवानासनवंधमध्वने॥ तीक्ष्णाग्रोत्थितास्तत्वदसह्यरंहसोविश्लेषेलंघुःखलकाः
प्रतस्थिरे॥७॥ गंडोज्वलामुज्वलनाभिचक्रयाविराजमानांनवपौंदरश्रिया॥ कश्चित्सुरवंप्र
ना॰२ सुमस्सुसारथीरथंयुयोजविधुरांवधूमिव॥८॥ उत्प्लातुमिच्छन्विधृतःपुरोवलात्रिधीयमानेन
रभाजिपंत्रके॥ अर्धोन्नितोज्झारविजर्जरस्वरःस्वनामनिन्ध्येरवणःस्फुरद्गर्यतां॥९॥ नस्याग्रहो।

७१ माघ

तौंपिधुवन्विषाणयोर्युगंससूत्कारविवर्त्तिततत्रिकः॥ गोरांजिजनेनसंनिधातुमुद्दतामंतुत्तणं
नौक्षतरःप्रतीक्षति॥१०॥ नानाविधाविःकृतसामजस्वरःसहस्रवर्त्मा चपलैर्दुरध्ययः॥ गोध
र्वभूपिष्टतयासमानतांसंसामवेदस्यदधौवलोदधिः॥११॥ प्रत्यन्यनागंचलितस्त्वरावला
निरस्यकुंठंदधताच्चमंकुशं॥ मूर्द्धानमूर्द्धायतदंतमंडलंधुवन्त्रोधिद्विरदोनिषादिनो॥१२॥
संमूर्छदुच्छृंखलसंखनिःस्वनःस्वनःप्रयातेपटहस्यशार्ङ्गिणः॥ सत्वानिनिन्येनितरांम
हांत्यपिव्यथांद्वयेषामपिमेदिनीभृतां॥१३॥ कालेयकक्षोदविलेपनश्रियंदिशद्दिशामु
ल्लसदंशुमद्धाति॥ खातंखुरैर्मुद्भुजांविपत्रथेगिरेरधःकांचनभूमिजैरजः॥१४॥ मेद्भेग
जानांरथमंडलस्वनैर्निज्जुकुवेलाहृशामेवद्दंहिती॥ तौरेर्वभूवपरभागलाभतःपरिस्फुटंस्तेषु

७७ राम०

श्रेष्ठानां=२

मघ्य सग ५

तुंगहेषितैः॥१५॥ अच्चैतुकामोवमतांकुशाग्रहस्तिरोगतंसांकुसुमुद्वहन्नशिरः॥ स्थूलोच्चयेना
गमदंतिकागतांगजोग्रयातात्रकरः करेणुकां॥१६॥ यांतोस्य शांतश्चरणोरिवार्वनैजवात्र
कीर्णैरभितः प्रकीर्णकैः॥ अद्यापिसेनातुरगाः सविस्मयैरलूनपक्षाइवमानिरेजनैः॥१७॥
अत्वीर्दधानैरवतत्यकंधराश्चलावचूलाकुलघर्घरारवैः॥ भूमिर्महत्यप्यविलंवितक्रमं
क्रमेलकैस्तत्क्षणमेवचिच्छिदे॥१८॥ तर्णांप्रणेत्राकृतनादमुच्चकैः प्रनोदितं विसरपुप्प
मधुनि॥ आलीपने मित्त्वतसांद्रमेदिनीरजस्थयाक्रांतिभयादिवाड्वल॥१९॥ व्यावृत्तव
क्रैरखिलैश्चमूचरैर्बजन्निरेवक्षणमीक्षिताननाः॥ वलाऊरीयः कुचकंप्रकेत्तुकंप्रपुस्त्
रेगाधिरूढोवरोधिकाः॥२०॥ पादैः पुरः कूवरिणांविदारिताः प्रकामगमाक्रांततलास्ततोगजैः॥

भग्नोत्रतानंतरपूरितां तरावन्मुर्भुवः कृष्टसमीकृताश्व॥२१॥ दुर्दांतमाक्रत्य निरस्तसादिनं सहास
हाकारमलोकयज्जनः॥ पर्य्याणतस्त्रस्तमुरोविलंविनस्तुरंगमे प्रद्रुतमेकयादिशा॥२२॥ भूम्
ह्निरणप्रस्खलितास्खलन्नैरपङ्कुवाना सरितः ष्टथूरपि॥ अन्वर्थसंज्ञैव परं त्रिमार्गगा ययावसं
ख्यैः पथिभिश्चमूरसौ॥२३॥ त्रस्तोसमासन्नकरेणुसूत्कृतान्नियंतरि व्याकुलमुक्तरज्जुके॥ स्थि
रावरोधांगनमुत्पथेन गां विलंघ्य लघ्वीं करभो वभंज तुः॥२४॥ स्रस्तांगसंधौ विगताक्षपाट
विरुजानि कामं विकलीकृते रथे॥ आक्षेन तत्क्षणाभिषजेव तत्क्षणोप्रचक्रमे लंघनपूर्वकः क्र
मः॥२५॥ धूर्भंगसंक्षोभविदारितोष्ट्रिकागलन्मधुस्रावितद्रुवर्त्मनि॥ स्थानेविखंगिणप
नासित्तृणां पुरः शुशोच लाभाय कृतो व्ययो वणिक्॥२६॥ भेरीभिराकृष्टगुहामुखोमुकूर्ध्वजैःसु

केसूर्जितकंदलीदलः॥ उत्तुंगमातंगजितालघूपलोवलैः सपक्षताक्रियतेस्मभूधरः॥२७॥ वन्येभदाना
निलगंधदुर्द्धराः क्षणंतरुच्छेदविनोदितक्रुधः॥ व्यालद्विपायंतृभिरुन्मदिष्णवः कथंचिदाराद
पथेननिन्यिरे॥२८॥ तैर्वैजयंतीवनराजिराजिभिर्गिरिप्रतिछंदमहामतंगजैः॥ वक्त्रः प्रसर्पज्जन
तानदीश्वतैर्भुवोवलैरंतरयांवभूविरे॥२९॥ तस्थेमुहूर्त्तंहरिणीविलोचनैः सहांशिदस्यानयनानि
योषितां॥ मत्वाथसत्रासमनेकविभ्रमक्रियाविकाराणिमृगैः पलाय्यत॥३०॥ निम्नानिदुःखाद
वतीर्यसादिभिः सयत्नमाकृष्टकशाश्वनैः शनैः॥ उत्तेरुरुत्तानखुरास्वंदुताः श्लथीकृताः प्रग्रह
मर्वतांव्रजाः॥३१॥ अध्यध्वमारूढवतैवकेनचित्प्रतीक्षमाणेनजनंमुहुर्धृतः॥ दान्त्यांहिस
घः फलदैमहाग्रतःस्वखादद्दीसरस्युवावनावलीः॥३२॥ शौरेः प्रतापोपनतैरितस्ततः समागतैः

दामोदरेष्टुदृष्टुवातरुणः—१

७९
माघ०

घ्रश्रयनम्रमूर्त्तिभिः ॥ एकातपत्रापृथिवीभृतांगणैरभूद्बहुच्छत्रतयापताकिनी ॥२३॥ आगछतो
नूचिगजस्यघंटयोः स्वनंसमाकर्ण्यसमाकुलांगनाः ॥ दूरादपावर्त्तितभारवाहणाः पथोपसस्नु
श्चपलंवमूचराः ॥२४॥ ओजस्विवर्णोज्वलवृत्तशालिनः प्रसादिनोनुज्झितगोत्रसंविदः ॥ श्लोका
नुपेंद्रस्यपुरःस्मभूयसोगुणान्समुद्दिश्यपठंतिवंदिनः ॥२५॥ निःशेषमाक्रांतमहीतलोजलैश्च
लन्समुद्रोपिसमुज्झतिस्थितिं ॥ ग्रामेषुसैन्यैरकरोदवारितैः किमव्यवस्थांचलितोपिकेश
वः ॥२६॥ कोशातकीपुष्पगुलुछकांतिभिर्मुखैर्विनिद्रोल्वणवाणचक्षुषः ॥ ग्रामीणव ७९
ध्वस्तमलक्षिताजनैश्चिरंवृतीनामुपरिव्यलोकयन् ॥२७॥ गोष्ठेषुगोष्ठीकृतमंडलासना राम०
न्सनादमुत्थायमुकुंःसवल्गातः ॥ ग्राम्यानपश्यत्कपिशंपिपासतः स्वगोत्रसंकीर्त्तनभा

उपलक्षिताः इतिशेषः–२

वितात्मनः ॥३८॥ पश्यन्नकृतार्थैरपि वल्लवीजनो जनाधिनाथं नययौ वितृष्णतां ॥ एकांतमो
ग्ध्यानवबुद्धविभ्रमैः प्रसिद्धविस्तारगुणैर्विलोचनैः ॥३९॥ प्रीत्या नियुक्तास्लिहतीः स्तनंधया
न्निग्रहस्वपारीमुभयेन जानुनोः ॥ वर्द्धिष्णुधाराध्वनिरोहिणीः पयश्चिरं निदध्यौ दुहतः सगो
दुहः ॥४०॥ अभ्यागतोभ्यागतत्तूर्णतर्णकान्निर्याणहस्तस्य पुरोदुधुक्षतः ॥ वर्गाऽवांक्रक
तिवारुनिर्यतीमरिर्मधोरैक्षतगोमतल्लिकां ॥४१॥ सव्रीहिणां यावदपासितुं गताः शुकान्
मृगैस्तावदुपद्रुतश्रियं ॥ केदारिकाणामभितः समाकुलाः सहासमालोकयतिस्मगोपिकाः ॥४२
व्यासेद्धुमस्मानवधानतः पुराचलत्यसावित्युपकर्णयन्नसौ ॥ गीतानि गोप्याः कलमंगर
गवव्रजोनन्नूनमत्तीति हरिर्व्यकल्पयत् ॥४३॥ लीलाचलस्त्रीचरणारुणोत्पलस्खलत्तुला

मर्द्दिताःरजानस्थु=२

कोटिनिनादकोमलः॥ शौरेरुपान्तृपमवाछिदन्मनः स्वनांतराण्युन्मदसारसारवः॥४४॥ उच्चै
र्गतामस्खलितांगरीयसींतदातिदूरादपितस्यगछतः॥ एकेसमूहुर्बलरेणुसंहतिंशिरोभि
राज्ञामपरेमहीभृतः॥४५॥ प्रायेणनीचानपिमेदिनीभृतोजनः समेनैवपथाधिरोहति॥ से
नामुरारेः पथएवसापुनर्महामहीध्रानुपरितोध्यरोहयत॥४६॥ देताग्रनिर्भिन्नपयोदमुन्मु
खाः शिलोच्चयानारुरुहुर्महीयसः॥ तिर्य्यक्कटप्लाविमदांबुनिम्नगाविपूर्य्यमानैश्रव
णोदरंद्विपाः॥४७॥ श्च्योतन्मदांभःकणकेनकेनचिज्जनस्यजीमूतकदंबकद्युता॥ नागे
ननागेनगरीयसोच्चकैरोधिपंथाः पृथुदंतशालिना॥४८॥ भग्नद्रुमाश्चक्रुरितस्ततो
दिशः समुल्लसत्केतनकाननाकुलाः॥ पिष्टाद्रिपृष्ठास्तरसाचदंतिनश्चलत्त्रिजांगा

चलदुर्गमाभुवः॥४९॥आलोकयामासहरिर्महीध्रानधिश्रयंतीर्गजताःपरःशताः॥ उत्पा
तवातप्रतिकूलपातिनीरुपत्यकाभ्योबृहतीःशिलाइव॥५०॥शैलाधिरोहाभ्यसनाधि
कोद्धुरैःपयोधरैरामलकीवनाश्रिताः॥ तंपार्वतीयप्रमदाश्चकैर्वायिरेविकासविस्फारि
तविभ्रमेक्षणाः॥५१॥सावज्ञमुन्मील्यविलोचनेसकृत्तांमृगेंद्रेणास्तुषुप्सुनापुनः॥से
र्ष्यात्त्रयातःसमयापिविद्युषेकथंसुराजंभवमन्यथाप्यवा॥५२॥उत्तैर्धनिर्धूतमहीरुहांध
जेर्हयौघरुद्धोद्धतसिंधुरंहसं॥ नागैरधिच्छिन्नमहाशिलंमुहुर्वलंक्लवापरितन्महीभृ
तं॥५३॥भ्रमभ्रमाणोमधुजालकेतरोगंजेनगंडकषतोविधूनिते॥ स्तुद्राभिरस्तुद्रतराभि
राकुलंविदश्यमानेनजनेनदुद्रुवे॥५४॥नीतेपलाशिन्युचितेशरीरवज्जातकेनांतमदांत

कर्मणा॥ संचेरुरात्मानइवापरंस्वंणात्स्वंमौर्हंदेहमिवप्लवंगमाः॥५५॥ प्रह्वानतीवक्र
विदुद्धतिश्रिभिः क्वचित्प्रकाशानतिगह्वरानपि॥ साम्यादपेतानिति वाहिनीहरेस्तदाति
चक्रामगिरीनूगुरूनपि॥५६॥ सव्याहवत्यापरितोपथान्यपिस्ववसेनयासर्वपथीनयातया
॥ श्रंभोभिरुल्लंघितवुंगरोधसः प्रतीपनाम्नीः कुरुतेस्मनिम्नगाः॥५७॥ या गाहेतनदंति
नांघरांस्तुरंगमैस्तावदुदारितंरवुरैः॥ छिन्नंसमीरैः सरितांपुरः पतज्जलाग्रनैपीज्जएवपं
कतां॥५८॥ रंतुंगहतोत्तुंगनितंवभूमयोमुकूर्ध्वजंतः प्रमदंमदोद्धताः॥ पंकेकरापाकृतशैवलां
शुकाः समुद्गगानामुदपादयन्त्रिभाः॥५९॥ भग्नोरुरोधः परितांभसः समस्थलीकृत्यपुरातनी
नंदीः॥ कूलंकषोद्याः सरितस्तदापराः प्रवर्तयामासुरिभामदांवुभिः॥६०॥ पद्मैरनन्वीत

पूविर

वधूमुखश्रीर्गतानहंसैः श्रियमातपत्रजां ॥ दूरेभवन्भोजवलस्यगछतः शिलोपमातीतग
जस्यनिम्नगाः॥६१॥ स्निग्धांजनश्यामतनूभिरुन्नतैर्निरंतलाकरिणांकदंबकैः॥ सेनासु
धाक्षालितसौधसंपदंपुरीवङ्गनापरभागमापसा॥६२॥ प्रासादशोभातिशयालुभिः पथि
प्रभोर्निवासाः पटवेश्मभिर्बभुः॥ नूनंसहानेनवियोगविक्लवापुरः पुरश्रीरपिनिर्ययौतदा॥
६३॥ वर्ष्मद्विपानांविरुवंतउच्चकैर्वनेचरेभ्यश्चिरमाचचक्षिरे॥ गंडस्थलाघर्षगलन्मदोद
कद्रवद्रुमस्कंधनिलायिनोलिनः॥६४॥ आयामवद्भिः करिणांघटाशतैः रथः कुलाहालकपंक्ति
उच्चकैः॥ दूष्यैर्जितोदग्रमहाणिसाचमूरतीत्यभूयांसिपुराण्यवर्त्तत॥६५॥ उद्धूतमुच्चैर्ध्वजिनीभि
रंशुभिः प्रलब्धमभ्यर्पितयाविवस्वतः॥ आल्हादिकल्हारसमीरणाहतेपुरः प्रयातांसियमुनेरजः॥६६॥
ने

८२॥

॥माघ०

याघर्मभासस्तनयापिशीतलैःस्वसायमस्यपिजनस्यजीवनैः॥ कृष्णापिशुद्धेरधिकंविधा
त्रभिर्विहंतुमंहांसिजलैःपटीयसी॥६७॥ यस्यामहानीलतटीरिवद्रुताः प्रयांतिपीत्वाहि
मपिंडपांडवः॥ कालीरयस्ताभिरवांतुरंजिताःस्तोनभिन्नांजनवर्णतांधनाः॥६८॥व्यक्तं
वलीयान्यदिहेतुरागमादपूरयत्साजलधिंनजाह्नवी॥ गांगोघनिर्भत्सितशंभुकंधरास
वर्णामणिःकथमन्यथास्यतत्॥६९॥ अभ्युद्यतस्याक्रमितुंजवेनगांतमालनीला नितरां
धृतायतिः॥ सीमेवसातस्यपुरःस्तणांवभौवलांवुराशेर्महतोमहापगा॥७०॥कुलकं॥लो ८२॥
लैररित्रैश्चरणैरिवाभितोजवाद्द्रुजंतीभिरसौसरिज्जनैः॥ नौभिःप्रतेरेनुचितंजवोदितभ्रमा ॥राम०
न्निमीलल्ललनावलंबितैः॥७१॥ यत्पूर्वमंशद्वयसंद्विपाधिपाःस्तणेसहेलाःपरितोजगाहिरे॥

पीतः२ मीनि२

मारदिदिशोषः २ गवलं माहिषं शृंगं
मित्यमरः ४

सद्यस्ततस्तेरुरनारतस्रुतप्रस्वदानवारिप्रचुरीकृतंपयः ॥७२॥ प्रोथैःस्फुरद्भिःस्फुटयद्मुन्मुखैः
स्तुरंगमैरायतकीर्णवालधि ॥ उत्कर्णमुद्ग्राहितधीरकंधरैरतीर्यतांग्रतरदत्तदृष्टिभिः ॥७३॥ नी
त्वोजवेनेवनितांतदुस्तरांनदींप्रतिज्ञामिवतांगरीयसीं ॥ शृंगैरपस्कार्मदहृत्तरीभुवामशो
भतोक्षैर्नदितंककुद्मतां ॥७४॥ सीमंत्यमानायदुभूभृतांबलैर्विभोतरद्भिःगवलावलिद्युतिः गवलासि तद्युतिरिव त्विषाः ४
॥सिंदूरितानेकपकर्णकंकितातरंगिणीवेणिरिवायतभुवः ॥७५॥ अव्याहतक्षिप्रगतैः
समुच्छ्रितानन्तुज्झितद्राघिमभिर्गरीयसः ॥ नाव्यंपयःकेचिदतारिषुर्भुजैःक्षिपद्भिरूर्मीनप
रैरिवोर्मिभिः ॥७६॥ विदलितमहाकूलामुक्तांविषाणविघट्टनैरलघुचरणाकृष्टग्राहांविषाणि
भिरुन्मदैः ॥ सपदिसरितंसाश्चीभर्तुर्हृहद्द्रथमंडलस्खलितसलिलामेनांतीर्त्वाजगामवरूथिनी ॥७७॥

नं१

८३॥ इतिश्रीमाघकृतौशिशुपालवधेमहाकाव्येप्रस्थानवर्णनोनामद्वादशःसर्गः॥१२॥ यमुनामतीतमथशुश्रु
माघ० वानमुंतपसस्तनूजइतिनाधुनोच्यते॥ सयदाचल[illegible]न्निजपुरादहर्निशंनृपतेस्तदादि
समचारिवार्त्तया॥१॥ यदुभर्तुरागमनलब्धजन्मनःप्रमदादमानिवपुरेमहीयसि सहसा
ततःसहहितोनुजन्मभिर्वसुधाधिपोभिमुखमस्यनिर्ययौ॥२॥ रभसप्रवृत्तकुरुचक्रदुं
दुभिध्वनिभिर्जनस्यबधिरीकृतश्रुतेः॥ समपादिवक्त्रभिरभीष्टसंकथाप्रकृतार्थशेषमथहस्तसंज्ञ ८३॥
या॥०३॥ अपदोंतरंचपरितःक्षितिंक्षितामपतन्द्रुतभ्रमितहेमनेमयः॥ जविभिर्मारुतोचितपर राम०
स्परोपमक्षितिरेणुकेतुवसनाःपताकिनः॥०४॥ द्रुतमध्वनन्नुपरिपाणिवृत्तयःपणवाद्यवा
द्यचरणाहताभुवः॥ ननृतुश्चवारिधरधीरवारणध्वनिहृष्टकूजितकलाः[illegible]कलापिनः॥०५॥

संभ्रमस्त्वादरे भयेद्गल्मरः ३

हस्ति भिः

ब्रजतोरपिप्रणायपूर्वमेकतां कुकुराधिनाथकुरुनाथसेन्ययोः ॥ रुरुषे विषाणिभिरनुद्धतं

श्रीकृष्णात

मिथोमदमूढबुद्धिषु विवेकिता कुतः ॥६॥ अवलोकएव नृपतेः स्मदूरतो रभसाद्रथादवत

रीतुमिछतः ॥ अवतीर्णवानप्रथममात्मना हरिर्विनयं विशेषयति संभ्रमेनसः ॥७॥ वपु

षापुराणपुरुषः पुरः क्षितौ परिपुंज्यमानपृथुहारयष्टिना ॥ भुवनैर्नतोपि विहितात्मगौरवः प्र

न४५ णनाम नामतनयं पितृष्वसुः ॥८॥ मुकुटांशुरंजितपरागमग्रतः सनयावदापशिरसामहीतले ॥ क्षि

तिपेन तावदपेक्षितक्रमं भुजपंजरेण रभसाद्गृह्यत ॥९॥ नममौकपारतरविस्तृतं तनो

मुरवैरिवक्षउरसि क्षमाभुजः ॥ भुजयोस्तथापि युगलेन दीर्घयोर्विकटीकृतेन परितोभिषस्व

जे ॥१०॥ गतयानिरंतरनिवासमधुरः परिनाभिनून्नमवमुच्य वारिजे ॥ कुरुराजनिर्दयनिपीड

न३

नाभयान्मुखमध्यरोहिमुरविद्विषःश्रिया ॥११॥ शिरसिस्म जिघ्रतिमुरारिवंधनच्छलवाम
नंविनयवामनंतदा ॥ यशसेववीर्यविजितामरद्रुमप्रसवेनवासितशिरोरुहेन्नृपः ॥१२॥
सुखवेदनाहृषितरोमकूपयाशिथिलीकृतेपिवसुदेवजन्मनि ॥ कुरुभर्तुरंगलतयाननतत्य
जेविदलत्कदंबनिकुरंबचारुता ॥१३॥ इतरानपिक्षितिभुजोनुजन्मनःश्रमनाःप्रमोदपरिफु
ल्लचक्षुषः ॥ सयथोचितंजनसंभाजनोचितःप्रसभोद्धृतासुरसभोसभाजयत् ॥१४॥ समुपे
त्यतुल्यमहसःश्लाघनान्घनपक्षदीर्घतरबाहुशालिनः ॥ परिशिश्लिषुःक्षितिपती
नृक्षितीश्वराःकुलिशात्परेणगिरयोगिरीनिव ॥१५॥ इभकुंभतुंगकठिनेतरेतरस्तनभारदू
रविनिवारितोदराः ॥ परिफुल्लगंडफलकाःपरस्परंपरिरेभिरेकुकुरकौरवस्त्रियः ॥१६॥

रथवाजिपत्तिकरिणीसमाकुलंतदनीकयोःसमगतद्वयंमिथः॥दध्रिरेथ्यथक्करिणएवदूरतो
महतांहिसर्वमथवाजनातिगं॥१७॥अधिरुह्यतामितिमहीभृतोदितःकपिकेतनार्पितक
रोरथंहरिः॥अवलंबितैलविलपाणिपल्लवःश्रयतिस्ममेघमिवमेघवाहनः॥१८॥रथमास्थि
तस्यचपुराभिवर्त्तिनस्त्रिस्रणांपुरामिवरिपोर्मुरद्विषः॥अथधर्ममूर्त्तिरनुरागभावितःस्वय
मादितप्रवयणांप्रजापतिः॥१९॥शनकैश्चतस्यतनुजालकांतरप्रसृतस्तपाकरकरोत्कराकृ ह्रसिरिन ४
ति॥पृथुफेनकूटमिवनिम्नगापतेःमरुदस्यसूनुरधुवत्प्रकीर्णकं॥२०॥विकसत्कलायकु ह्र·नायस्ना
सुमासितद्युतेरलघूडुपांडुजगतामधीशितुः॥यमुनाह्रदोपरिगहंसमंडलद्युतिजिह्मजिह्म ननीनर्ह्म:
रभ्रतोष्णवारणं॥२१॥पवनात्मजेंद्रसुतमध्यवर्त्तिनानितरामरोचिरुचिरेणचक्रिणा॥ रथ पदुरा३

८५
माघ०

तवयोगमुभयग्रहांतरस्थितिकारितंदुरधराख्यमिंदुना ॥२२॥ वशिनं क्षितेरयनयाविवेश्वरं
नियमोयमश्चनियतंयतिंयथा ॥ विजयश्रियावृतमिवार्कमारुतावनुसस्रतुस्तमथद
स्रयोःसुतौ ॥२३॥ मुदितैस्तदेतिदितिजन्मनांरिपावविनेयसंभ्रमविकासिभक्तिभिः
॥ उपसेदिवद्भिरुपदेष्टरीवतेववृतेविनीतमविनीतशासिभिः ॥२४॥ गतयोरभेदमिति
सैन्ययोस्तयोरथभानुजह्नुतनयांभसोरिव ॥ प्रतिनादितांबरविमानमानकैर्नितरामु
दापरमयेवदध्वने ॥२५॥ मखमीक्षितुंक्षितिपतेरुपेयुषांपरितःप्रकल्पितनिकेत ८५
नेवहिः ॥ उपरुध्यमानमिवनूत्नतांबलैःपुटभेदनंदनुसुतारिरैक्षत ॥२६॥ प्रतिशब्दपूरित राम०
दिगंतरःपतन्पुरगोपुरंप्रतिससैन्यसागरः ॥ रुरुचेहिमाचलगुहामुखोन्मुखःपयसांप्रवाह

पूःस्त्रीपुरीनगर्यौवापत्तनंपुटभेदनंइत्यमरः =२

इवसोऽर सैंधवः ॥२७॥ असकृद्गृहीतबहुदेहसंभवस्तदसौविभक्तनवगोपुरांतरं ॥ पुरुषः पुरंप्र
विशति ॥२८॥ स्म पंचभिः सममिमिंद्रियैरिव नरेंद्रवर्त्मभिः ॥२८॥ तनुभिस्त्रिनेत्रनयनाऽनवेक्षितस्मर
विग्रहद्युतिभिरद्युतत्त्वराः ॥ प्रमदाश्च यत्र खलु राजयक्ष्मणः परतो निशाकरमनोरमैर्मुखैः ॥
२९ ॥ अवलोकनाय सुरविद्विषां द्विषः [illegible]हप्रणादविहितोपहूतयः ॥ अवधीरितान्यकरणी
यसत्वराः प्रतिरथ्यमीयुरथ पौरयोषितः ॥३०॥ अभिवीक्ष्य सामिकृतमंडनं यतीः कररुद्धनी
विगलदंशुकाः स्त्रियः ॥ दधिरेऽधिभित्तिपटहप्रतिस्वनैः स्फुटमट्टहासमिव सौधपंक्तयः ॥३१॥
रभसेन हारपददत्तकांचयः प्रतिमूर्द्धजं निहितकर्णपूरकाः ॥ परिवर्त्तितांबरयुगाः समा
पतन्नवलयीकृतश्रवणकुंडलाः स्त्रियः ॥३२॥ व्यतनोदपास्य चरणं प्रसाधिकाकरपल्ल

वाद्ग्मवसेनकाचन॥द्रुतयावकैकपदचित्रितावनिंपदवींगतेवगिरिजाहरार्द्धतां॥३३॥च्यु
वि शाल जघ ने स्थली सुवे
लयानुविशंकटकटीरकस्थलीशिखरस्खलन्मुखरमेखलाकुलाः॥भवनानितुंगत
र्ल सोपान
पनीयसंक्रमक्रमणक्कणत्कनकनूपुराःस्त्रियः॥३४॥अधिरुक्षमंदिरगवाक्षमुल्लसत्क
हृशोराजमुरजिद्दिदृक्षया॥वदनारविंदमुदयाद्रिकंदराविवरोदरस्थितमिवेंदु मंज
लं दुं॥३५॥अधिरूढयानिजनिकेतमुच्चकैःपवनावधूतवसनांतयैकया॥विहितोप
शोभमुपयातिमाधवेनगरंव्यरोचतपताकयेवतत्॥३६॥करसुम्मपद्मसुकुंपवर्जितैः ८६
प्रतिवेश्मलाजकुसुमैरवाकिरन्॥अवदीर्णशुक्तिपुटमुक्तमौक्तिकप्रकरैरिवप्रियरथां राम०
गमंगनाः॥३७॥हिममुक्तचंद्ररुचिरःसपद्मकोमदयन्द्विजान्जनितमीनकेतनः॥

लो३

अभवत्प्रसादितसुरोमहोत्सवः प्रमदाजनस्यसचिरायमाधवः ॥३८॥ धरणीधरेंद्रदुहितुर्भया
दसौविषमेक्षणःस्फुटममून्नपश्यति ॥ मदनेनवीतभयमित्यधिष्ठिताः क्षणमीक्षतेस्मसमु
रोविलासिनीः ॥३९॥ विपुलेनसागरशयस्यकुक्षिणाभुवनानियस्यपपिरेयुगक्षये ॥ म
दविभ्रमासकलयापपे पुरः सपुरस्त्रियैकतमयैकयादृशा ॥४०॥ अधिकोन्नमद्घनपयो
धरंमुहुः प्रचलत्कलापिकलशंरवकस्वनं ॥ अभिवीक्ष्यसमंगुलिमुखेनकाचनद्रुतमेक
कर्णविवरंव्यघट्टयत् ॥४१॥ परिपाटलाग्रनखचारुणासकृच्चलितांगुलीकिसलयेनपा
णिना ॥ सशिरःप्रकंपमपराऽरिमधोरनुदीर्णवर्णनिभृतार्थमाह्वयत् ॥४२॥ नलिनांति
कोहितपल्लवश्रियाव्यवधायचारुमुखमेकपाणिना ॥ स्फुरदंगुलीविवरनिःसृतोल्लस

न विवेद यः सततमीक्षते तमुं न वितृप्यतां व्रजति सोप्यसावीति ॥४६॥

दृशा नवप्रभांकुरमजृंभतापरा ॥४३॥ वलयार्पितासितमहोपलप्रभावहलीकृतप्रतनुरोमरा
जिना ॥ हरिवीक्षणाक्षणिकचक्षुषान्यया करपल्लवेन गलदंशुकं दधे ॥४४॥ निजसौर
भभ्रमितभृंगपक्षतिव्यजनानिलक्षपितघर्मवारिणा ॥ अभिशौरि काचिदनिमेष
दृष्टिना पुरदेवतेव वपुषा व्यभाव्यत ॥४५॥ अभियाति नः सतृषएव चक्षुषो हरिरित्यखि
द्यत नितंतविनीजनः ॥ न विवेद यः सततमेनमीक्षते समुपैत्ति सोपि न वितृप्रताम
पि ॥४६॥ अकृतस्वसद्मगमनादरः क्षणं लिपिकर्मनिर्मितइव व्यतिष्ठत ॥ गतमच्युतेन स
हशून्यतामितः प्रतिपालयन्मनइवांगनाजनः ॥४७॥ अलसैर्मदेन सुदृशः शरीरकैः स्व
गृहान्प्रतिप्रतिययुः शनैः शनैः ॥ अलघुप्रसारितविलोचनांजलिद्रुतपीतमाधवरसौ

प्रतीक्षमाणाइवेत्यर्थः २

मुद्द कृ ३७
२२

निर्धूली कृताः
घनिभरैः॥४८॥नवगंधवारिविरजीकृताः पुरोघनधूपधूमकृततोरणविभ्रमाः॥ प्रचुरोद्धतध्वजवि
लंविवाससः पुरवीथयोथहरिणातिपेतिरे॥४९॥[redacted]॥उपनीयविंदुसरसोमयेनयोमणिदारुचा
रुकिलवार्षपर्वणं॥ विदधेविधूतसुरसद्मसंपदंसमुपासदत्सपदिसंसदंसतां॥५०॥अधिरात्रिय
त्रनिपतन्नभोलिहांकलधौतधौतशिलवेश्मनांरुचः॥पुनरप्यवापदिवदुग्धवारिधिक्षणगर्भवा
समनिदाघदीधितिः॥५१॥लघनेषुलोहितकनिर्मिताभुवः शितिरत्नरश्मिहरितीकृतांतराः॥
जमदग्निसूनुपितृतर्पणीरपस्तनुतेस्मयाविरलक्षेवलाइव॥५२॥विशदाश्मकूटघटिताः क्षपाकृ
तः क्षणदासुयत्रचरुचैकतांगताः॥गृहपंक्तयश्चिरमतीयिरेजनेस्तमसीवहस्तपरिमर्शसूचिताः
॥५३॥निलयेषुनक्तमसिताश्मनांचयैर्नलिनीवधूपरिभवस्फुटागसः॥मुकुरत्वमस्तझिरपियत्रगो

रवाछशलांछनांशवउपांउपांशुजघ्रिरे ॥५४॥ सुखिनःपुरोभिमुखतामुपागतैःप्रतिमासुयत्रस्थ
हस्त्रभिन्निषु ॥ नवसंगमेरविभरुःप्रियाजनैःप्रमदंत्रपाभरपरांमुखैरपि ॥५५॥ तरुणावांशुयामुक्त
रवांचिताननान्निचयेषुयत्रहरितात्मवेश्मनां ॥ रश्मिनाग्रलग्नकिरणांकुराजनोहरिणान्गृहीतक
वलान्निवेह्नत ॥५६॥ विपुलालवालभृतवारिदर्पणप्रतिमागतैरभिविजुरात्मभिः ॥ यदुपांति
केषुदधतोमहीरुहःस पलाशराशिमिवमूलसंततिं ॥५७॥ उरुगंडमूर्छलुहरत्रसंनिधेर्मुकुरस्त्र
तस्परसितैःपयोमुचः ॥ अभवन्यदंगनभुवःसमुद्धसत्नववालवायजमणिस्थलांकुराः ॥
५८ ॥ नलिनीनिगूढसलिलाचयत्रसास्थलमित्यधःपततियस्तुयोधने ॥ अनिलात्मजप्रसभन
कुले खिलच्छितिपक्षयगमनिमित्ततांययौ ॥५९॥ हसितुंपरेणपरितःपरिस्फुरत्करवालकोम

लरूचावुपस्थितैः॥उदकर्षियत्रजलशंकयाजनैर्मुहुर्नीलभुविंद्रमंबरं॥६०॥अभितःसदोथहरि
पांडवैरथादमलांशुमंडलसमुल्लसत्तनू॥अवतेरतुर्नयननंदनौनभःशशिभार्गवावुद २३
यपर्वतादिव॥६१॥ तदलक्ष्यरत्नमयकुड्यमादरादभिधातरीतइतइत्यथोन्नृपे॥धवलाश्मरश्मि क४
पुरलाविभावितप्रतिहारमाविशदसौसदः शनैः॥६२॥नवहाटकेष्टकचितंददर्शसक्षितिपस्य
पंस्त्यमथतत्रसंसदिगगनस्पृशांमणिरूचांचयेनयस्सदनान्युदस्मयत्किनामपि॥६३॥उ
दयाद्रिमूर्ध्निपुगपच्चकासतोर्दिननाथपूर्णशशिनोरसंभवां॥रूचिमासनेरुचिरधाम्निविभ्र
तावलघुन्यपश्यन्नपषदतांन्नृपाच्युतौ॥६४॥सुतरांसुखेनसकलक्लमच्छिदासनिदाघमंगमिवमा
तरिश्वना॥यदुनंदनेनतदुदस्थितःपयःशशिनेवराजकुलमापनंदथुं॥६५॥अनवद्यवाद्यलय

८७

यम४ मनून्२

गाम्रिकोमलंनवगीतमप्यनवगीततांदधत् ॥ स्फुटसात्विकांगि कमनन्त्यदुल्लंसविलास
लासिकविलासिनीजनः ॥६६॥ सकलेचतत्रनगरेहरौगृहानुगतवत्यकालमहमादिदेश
सः ॥ सततोत्सवंतदितिनूनमुन्मदोरभसेनविस्मृतमहीभृतः ॥६७॥ हरिराकुमारमखिलाभि
धानवित्स्वजनस्यवार्त्तमन्वयुंक्तसः ॥ महतीमपिश्रियमवाप्यविस्मितःसुजनोनविस्मर २५
तिजातुकिंचन ॥६८॥ मर्त्यलोकदुरवापमवाप्तरसोदयंनूतनत्वमविक्ततयानुपदंदधत् ॥ श्रीप
तिःपतिरसाववनेश्वपरस्परंसंकथामृतमनेकमसिस्वदतामुभौ ॥६९॥ इतिश्रीमाघकृतौशिशु ९८
पालवधेमहाकाव्ये [illegible] नगरप्रवेशवर्णनंनामत्रयोदशःसर्गः ॥१३॥ तंजगादगिरमुद्गिरन्निव रामः
स्नेहमाहितविकाशयादृशा ॥ यज्ञकर्मणिमनःसमादधत्वाग्विदांवरमकद्दोन्नृपः ॥१॥ जज

तेनगदितःप्रियंपरोवक्तुरेवनवतित्रपाधिका॥ ब्रीडमेतिनतवप्रियैवदन्कीमतात्रभवतैवभूयते॥२॥
तोषमे तिवितथैःस्तवैःपरस्तस्यतेचसुलभाःशरीरिभिः॥ भक्तिनस्कतिवचोन्हतंतवस्तोत्रयो
ग्यनवतेनतुष्यसि॥०३॥ वक्तुपिप्रियमयंतवब्रुवन्नव्रजत्यन्हतवादितांजनः॥ संभवेति
य द दोषदूषितेसार्वसर्वगुणसंपदस्त्वयि॥०४॥ साविभूतिरनुभावसंपदांभूयसीत
तवयदायतायति॥ एतदूढगुरुभारभारतंवर्षमद्यममवर्त्ततेवशे॥०५॥ संश्रतेतुमधिगं
तुमिछतःकुर्वतुयहमनुष्ठयामम॥ मूलतामुपगतेत्वयिप्रभोप्रापिधर्ममयहस्तता
मया॥०६॥ संभृतोपकरणेननिर्मलांकर्त्तुमिष्टिमभिवांछितामया॥ त्वंसमीरणउ
वप्रतीक्षितःकर्षकैवलजानुपुपूषता॥०७॥ वीतविघ्नमनघेनभावितासंनिधेस्त

सप्ततंतुमखक्रतु
इत्यमरः-५

न१

९०
माघ॰ वमखेनमेधुना॥ कोविहंतुमलमास्थितोदयेवासरश्रियमशीतदीधितौ॥८॥स्वा
पतेयमधिगम्यधर्मतःपर्य्यपालयमवीवृधंचयत्॥तीर्थगामिकरवैविधानतस्तज्जु
षस्वजुहवानिचानिले॥९॥पूर्वमंगजुहुधित्वमेववास्नातवत्यवभृथेततस्त्वयि
॥सोमपायिनिभविष्यतेमयावांछितोत्नमवितानयाजिना॥१०॥किंविधेयमनया
विधीयतांत्वत्प्रतापजितयार्थसंपदा॥शाधिशाशकजगत्त्रयस्यमामाश्रवोस्मि ९०
भवतःसहानुजः॥११॥तंवदंतमितिविष्टरश्रवाःश्रावयन्नथसमस्तभूभृतः॥व्या राम॰
जहारदशनांशुमंडलव्याजहारशवलंदधद्वपुः॥१२॥सादिताखिलनृपंमहन्महः
संप्रतिस्वनयसंपदेवते॥किंपरस्यसगुणःसमश्नुतेपथ्यवृत्तिरपियद्यरोगितां॥१३॥त

स्तुराज्ञिभवतिस्थितेपरः कः क्रतुंयजतुराजलक्षणं॥ उद्धृतोभवतुकस्यवाभुवः श्रीव
राहमपहाययोग्यता॥१४॥ शासनेऽपिगुरुणिव्यवस्थितंकृत्यवस्तुषुनियुंक्ष्वकाम
तः॥ त्वत्प्रयोजनधनंधनंजयादन्यएषइतिमांचमा व गाः॥१५॥ यस्तवेहसवनेनभ
पतिः कर्मकर्मकरवत्करिष्यति॥ तस्यनेष्यतिवपुः कबंधतांबंधुरेषजगतांसुदर्शनः
॥१६॥ इत्युदीरितगिरंनृपस्त्वयिश्रेयसिस्थितवतिस्थिरामम॥ सर्वसंपदितिशोरिमु
क्रवानुद्वहन्मुदमुदस्थितक्रतौ॥१७॥ आननेनशशिनः कलांदधद्दर्शनक्षपि तकाम
विग्रहः॥ आप्लुतः सविमलैर्जलैरन्दष्टमूर्तिधरमूर्त्तिरष्टमी॥१८॥ तस्यसांख्यपुरु
षेणतुल्यतांबिभ्रतः स्वयमकुर्वतः क्रियाः॥ कर्त्तृतातदुपलंभतोभवद्वृत्तिभाजिकरणे

यथर्त्विजि ॥१९॥ शब्दितामनपशब्दमुच्चकैर्वाक्यलक्षणविदोऽनुवाक्यया ॥ याज्यया यज्ञ
नकर्मिणोऽत्यजन् द्रव्यजातमपदिश्य देवतां ॥२०॥ सप्तनेदकरकल्पितस्वरं साम साम
विदसंगमुज्जगौ ॥ तत्र सूनृतगिरश्च सूरयः पुण्यमृग्यजुषमध्यगीषत ॥२१॥ बद्धदर्भ
मयकांचिदामया वीक्षितानियजमानयायया ॥ शुष्मणि प्रणयनादिसंस्कृते तैर्ह
वींषि जुहवांबभूविरे ॥२२॥ नाजसानिगदितं विभक्तिभिर्व्यक्तिभिश्च निखिलाभिरा ९१
गमे ॥ तत्र कर्मसु विपर्ययेण नमन्मंत्रमूहकुशलाः प्रयोगिनः ॥२३॥ संशयाय दधतोः
सरूपतां दूरभिन्नफलयोः क्रियां प्रति ॥ शब्दशासनविदः समासयोर्विग्रहं व्यवसुः स ७
स्वरेण ते ॥२४॥ लोलहेतिरसनाशतप्रभामंडलेन लसता हसन्निव ॥ प्राज्यमाज्य रामः

मसकृद्वषट्कृतंनिर्मलीमसमलीढपावकः॥२५॥ तत्रमंत्रपवितंहविःकृतावश्नतो
नवपुरेवकेवलं॥ वर्णसंपदमतिस्फुरंदधन्नाम चोज्वलमभूद्धविर्भुजः॥२६॥ स्पर्श
मुष्णमुचितंदधच्छिखीयद्दहहविरद्भुतंनतत्॥ गंधतोपिकृतहव्यसंभवाद्देहिनामघ
हृदोघमंहसां॥२७॥ उत्रमनूसपदिधूम्रपन्न्दिशःसांद्रतांदधदधःकृतांबुदः॥ द्यामि
यायदहनस्यकेतनःकीर्त्तयन्निवदिवौकसांप्रियं॥२८॥ निर्जिताखिलमहार्णवौष
धिस्पंदसारममृतंववल्गिरे॥ नाकिनःकथमपिप्रतीच्छितुंहूयमानमनलेविषेहि
रे॥२९॥ तत्रनित्यविहितोपहूतिषुप्रोषितेषुपतिषुद्युकयोषितां॥ गुंफिताःशिरसिवे
णयोभवन्नप्रफुल्लसुरपादपस्त्रजः॥३०॥ प्राश्नुराशुहवनीयमत्रयत्तेनदीर्घममरत्वमध्यगुः

उद्धतानधिकमेधितौजसोदानवांश्चविबुधाविजिग्यिरे ॥३१॥ नापचारमगमन्क्रियाः
क्वचित्सर्वमत्रसमपादिसाधनं ॥ अत्यशेरतपरस्परंधियःसत्रिणांनपरेतेश्च
संपदः ॥३२॥ दक्षिणीयमधिगम्यपंक्तिशःपंक्तिपावनमथद्विजव्रजं ॥ दक्षिणाःक्षि
तिपतिर्व्यशिश्रणद्दक्षिणास्सपदिराजसूयिकीः ॥३३॥ वारिपूर्वमखिलासुसंस्क्रि
यालब्धशुद्धिषुधनानिवीजवत् ॥ भाविविप्रातिफलंमहद्विजक्षेत्रभूमिषुनराधिपो
वपत् ॥३४॥ किंनुचित्रमधिवेदिभूपतिर्दक्षिणान्द्विजगणानपूपत ॥ राजतःपुपुवि
रे निरेनसः प्राप्यतेंपिविमलंप्रतिग्रहं ॥३५॥ सस्वहस्तकृतचिह्नशासनाःपाकशा
शासनसमानशासनः ॥ आशशांकतपनार्णवस्थितेर्विप्रसादकृतभूयसीर्भुवः ॥३६॥

शुद्धमश्रुतिविरोधिविभ्रतंशास्त्रमुज्ज्वलमवर्णसंकरैः॥पुस्तकैःसममसौगणंमुहुर्वा
च्यमानमश्रृणोद्द्विजन्मनां॥३७॥तत्प्रतीतमनसामुपेयुषांद्रष्टुमाहवनमग्रजन्म
नां॥आतिथेयमनिवारितातिथिःकर्तुमाश्रमगुरुःस्वमाश्रमं॥३८॥मृग्यमाणम
पियद्दुरासदंभूरिसारमुपनीयतत्क्षयं॥आसतावसरकांक्षिणोनृपास्तस्यरत्नमुपदी
कृतंबहिः॥३९॥एकएववसुयद्ददौनृपस्तत्समापकमतर्क्यतक्रतोः॥त्यागशालि
नितपःसुतेपपुःसर्वपार्थिवधनान्यपिक्षयं॥४०॥प्रीतिरस्यददतोभवत्तथायेन
तत्प्रियचिकीर्षवोनृपाः॥स्पर्शितैरधिकमागमन्मुदंनाधिवेश्मनिहितैरुपायनैः
॥४१॥येलघुन्यपिलघूकृताहितःशिष्यभूतमशिषत्सकर्मणि॥सस्पृहंनृपतिभिर्न

९३
माघे॰

पोपरैर्गौरिवेणाददृशेतरामसौ ॥४२॥ आद्यकोलतुलितांप्रकंपनैःकंपितांमुहुरु
नीदृगात्मनि ॥ वाचिरोपितवतामुनामहीराजकार्यविषयाविभेजिरे ॥४३॥
आगताद्व्यवसितेनचेतसासत्वसंपदविकारिमानसः ॥ तत्रनाभवदसौम
हाहवेशात्रवाद्विपरांमुखोर्थिनः ॥४४॥ नैच्छतार्थिनमवज्ञयामुकुर्याचितश्च
५का नवलमाक्षिपत् ॥ नास्तितास्यमपिनव्यकत्ययदत्तमिष्टमपिनाच्यशोतसः ॥४५॥ ९३ रामं॰
निर्गुणोपिविमुखोनभूपतेर्दानशौंडमनसः पुरोभवत् ॥ वर्षुकस्यपरितःक्षि
तोन्नतेर्नीवुदस्यपरिहार्यमूषरं ॥४६॥ प्रेमतस्यनगुणेषुनाधिकंनस्मवेदनगुणा
तरंवसः ॥ दित्सयातदपिपार्थिवोर्थिनंगुणयगुणइतिनव्यजीगणत् ॥४७॥ दर्श

नानुपदमेवकामतःस्वंवनीपकजनेऽधिगच्छति॥प्रार्थनार्थरहितंतदाभवद्दीयतामिति
वचोतिसर्जने॥४८॥नानवाप्तवसुनार्थकाम्यतानाचिकित्सितदेनरोगिना॥इच्छता
शितुमनश्नतानचप्रत्यगामितदुपेयुषासदः॥४९॥स्वादयन्नसमनेकसंस्कृतप्राकृ ७४
तैरकृतपात्रसंकरैः॥भावशुद्धिविहितैर्मुदंजनोनाटकैरिवभारभोजनैः॥५०॥रक्षि
तारमितितत्रकर्मणिन्यस्यदुष्टदमनक्षमंहरिं॥अक्ततानिनिरवर्त्तयत्तदादानहोमय
जनानिभूपतिः॥५१॥एकएवसुसरवैषसुल्वसांशोरिरित्यभिनयादिवोच्चकैः॥यूथमं
गुलिमिवोदनीनमज्ञस्यपालतुलितांगुलीयकं॥५२॥इत्यमत्रविततक्रमेक्रतौवीक्ष्य
धर्ममथधर्मजन्मना॥अर्घ्यदानमनुचोदितोवचःसभ्यमभ्यधितशांतनोःसुतः॥५३॥

९४
माघ॰ आत्मनैवगुणदोषकोविदः किंनवेत्स्यकरणीयवस्तुषु॥यत्तथापिनगुरून्नपृष्ठसित्वं
क्रमोयमितितत्रकारणं॥५४॥स्नातकंगुरुमभीष्टमृत्विजंसंयुजाचसहमेदिनीपतिः
अर्घभाजइतिकीर्त्तयंतिषट्चतेयुगपदागताःसदः॥५५॥शोभयंतिपरितःप्रभा
विनोमंत्रशक्तिविनिवारितापदः॥त्वन्मखंमुखभवःस्वयंभुवोभूतुजश्चपरलोक
जिष्णवः॥५६॥आभजंतिगुणिनःपृथक्पृथक्पार्थसत्कृतिमकृत्रिमाममी॥एक
एवगुणवत्तमोथवापूज्यइत्ययमपीष्यतेविधिः॥५७॥अत्रचैषसकलेपिभाति
मांप्रत्यशेषगुणावेधुरर्हति॥भूमिदेवनरदेवसंगमेपूर्वदेवरिपुरर्हणांहरिः॥५८॥म ९४
र्त्यमात्रमवदीधरद्भवान्मेनमाननमितदैत्यदानवं॥अंशएषजनतातिवर्त्तिनोवि राम॰

४देहि

धसः प्रतिजनं कृतस्थितेः ॥५९॥ ध्येयमेकमपथे स्थितं धियः स्तुत्यमुत्तममतीतवाक्पथं ॥
आमनंति यमुपास्यमादराद्दूरवर्त्तिनमतीव योगिनः ॥६०॥ पद्मभूरिति सृजन् जगद्रजः स
त्त्वमच्युत इति स्थितिं नयन् ॥ संहरन्हर इति श्रितस्तमस्त्रैधमेष भजति त्रिभिर्गुणैः ॥६१॥ स
र्ववेदिनमनादिमास्थितान्नयन्नमनुजिघृक्षया वपुः ॥ क्लेशकर्मफलभोगवर्जितं पुंविशे
षममुमीश्वरं विदुः ॥६२॥ भक्तिमंत इह भक्तवत्सले संततस्मरणरीणकल्मषाः ॥ यांति नि
र्वहणमस्य संसृतिक्लेशनाटकविडंबनाविधेः ॥६३॥ ग्राम्यभावमपहातुमिच्छवो योग
मार्गपतितेन चेतसा ॥ दुर्गमेकमपुनर्निवृत्तये यं विशंति वशिनं मुमुक्षवः ॥६४॥ आदितामज
ननाय देहिनामंततां च दधतेऽनपायिने ॥ बिभ्रते भुवमधः सदाथ च ब्रह्मणोप्युपरि तिष्ठते नमः ॥६५॥

केवलंदधतिकर्तृवाचिनःप्रत्ययनिहनजातुकर्मणि॥धातवःसृजतिसंप्रशास्तयःस्तौति
रत्रविपरीतकारकः॥६६॥पूर्वमेषकिलसृष्टवानपस्तासुवीर्यमनिवार्यमादधौ॥तत्तनुका
रणमभूद्धिरण्मयंब्रह्मणोसृजदसाविदंजगत्॥६७॥ मत्कुनाविवपुरःपरिप्लवौसिंधुन
थसयनेनिषेदुषः॥गच्छतःस्ममधुकैटभौविभोर्यस्यनैद्रसुखविघ्नतांक्षणं॥६८॥श्रोतमा
र्गसुखगानकोविदब्रह्मषट्चरणगर्भमुज्वलं॥श्रीमुखेंदुसविधेऽपिशोभतेयस्यनाभि
सरसीसरोरुहं॥६९॥सत्यवृत्तमपिमायिनंजगद्वृद्धमप्युचितनिद्रमर्भकं॥जन्मविभ्रत
मजंनवंनवंयंपुराणपुरुषंप्रचक्षते॥७०॥स्कंधधूननविसारिकेसरक्षिप्तसागरमहा
प्लवामयं॥उद्धृतामिवमुहूर्तमैक्षतस्थूलनासिकवपुर्वसुंधरां॥७१॥दिव्यकेशरिव

पुंसुरद्विषोनैवलध्वशाममायुधैरपि॥दुर्न्निवारणकंडुकोमलैर्वक्षएषनिरदारयन्नखैः
॥७२॥ वारिधेरिवकराग्रवीचिभिर्दिग्मतंगजमुखान्यभिघ्नतः॥यस्यचारुनखशुक्तयः
स्फुरन्मौक्तिकप्रकरगर्भतांदधुः॥७३॥दीप्तिनिर्जितविरोचनादयंगांविरोचनसुतादभी
प्सतः॥आत्मभूरवरजाखिलप्रजःस्वर्पतेरवरजत्वमाययौ॥७४॥ किंक्रमिष्यतिकिलै
षवामनोयावदित्यमहसन्नदानवाः॥तावदस्यनममौनभस्तलेलंघितार्कशशिमं
डलःक्रमः॥७५॥ गच्छतापिगगनाग्रमुच्चकैर्यस्यभूधरगरीयसांघ्रिणा॥ क्रांतकंधरइ
वाचलोचलिःस्वर्गभर्तुरगमत्सुबंधतां॥७६॥क्रामतोस्यददृशुर्दिवौकसोदूरमूरुमालि
मलिनीलमायतं॥व्योम्निदिव्यसरिदंबुपद्धतिस्पर्द्धमेवयमुनौघमुत्थितं॥७७॥

[illegible]

यस्यकिंचिदपकर्तुमक्षमःकायनिग्रहगृहीतविग्रहः॥ कांतवक्त्रसदृशाकृतिंकृ
तीराहुरिंदुमधुनापिबाधते॥७८॥ संप्रदायविगमादुपेयुषीरेषनाशमविनाशवि
ग्रहः॥ स्मर्तुमप्रतिहतस्मृतिःश्रुतीर्दत्तइत्यभवदत्रिगोत्रजः॥७९॥ एषदाशरथिभू
यमेत्यचध्वंसितोद्धतदशाननामपि॥ राक्षसीमकृतरक्षितप्रजस्तेजसाधिकविभी
षणांपुरीं॥८०॥ निग्रहंतुममरेशविद्विषामर्थितःस्वयमथस्वयंभुवा॥ संप्रतिव्रज
तिसूनुतामयंकश्यपस्यवसुदेवरूपिणः॥८१॥ रेणुकातनयतामुपागतःशाति
तप्रचुरपत्रसंहति॥ लूनभूरिभुजशाखमुज्झितच्छायमर्जुनवनंव्यधादयं॥८२॥ ता
तनोदधिविलोडनंप्रतित्वद्विनामथितुमुत्सहामहे॥ यःसुरैरितिसुरौघवल्लभो

व२

कल्पवैश्चजगादेजगत्पतिः ॥८३॥ यंसमेत्यचललाटरेखयाविभ्रतःसपदिशंभुविभ्रमं ॥ चंडमारु
तमिव॰प्रदीपवच्चेदिपस्यनिरवापिलोचनं ॥८४॥ नात्तगंधमवधूयशत्रुभिश्छाययाचवश
मितामरश्रमं ॥ योभिमानमिवहृत्तविद्विषःपारिजातमुदमूलयद्दिवः ॥८५॥ यःकोलतांव
ल्लवतांचविभ्रद्दंष्ट्रामुदस्याशुभुजांचगुर्वीं ॥ मग्नस्यतोयापदिदुस्तरायांगोमंडलस्योद्धरणं
चकार ॥८६॥ धन्योसियस्यहरिरेषसमक्षएवदूरादपिक्रतुषुयज्वभिरिज्यतेयः ॥ दत्वार्घम
त्रभवतेभुवनेषुयावत्संसारमंडलमवाप्नुहिसाधुवादं ॥८७॥ भीष्मोक्तंतदितिवचोनिश
म्यसम्यक्साम्राज्यश्रियमधिगच्छतान्नृपेण ॥ दत्तेऽर्घेमहतिमहीभृतांपुरोपित्रैलोक्यम
धुभिदँनर्घ्यएव ॥८८॥ इतिश्रीशिशुपालवधेमहाकाव्येमाघकृतौयज्ञसमाप्तिवर्णनंनामचतुर्दशः

मूद

सर्गः॥१५॥ अथतत्रपांडुतनयेनसदसिविहितंमधुद्विषः॥ मानमसह चेदिपतिः परवृद्धिमत्स
रिमनोहिमानिनां॥१॥ पुरएवशार्ङ्गिणिसवैरमथपुनरमुंतदर्चया॥ मन्युरभजदवगाढ
तरः समदोषकालइवदेहिनंज्वरः॥०२॥ अभितर्जयन्निवसमस्तनृपगणमसावकंपय
त॥ लोलमुकुटमणिरश्मिशिखे प्रकंपितजगत्त्रयंशिरः॥०३॥ सवमन्नरुषाश्रुघनघ
र्मविगलदुरुगंडमंडलः॥ स्वेदजलकणकरालकरोव्यरुचत्प्रभिन्नइवकुंजरस्त्रिधा॥४॥
सनिकामघर्मितमभीत्तागमधुवद्वधूतराजकः॥ छिन्नवकुलजलविंदुवपुः प्रल
यार्णवोत्थइवादिसूकरः॥०५॥ त्वणमश्लिष्य घट्टितशैलशिखरकठिनांसमंडलः॥
स्तंभमुपहितविधूतिमसावधिकावधूनितसमस्तसंसदं॥०६॥ कनकांगद्युतिभि

स्पगामितमरुचत्पिशंगतां ॥ क्रोधमयशिखिशिखापटलैः परितः परीतमिववाङ्मंडलं ॥०७॥
कृतसंनिधानमिवतस्यपुनरपितृतीयचक्षुषा ॥ क्रूरमजनिकुटिलभ्रुगुरुभ्रुकुटीकठोरि
तललाटमाननं ॥०८॥ अतिरक्तभावमुपगम्यकृतम[illegible]तिरमुष्यसाहसे ॥ दृष्टिरग्रणीत
भयासिलतामवलंबतेस्मसमयासखीमिव ॥०९॥ करकुड्मलेननिजमूरुमुरुतरनगा
श्मकर्कशं ॥ त्रस्तचपलचलमानजनश्रुतभीमनादमयमाहतोद्विकैः ॥१०॥ इतिचुक्रु
धेभृशमनेननन्नुमहदवाप्यविप्रियं ॥ यातिविकृतिमपिसंवृत्तिमत्किमुयन्निसर्गदुर
वग्रहंमनः ॥११॥ प्रथमंशरीरजविकारकृतमुकुलबंधमव्यथी ॥ भाविकलहफलयो
गमसौवचनेनकोपकुसुमैर्व्यचीकसत् ॥१२॥ ध्वनयन्नसभामथसनीरघनरवगं

न४

९८ माघ० भीरवागभीः। वाचमवददितिरोषवशादितिनिष्ठुरस्फुरतराक्षरामसौ ॥५३॥ नसर्वए ९८ राम०
वसमवेक्ष्यकमपिगुणमेतिपूज्यतां॥ सर्वगुणराहितस्यहरेःपरिपूजयाकुरुनरेंद्र
कोगुणः॥५४॥ नमहानयंनचविभर्त्तिगुणसमतयाप्रधानतां॥ स्वस्यकथयतिचि
रायपृथजनतांजगत्यभिमानतांदधत्॥५५॥ रहितंकलाभिरखिलाभिरकृतरस
भावसंविदं॥ क्षेत्रविदमपदिशंतिजनाःपुरवास्यमे[illegible] नमगतंविदग्धतां॥५६॥ त्र
तिभूयसापिसुकृतेनदुरुपचरएषशक्यते॥ भक्तिशुचिभिरुपचारपरैरपिनगृहीतु
गि मभियोग्निर्नृभिः॥५७॥ व्रजतिस्वतामनुचितोपिसविनयमुपासितोजनैः॥ नि
त्यमपरिचितचिन्तयापर[illegible]एवसर्वजगतस्तथाप्ययं॥५८॥ उपकारिणंनिरूपका

रमरिमनरिमप्रियंप्रियं॥ साधुमितरमवुधंवुधमित्यविशेषतः सततमेषपश्यति॥१९॥
दुपकारकस्यदधतोपिवक्रगुणतयाप्रधानतां॥ दुःखमप्रनिशमयमाप्नुवतोनपर
स्यकिंचिदुपकर्तुमिच्छसि॥२०॥ स्वयमक्रियःकुटिलमेखलणामपिविधातुमक्ष
मः॥ भोक्तुमविरतमलज्जतयाफलमीहतेपरकृतस्यकर्मणः॥२१॥ यदृमेसमाश्र
यतिकश्चिदुदयविपदोर्निराकुलं॥ तस्यभवतिजगतीहकुतःपुनरुद्भवोविकर
णत्वमीदृषः॥२२॥ गुणवंतमप्ययमपास्यजनमखिलमव्यवस्थितेः॥ यातिसु
चिरमतिवालतयाधृतिमेकएवपरिवारितोजलैः॥२३॥ सुकृतोपिसेवकजन
स्यवक्रदिवसखिन्न चेतसः॥ सर्वजनविहितनिर्विदयंसकृदेवदर्शनमुपैतिक

९९
माघ०

स्यचित ॥२४॥ स्वजनेसखिष्वनुगतेषुनियतमनुरागवत्यपि ॥ स्नेहममृदुहृदयः
स्थापयन्निरपेक्ष एवसमुपैतिनिर्वृतिं ॥२५॥ स्ताणामेषराजसतयेवजगदुदयदर्शि
तोद्यमः ॥ सत्वहितकृतमतिस्तमसासहसाविनाशयतिसर्वसंपदः ॥२६॥ अभि
हन्यतेयदभिहंतिपरितपतियच्चतप्यते ॥ नास्यभवतिवचनीयमिदंचपलात्मि
काप्रकृतिरेवहीदृशी ॥२७॥ अतिसत्वयुक्तइतिपुंभिरयमतिशयेनवर्ण्यते ॥ स
त्त्वममतिभिरथचापगतेसमुपैतिनाल्पमपिसत्वसंकरं ॥२८॥ प्रलयंपरस्यमह
तोपिनियतमिहनिःसुखेगुणाः ॥ यांतिजगदपिसदोषमदःस्वरुचैवपश्यति
गुणान्द्विषन्नयं ॥२९॥ क्षितिपाठमंभसिनिमग्नमुदहरतयःपरःपुमान् ॥ ए

॥९९
राम

षकिलकैरबुधैरभिधीयमानमपितत्प्रतीयते॥३१॥नरसिंहमूर्त्तिरयमेवदितिसुतमदा
रयन्नखैः॥ आप्तवचनमिदमेतदपिप्रतिपत्तुमोमितिजनोयमर्हति॥३२॥अयमा
यतुंगमपिमानमुचितमवलंब्यनीचतां॥स्वार्थकारणपटुरेषपुराबलिनापरेणस
हसंप्रयुज्यते॥३२॥क्रमतेनभारनसयैवविरचयतिविश्वरूपतां॥सर्वमतिशययगतं
कुरुतेस्फुटमिंद्रजालमिदमेषमायया॥३३॥किलरावणारिरयमेवकिमिदमेवक
थ्यते॥सत्वमधि वलमधिद्युतियत्तदशेषमेषइतिधृष्टमुच्यतां॥३४॥चलतेषपादयु
गलेनगुरुशाकरमीषदस्पृशात॥देवकलितमथचोदलस्तब्बलितोरुभांडचयमा
त्मनेवतत॥३५॥स्कवतामुनास्तनयुगेनजनितजननीजनादरा॥स्त्रीत्विसदयमविध

यमनस्तदकारिसाधुयद्घानिपूतना॥३६॥ अभनक्क नूकथमिवैषकृतधरणीरिंगणाः
रणात्॥ वादमिदमपिनवालकृतंननुदेवताविधियंविजृंभते॥३७॥ विहरन्नवनेवि
जनएवमहतिदधदेषगोपतां॥ नामजगतिमधुसूदनइत्यगमद्धतेनमधुनामहीय
सा॥३८॥ अविमृश्यगोवधसमुत्थमघमयममीमिरडुषा॥ रिष्टमुपगुसमुपोढमदं
यदसोकिलासुरइतिप्रमार्ष्टितत॥३९॥ मुखवकंदरांतरगतापिविकरदशनेनके
शिना॥ नास्यसमपदियदश्वादिभुजस्तदसौतिरश्चिसहजैवमूढता॥४०॥ यदुदस्य
वाङ्मयमेकमभृतगिरिमद्भुतंनतत॥ भूरिसलिलमविषह्यमियंजलदेविमुंचति
गवांसभाग्यता॥४१॥ किमिवात्रचित्रमयमत्रमचलमाहकल्पितंयदि॥ प्राशनि

रिविलमखिलेपिजगत्सुदंगतेवकुभुजेस्यनव्यथा॥४२॥अमुनाकरेणपृथुदंतमुशलसुव
वानिदंतिनः॥तेनयदवधिसएवपुनर्वलशालिनांकइवतत्रविस्मयः॥४३॥शिशुरेवै व
शि त्तितनियुद्धकरणामकृतक्रियःस्वयं॥मल्लमलघुकठिनांसततैन्यवधीद्यदेष
तददृष्टकारितं॥४४॥यदयुध्यमानमपिसंतमुपहितासुरौघसाध्वसं॥कंसमभयमभयम
भ्यवधीत्समुदाजनेनतदपिप्रशस्यते॥४५॥इतिनिंदितुंकृतधियापिवचनममुनाय
दाददे॥स्तोतुमनिशमुचितस्यपरैःस्तुतिरेवसामधुंघातिनोऽभवत्॥४६॥यदुवा
चदुष्टमतिरेषपरिविवदिषुर्मुरद्विषं॥ह्वार्यमपिसदसिचेदिपतेस्तदतोपराधरा
णनामभगाद्वचः॥४७॥यदपूपुजःसदसिपार्थमुरजितमपूजितंसतां॥प्रेमविलसति

महत्तदहोदयितंजनःखलुगुणीतिमन्यते ॥४८॥ यदराज्ञिराजवदिहार्घ्यमुपहितमिदंम
धुद्विषि ॥ ग्राम्यमृगइवहविस्तदयंभजतेज्वलत्सुनमहीशवह्निषु ॥४९॥ अनृतांगिरं
नगदसीतिजगतिपटहैर्विघुष्यते ॥ निंद्यमथचहरिमर्चयतस्तवकर्मणैवविकसत्यस
त्यता ॥५०॥ तवधर्मराजइतिनामकथामिदमफल्गुष्टुनश्यते ॥ भौमदिनमभिदधत्यथ
वाभ्रशामप्रशस्तमपिमंगलंजनाः ॥५१॥ यदिवार्चनीयतमएषकिमपिभवतांपृथा
सुताः ॥ शौरिरवनिपतिभिर्निखिलैरवमाननार्थमिहकिंनिमंत्रितैः ॥५२॥ अथवा न
धर्ममसुबोधसमयमवयाथवालिशाः ॥ काममयमपिहवृथापलितोहतबुद्धिरप्रणिहि
तःसरित्सुतः ॥५३॥ स्वयमेवशांतनुतनूजॅयमपिगणामघ्यमभ्यधाः ॥ तत्रमुररिपुरप्यं

कतमोयमनिंद्यवेद्दिवदभिष्टुषेमघा ॥५४॥ अवनीभृतोत्वमपहायगात्तामतियऽसमुन्न
तं ॥ नीविनियतमिहयच्चपलोनियतःस्फुरंभवसिनिम्नगासुतः ॥५५॥ प्रतिपत्तुमंगाघय
तिचनतवनृपतियोग्यमर्हणं ॥ कृष्णकलयननुकोहमितिस्फुरन्मापदंपदमनात्मवेदि
ता ॥५६॥ असुरस्त्वयान्धवधिकोपिमधुरितिकथंप्रतीयते ॥ दंडदलितसरघःप्रथसेम
धुसूदनस्त्वमितिसूदयन्मधु ॥५७॥ मुचुकुंदतल्पशरणास्यमगधपतिशातितौजसः ॥ सि
द्धमवलसवलत्वमहोतवरोहिणीतनयसाहवर्यतः ॥५८॥ छलयन्प्रजास्त्वमनृतेन
कपटपटुरैंद्रजालिकः ॥ प्रीतिमनुभवसिनप्रजितःसुतयेष्टसत्यइतिसंप्रतीयसे
॥५९॥ बहुशोरणेषुपरचक्रमथितयदुचक्रसंपदा ॥ साधुयदिदमयशःसकलंध्रियते

करेणपरिमंडलं त्वया ॥६०॥ धृतवान्न चक्रमरिचक्रभयचकितमाहवे निजं ॥ चक्रधर इति
रथांगमदः सततं विभर्षि भुवनेषु रूढये ॥६१॥ जगति श्रिया विरहितोपि यदुदधिसु
तामुपायथाः ॥ ज्ञातिजनजनितनामपदं त्वमतः श्रियः पतिरिति प्रथामगाः ॥६२॥
पृथिवीं बभर्थ यदि पूर्वमिदमपि गुणाय वर्त्तते ॥ भूमिभृदिति परिहारितनूस्त्वमुद्दा
क्रियस्त्व कथमन्यथा जनैः ॥६३॥ तव धन्यतेयमपि सर्वनृपतितुलितोपि यत्क्लां ॥
क्लांतकरतलधृताचलकः पृथिवीतले तुलितभूभृदुच्यसे ॥६४॥ अभिधां तु संयति
कदाचिदविहितपराक्रमोपियत् ॥ व्योम्नि कथमपि च कर्थ्यपदं व्यपदिश्यसे जग
ति विक्रमीत्यतः ॥६५॥ त्वमशक्नुवन्नशुभकर्मनियतपरिपाकदारुणां ॥ जेतुमकु

शलमतिर्निरकंयशसेधिलोकमजयःसुतंभुवः॥६६॥सकलैर्वपुःसकलदोषसमुदि
तमिदंगुणैस्तव॥त्यक्तमपगुणगुणत्रितयत्यजनप्रयासमुपयासिकिंमुधा॥६७॥त्व
यिपूजनंजगतिजाल्मकृतमिदमपाकृतेगुणैः॥हासकरमघटतेनितरांशिरसीव
कंकणमपोढमूर्द्धजे॥६८॥मगविद्विषामिवयदित्थमजनिमिषतांपृथासुतेः॥त्रसव
नशुनइवापचितिःपरिभावएषभवतांभुवोऽधिपाः॥६९॥अवधीज्जनेगामहेवेषयदि
हतद्वेषोद्वेषरुषा॥स्पर्शमशुचिवपुरर्हतिनप्रतिमाननांतुनितरांनृपोचितां॥७०॥यदि
नांगनेतिमतिरस्यमृदुरजनिघ्नतनांप्रति॥स्तन्यमघ्नगामनसःपिवतःकिलधर्मतोभव
तिसाजनन्यपि॥७१॥शकटव्युदासतरुभंगधेनुकाधरधारणादिकं॥कर्मयदयमकरो

त्तरलः स्थिरचेतसां कउ्वतेन विस्मयः ॥७२॥ अयमुग्रसेनतनयस्य नृपपशुरसुरः पश्रूतवन्
॥ स्वामिवैमसुकरं पुरुषैः कुरुते स्मयत्परममेतदद्भुतं ॥७३॥ इति वाचमुद्धतमुदीर्य्य स
पदि सहवेणुदारिणा ॥ सोढरिपुबलन्नरोसहनः स जहास दत्तकरतालमुच्चकैः ॥७४॥
कटुनापि चैद्यवचनेन विकृतिमगमन्न माधवः ॥ सत्यनियतवचसं वचसा सुजनं जनाश्च
लयितुं कईशाते ॥७५॥ न च तं तदातिशयमानमप्रियदुन्नृपाः प्रचुक्रुधुः ॥ शौरिसमयनि
गृहीतधियः प्रभुचित्तमेव हि जनोनुवर्त्तते ॥७६॥ विहितागसो मुहुरलंघ्यनिजवचन
दामसंजतः ॥ तस्य कथितइति तत्प्रथमं मनसा समरव्यदमराधमच्युतः ॥७७॥ स्म
तिवर्त्मतस्य न समस्तमपकृतमियाय विद्विषः ॥ स्पर्द्धुमधिगतगुणास्मरणाः पर्व

नदोषमखिलंखलस्तमाः ॥७८॥ नृपतावधिक्षिपतिशौरिमथसुरसरित्सुतो वचः ॥ प्र
ह्वलयतिभुवंमरुतिक्षुभितस्यनादमनुकुर्वदंबुधेः ॥७९॥ विहितंमयाद्यसदसादम
पमर्षितमच्युतार्चनं ॥ यस्यनमयतुसचापमयंचरणः कृतः शिरसिसर्वभूभृतां ॥८०॥
इतिभीष्मभाषितवचार्थमधिगतवतामिवक्षणात् ॥ क्षोभमगामदतिमात्रमथो शि
शुपालपक्षपृथिवीभृतांगणः ॥८१॥ शितितारकानुमितताम्रनयनमरुणीकृतंरुषा ॥
वाणावदनमुदरीपिभियेजगतः सकीलमिवसूर्यमंडलं ॥८२॥ अनिशांतवैरदहने
नविरहितवतांतराईतां ॥ कोपमरुदभिहतेनभृशंनरकात्मजेनतरुणेवजज्वले ॥८३॥ अ
भिषेत्स्यतः किमपिराजवदनविकृतंव्यभाव्यत ॥ ग्रस्तुशशधरमिवोपलसत्स्मितदंतपं

क्तिमुखमुत्तमौजसः॥८४॥ प्रविदारितारुणतरोग्रनयनकुसुमोज्ज्वलं स्फुरन्॥ प्रातरहिमक
रताम्रतनुर्विषद्रुमोपरइवाभवद्द्रुमः॥८५॥ कुपिताकृतिं प्रथममेव हसितमशनैरसूचय
त् क्रुद्धमशनिदलिताद्रितटध्वनिदं तव क्रमरिचक्रभीषणं॥८६॥ प्रतिभिद्यकुतो
४२ पिसमुपेत्य नृपतिगणं समाश्रयन्॥ ऊर्मिहरणजनितोनुशयः समुदाचचार निजस्व
रुक्मिणः॥८७॥ चरणेन हंति सुबलः स्म शिथिलितमहीध्रबंधनं॥ तीरतरलजलराशिज
लामवभुग्नभोगिफणामंडलां भुवं॥८८॥ रुषितेषुराजसुतयापरिथचरणापातिपूज १०४
या॥ चिरकलितकलहागमनो मुदमाप किः सुहृदिवाधिकां दधौ॥८९॥ गुरुकोप राम०
रुद्धपदमापदसितयनस्य रोद्धतां॥ व्यात्तमशितुमिव सर्वजगद्विकरालमास्यकुहरं

विवस्तत ः॥९०॥ विवृतोरुवाङ्कुपरिघोणसरभसपदं निपित्सता॥ हंतुमखिलन्नृपतीन्व
सुनावसने विलंबिनि निजे विवस्वले॥९१॥ इति तत्तदा विकृतरूपमनन्नजकविभित्रचेत
सं॥ मारवलमिवभयंकरतां हरिवीधिसत्वमभिराज्ञमंडले॥९२॥ रजनसादुदस्थुरथपुष्ठ
मनुवित्तभियो भिलाषुकाः॥ सांद्रमुकुटकिरणछुरितस्फटिकांशवः सदसि मेदिनीभृतः
॥९३॥ स्फुरमाणनेत्रकुसुमोष्ठदलमभृतभ्रूस्रदंह्रिपैः॥ धृतपृथुभुजलतंवलितैर्द्रुतवात
वातवनविभ्रमं सदः॥९४॥ हरिमप्यमंस्त नतगात्रकुरुपतिमजीगणन्नवा॥ मानवुलित
भुवनत्रितयाः सरितः सुतादविभयुर्नभर्भृतः॥९५॥ गुरुनिश्वसन्नथविलोलसत्वथुवपु
विचोविषे॥ कीर्णदशनकिरणाग्निकणाः प्रणवानिवेति विससर्ज चेदिपः॥९६॥ किमहो

१०५
माघ०

नृपाः सममभीभिरुपपतिसुतैर्नृपंचभिः ॥ वध्यमभिहतनुजिष्यमिमंसहध्वानयास्व
विराजकन्यया ॥९७॥ अथवालमेवखलुपूयमगणितमरुणौजसः ॥ वस्तुवि
यदिदमयंनमद्धेममकेवलस्यमुखमीक्षितुंक्षमः ॥९८॥ विदलुर्यमुत्तममशेषपरि
षदिनदीजधर्मजौ ॥ यातुनिकषमधियुद्धमसौवचनेनकिंभवतिसाध्वसाधुवा ॥९९॥
अचिरान्मयासहगतस्यसमरमुरगारिलक्ष्मणः ॥ तीक्ष्णविशिखपीतमसृक्पततांग
णाः पिबतुसाकमुर्वरा ॥१००॥ अविधायरूढमितिमास्मगामइतिहृष्यासुतेरितं ॥ वाच राम०॥
मनुनयपरांसततः सहसावगम्यनिरियायसंसदः ॥१०१॥ गृहमागतायकृपयाचकथ
मपिनिसर्गदक्षिणाः ॥ क्षांतिसहितमनसोजननीस्वसुरात्मजायचुकुपुर्नपांडवाः ॥१०२॥

य३

चलितं ततो नभिहते ध्रुवमवनिं यत्र भ्रमितस्तूर्णं अथ यथयुमिवाद्युयथुर्दमघोषसू
नुमवनीशसूनवः ॥१०३॥ विशिखांतराण्यतिपपात सपदि जवनैः स वाजिभिः ॥ द्रुत
मलघुरन्नसाप्यतितावनिताश्चकार न सकामचेतसः ॥१०४॥ त्वरणामीक्षितः पथि जवेन
किमिदमिति जल्पता मिथः ॥ प्राप्य शिबिरमविशोकिमनाः समनीनहद्द्रुतमनीकिनी
मसौ ॥१०५ त्वरमाणशांखिकसवेगवदनपवनाभिपूरितः ॥ शैलकरकतटभित्त्ररवः
प्रणानादसान्नहनिकोस्यवारिजः ॥१०६॥ जगदंतकालसमवेतविशदविषमेरितारवैः ॥
धीरनिजस्थ्यहृलविलीनगुरुप्रतिशब्दमस्यणात्तूर्यमावधि ॥१०७॥ सहसास

शूरःशौरिरिशिशिशैरैराशाशैराम्युराशिशः॥ शशारुःश्रीशरीरेशःशुश्रूरेरिशिरःशरैः॥१०९॥द्विः॥
व्यक्तासीदरितारीतांयन्नदीयास्त्वदामुकः॥ मनोहृतोपिहृदयेलेगुरेषांनपत्रिणः॥११०॥
नामाक्षराणांमालानांमाभूद्भंगुरतःस्फुटं॥ अग्रहृतपरागाणांमस्तनस्तेनमार्गणाः॥१११॥
गतालब्धः॥ आच्छिद्ययोधसार्थस्यप्राणान्सर्वस्वमाशुगाः॥ ऐकागारिकवन्मोदंराज्ञ
मुरदर्शनं॥११२॥ भीमास्त्रराजिनस्तस्यबलस्यध्वजराजिनः॥ कृतघोराजिनश्चक्रेभुवः
सरुधिराजिनः॥११३॥ मांसव्यधोचितमुखैःशून्यतांदधदक्रियं॥ शकुंतिभिःशात्रव
लेख्यार्पितस्येषुभिर्नभः॥११४॥ दाददोदुद्ददुद्दादीदाददोदूददीददोः॥ दुद्दादंदद
देदुद्देददादददोददः॥११५॥एकाक्षरानुप्रासः॥ कृतेभकुंभोरसिजैत्रदद्यसत्तजन्मभिः

र्थं ५

श्रावर्त्तयन्त्रदारस्कैर्हिंषांतद्योषितांचसः ॥११५॥ सदामदबलप्रायः समुद्धतरसोबभौ ॥
प्रतीतविक्रमः श्रीमान्हरिर्हरिरिवापरः ॥११६॥ अर्थत्रयवाची ॥ द्विधात्रिधाचतुर्द्धाचतमे
कमपिशात्रवः ॥ पश्यंतः स्पर्द्धयासद्यः स्वयंपंचत्वमाययुः ॥११७ सदेवसंपन्नवपूरणो
षुसदेवसंपन्नवपूरणोषु ॥ महोदधेस्तारिमहानितांतंमहोदधेस्तारिमहानितांतं ॥११८
संपुटयमकः ॥ उद्वेष्टकृत्वांपतत्रिणः शार्ङ्गपाणेरत्याधोमुरवंप्राविशन्नाभूमिमाश्रु ॥ शु
द्धायुद्धानांवैरिवर्गस्यमध्येभर्त्रीत्तिष्ठानामेतदेवानुरूपं ॥११९॥ सत्वंमानविशिष्ट
माजिरभसादालंब्यभव्यः पुरोलब्धाघस्स्वयमुद्धिरतस्श्रीवत्सभूमिर्मुदा ॥ मुक्त्वाका
ममपास्तभीः परमृगव्याधः सनादेहरेरक्रोद्यैः समकालसंभ्रमविलोलसकल

१०७
माघ०

जनतासमाकुले ॥ स्थानमगमदथततपरिस्खलितोडुमंडलनभस्थलोपमां ॥१२०॥ दधतोभ
यानकलस्वरत्वमुपगतवतः समानतां ॥ धूमपटलपिहितस्यगिरेः सममवाप्यवसपदि
मेदिनीभृतः ॥१२१॥ परमोहिनापरिजनेनकथमपि चिरादुदाहृतं ॥ वर्म्मकरयुगलेनवृ
हत्तनुचूर्णपेषमपिषद्युषापरः ॥१२२॥ रणसंभ्रमोदयविकासिबलकलाकुलीकृते ॥ शा
रिमशाकदधिरोपयितुंद्विरदेमदच्युतिजनः कथंचन ॥१२३॥ परितश्च्युधौतमुखरुक्मवि
लसदहिमांशुमंडलाः ॥ तनुरतनुवपुषः पृथिवीं स्फुरलत्स्यतेजसइवात्मजाः श्रि
यः ॥१२४॥ दधतः शशांकितशशांकरुचिलसदुरश्छदंवपुः ॥ चक्रुरथसपुरंध्रिजनै
रयथार्थसिद्धिसरकंमहीभृतः ॥१२५॥ दयितायसासवमुदस्तमपतदयसादिनःक

कले४
१०७
राम०

सात्॥ कांस्यमुपहितसरोजपतद्भ्रमरौघझारगुरुराजयोषितः॥१२६॥ भ्रंशमंगसादमरुणात्वमपि
चसुदृशः कपोलयो[illegible]॥ मस्सकलमपास्यमदं विदधुस्तदीयगुणमात्मनाशुचः॥१२७॥ मु
दृशः समीकगमनाय युवनिरथ संवभाषिरे॥ शोकपिहितगलरुद्धगिरस्त्ररसाश्रुजलके
वलोत्तराः॥१२८॥ विपुलाचलस्थलघनेन जिगमिषुभिरंगनाः॥ पीनकुचतट निपीडदल[illegible]
हारवाणावारमुरसालिलिंगिरे॥१२९॥ नमुमोचलोचनजलानि दयितजयमंगलेप्सिणी॥ या
तमवनिमवसन्नभुजान्त्रगलद्विवेदवलयं विलासिनी॥१३०॥ प्रविवत्समतः प्रियतमस्यनि
गउमिवचक्षुरुद्धिपत॥ नीलनलिनदलदाममरुचिप्रहितयादयुग्ममचिरोढसुंदरी॥१३१॥
व्रजतः कृतात्तव्रजसीतिपरिपरिचयगतार्थमस्फुटे॥ धैर्यमभिनदुदितं शिशुनाजन

१०८
माघ०

विवृद्ध१ रमरां२

नीनिभर्त्सनैर्मन्युना ॥१३२॥ शठनाकलोकललनाभि[illegible]रविरतरसैरिरंसत । तेन वहसि
मुदमित्यवददङ्गणा रागिणी गिरमीर्ष्ययापरा ॥१३३॥ ध्रियमाणमप्यगलदश्रु चलति दयिते न त
च्छ्रवः स्नेहमकृतकरसं दधतामिदमेव युक्तमतिमुग्धचेतसां ॥१३४॥ सहकज्जलेन विररा
जनयनकमलांबुसंततिः ॥ गंडफलकमभितः सुतनोः पदवीव शोकमयकृष्णवर्त्मनः गा५
॥१३५॥ क्षणमात्ररोधिचलितेन कतिपयपदं न तच्छ्रवः ॥ स्रस्तभुजयुगलवलयस्वनितं
प्रतिकूजितामिवोपशुश्रुवे ॥१३६॥ अनुवर्त्म वल्लभजनस्य विगलदमलायतांशुकं ॥ भूमि रामं०
नभसि रभसेन यती विरराज काचन समं महोल्कया ॥१३७॥ समरोन्मुखे नृपगणेपि त
दनुसरणोद्यतैकधीः ॥ दीनपरिजनकृताश्रुजलो न जरीजनः स्थिरमना विचुस्तुवे ॥१३८॥

विदुषीवदर्शनममुष्ययुवतिरतिदुर्लभंपुनः॥ यांतमनिमिषमलग्नमनाःपतिमीक्ष
तेस्मभृशमादृशःपथः॥१४०॥ संप्रत्युपेयाःकुशलीपुनर्युधःसत्वेहमाशीरितिभर्तुरी
रिता॥ सद्यःप्रसह्यहितयेननेत्रयोःप्रत्याचचक्षेगलिताभरस्त्रिया॥१४१॥ काचित्कीलार
जोभिर्दिवमनुविद्धोमंदवक्त्रेंदुलक्ष्मीर्निःश्रीकाःकाश्चिदंतर्दिशइवदधिरेदाहमुद्भ्रां
तसत्वाः॥ भ्रेमुर्वात्याइवान्याःप्रतिपदमपराभूमिवत्कंपमापुर्व्यस्यानेपार्थिवानाम
शिवमितिपुरोभाविनार्य्यःशशंसुः॥१४२॥ इतिश्रीशिशुपालवधेमहाकाव्येमाघकृतौस्क
तिनिंदावर्णनंनामपंचदशःसर्गः॥१५॥ दमघोषसुतेनकश्चनप्रतिशिष्टःप्रतिभान
वानथ॥ उपगम्यहरिंसदस्पदःस्फुटभिन्नार्थमुदाहरद्वचः॥१॥ अभिधायतदातद

प्रियंशिशुपालोनुशयंपरंगतः ॥ भवतोभिमनाःसमीहतेसरुषःकर्तुमुपेत्यमाननं ॥०२॥
विपुलेननिपीड्यनिर्दयंमुदमायातुनितांतमुन्मनाः ॥ प्रचुराधिगतांगनिर्वृतिंपरित
स्त्वांखलुविग्रहेणसः ॥०३॥ प्रणतःशिरसाकरिष्यतेसकलैरंत्यसमंनराधिपैः ॥ तवशास
नमाशुनृपतिःपरवानद्ययतस्त्वयैवसः ॥०४॥ अधिवह्निपतंगतेजसोनियतस्त्वांतस
मर्थकर्मणः ॥ तवसर्वविधेयवर्तिनःप्रणतिंबिभ्रतिकेनभूभृतः ॥०५॥ जनतांभयशून्य
धीःपरैरभिभूतामवलंबसेयतः ॥ तवकृष्णगुणास्ततोनरैरसमानस्पदधत्यगण्यतां ॥०६॥
अहितादनपत्रपस्त्रसन्नतिमात्रोज्झितभीरनास्तिकः ॥ विनयापहितःकुतस्त्व
यासदृशोन्योगुणवानविस्मयः ॥०७॥ कृतगोपवधूरतेर्घ्नतोवृषमुग्रेनरकेपिसंप्रति ॥

प्रतिपत्तिरधःकृतैनसोजनताभिस्तवसाधुवर्ण्यते॥०८॥विहितापचितिर्महीभृताद्विषता
माहितसाध्वसोवलैः॥भवसानुचरस्त्वमुच्चकैर्महतामप्युपरिक्षमाभृतां॥०९॥घनजाल
निभैर्दुरासदाःपरितोनागकदंवकैस्तव॥नगरेषुभवंतुवीथयश्चपरिकीर्णावनजैर्मृगादि
भिः॥१०॥सकलापिहितस्वपौरुषोनियतव्यापदवर्द्धितोदयः॥रिपुरुन्नतधीरचेतसः
सततव्याधिरनीतिरस्तुते॥११॥विकचोत्पलचारुलोचनस्तववचैद्येनघटामुपेयुषः॥यदुपुं
गववंधुगौरवादपिपाताससुरोनवासवः॥१२॥ चलितानकदुंदुभिःपुरःसवलस्त्वंस
हसारणेनतां॥ समितौरणसादुपागतंसगदःसंप्रतिपत्तुमर्हसि॥१३॥समरेषुरिपून्वि
घ्नताशिशुपालेनसमेत्यसंप्रति॥सुचिरंसहसर्वसात्वतैर्भवविश्वस्तविलासिनीजनः॥१४॥

विजितक्रुधमीक्षितापसौमहतांत्वामहितंमहीभृतां॥असहूजितसंयतंपुरोमुदितःसंप्र
दंमहीपतिः॥१५॥इतिजोषमवस्थितंद्विषःप्रणिधिंगामभिधायसात्यकिः॥वदतिस्मव
चोथचोदितश्चलितैकभ्रूरथांगपाणिना॥१६॥मधुरंवहिरंतरप्रियंकृतिनावाचिवचस्तया
त्वया॥सकलार्थतयाविभाव्यतेप्रियमंतर्बहिरप्रियंयथा॥१७॥अतिकोमलमेकतोन्यतः
सरसांभोरुहवृंतकर्कशं॥वहतिस्फुटमेकमेवतेवचनंशाकपलाशदेश्यतां॥१८॥प्रक
टंमृदुनामजल्पतःपरुषंवस्त्रयतोर्थमंतरा॥शकुनादिवमार्गवर्त्तिभिःपुरुषादुद्विजि
तव्यमीदृशः॥१९॥हरिमर्च्चितवान्महीपतिर्यदिराज्ञस्तवकोत्रमत्सरः॥न्यसनायसु
सोरन्नस्यकस्तरसस्तनुसूपशिरस्यसूयति॥२०॥सुकुमारमहोलघीयसांहृदयंतद्गतमप्रियं

यतः॥ सहसैवसमुन्नतिंत्वमीजरयंत्येवहितन्मनस्विनः॥२१॥ उपकारपरःस्वभावतः
सततंसर्वजनस्यसज्जनः॥ असतामनिशंतथाप्यहोगुरुहृद्रोगकरीतदुन्नतिः॥२२॥
परितप्यतएवनोत्तमःपरितप्तोप्यपरःसुसंवृतिः॥ परिवृद्धिभिराहितव्यथःस्फुटनिर्भि
न्नदुराशयोधमः॥२३॥ अनिराकृततापसंपदंफलहीनांसुमनोभिरुज्झितां॥ खलतांख
लतामिवासतींप्रतिपद्येतकथंबुधोजनः॥२४॥ प्रतिवाचमदत्तकेशवःशपमाना
यनचेदिभूभृते॥ अनुहुंकुरुतेघनध्वनिंनहिगोमायुरुतानिकेशरी॥२५॥ जित
रोषयामहाधियःसपदिक्रोधजितोलघुर्जनः॥ विजितेनजितस्यदुर्मतेर्मतिमद्भिःसहका
विरोधिता॥२६॥ वचनैरसतांमहीयसोनखलुव्येतिगुरुत्वमुद्धतैः॥ किमपैतिरजोभि

रोर्वैरिरवकीर्णस्यमणेर्महार्घता॥२७॥ परितोषयितानकश्चनस्वगतोयस्यगुणोस्तिदेहि
नः॥ परदोषकथाभिरल्पकःस्वजनंतोषयितुंकिलेच्छति॥२८॥ सहजांधदृशःस्वदुर्न
येपरदोषेक्षणदिव्यचक्षुषः॥ स्वगुणोच्चगिरोमुनिव्रताःपरवर्णग्रहणेष्वसाधवः॥
२९॥ प्रकटान्यपिनैपुणंमहत्परवाच्यानिचिरायगोपितुं॥ विवरीतुमथात्मनोगुणान्
ल५ भृशौमार्य्यचेतसां॥३०॥ किमिवाखिललोककीर्त्तितंकथयत्यात्मगुणंमहामनाः॥ वदि
तानलघीयसोपरःस्वगुणंतेनवदत्यसौस्वयं॥३१॥ विसृजंत्यविकत्थिनःपरेविषम
शीविषवन्नराःक्रुधं॥ दधतोंतरसारसूपतांध्वनिसाराःपटहाइवेतरे॥३२॥ नरकच्छिदमि
च्छतीक्षितुंविधिनायेनसचेदिभूपतिः॥ द्रुतमेतुनहापयिष्यतेसदृशंतस्यविधातु

मुत्तरं ॥३३॥ समनन्तु किमंग भूपतिर्यदि संधित्सुरसौ सहामुना ॥ हरिराक्रमणेन संनतिं कि
ल विश्रीत भियेत्य संभवः ॥३४॥ महतस्तरसा विलंघयन्निजदोषेण कुधीर्विनश्यति ॥ कु
रुतेन रवलु स्वयेच्छया शलभानिंधनमिंधदीधितिः ॥३५॥ यदपूरि पुरा महीपतिर्न मुखे
न स्वयमागसां शतं ॥ अथ संप्रति पर्यपुपूरत्तदसौद्भुतमुखेन शार्ङ्गिणः ॥३६॥ यदन ति५
गलगोपुराननस्त्वमितो वस्यसि किंचिदप्रियं ॥ विवरिष्यति तद्विरस्यनः समयोद्धीत्तण
रक्षिताः क्रुधः ॥३७॥ निशमय्य तदूर्जितं शिनेर्वचनं नम्रुरनाम्रुरेन सां ॥ पुनरुज्झि
तसाध्वसं द्विषामभिदत्ते स्म वचो वचोहरः ॥३८॥ विविनक्ति न बुद्धिदुर्विधः स्वयमेव
स्वहितं पृथग्जनः ॥ यदुदीरितमप्यदः परैर्न विजानाति तदद्भुतं महत् ॥३९॥ विदुरेष्यदपा

यमात्मनापरतः श्रद्दधतेथवाबुधाः ॥ नपरोपहितंनचस्वतः प्रमिमीतेनुभवादृतेल्पधीः ॥४०॥
कुशलंखलुतुभ्यमेवतद्वचनंकृष्णयदभ्यधामहं ॥ उपदेशपराः परेष्वपिस्वविनाशाभिमुखे
षुसाधवः ॥४१॥ उभयंयुगपन्मयोदितंत्वरयासांत्वमथेतरच्चते ॥ प्रविभज्यपृथग्मनीषया
स्वगुणंयत्किलतत्करिष्यसि ॥४२॥ अथवाभिनिविष्टबुद्धिषुव्रजतिव्यर्थकतांसुभाषितं
॥ रविरागिषुशीतरोचिषः करजालंकमलाकरेष्विव ॥४३॥ अपिनेन्द्यगुणागुणांजनः
स्वरुचिंनिश्चयतोनुधावति ॥ अपहायमहीशमार्चिचत्सदसित्वांननुभीमपूर्वजः
॥४४॥ त्वयिभक्तिमतानसत्कृतः कुरुराजागुरुरेवचेदिपः ॥ प्रियमांसमृगाधिपो
ज्झितः किमवद्यः करिकुंभजोमणिः ॥४५॥ क्रियतेधवलंखलूच्चकैर्धवलैरेवसिते

तैरेरधः॥ शिरसोघमधत्तशंकरःसुरसिंधोर्मधुशत्रुरंघ्रिणा॥४६॥ अबुधैःकृतमानसं
विदस्तवपार्थैःकुतएवयोग्यता॥ महसिज्ञवगैरूपामितंनहिगुंजाफलमेतिसोष्मतां
॥४७॥ अपराधंत्तस्मेन्नृपःस्तमयात्येति [illegible] भवंतमेकया॥ कृतवत्यपिभीष्मकात्म
जांत्वयिवत्तामसमर्थएवमन्॥४८॥ गुरुभिःप्रतिपादितांवधूमपकृत्यस्वजनस्यभू
पतेः॥ जनकोसिजनार्दनस्फुटंहतधर्मार्थतयामनोभुवः॥४९॥ अनिरूपितरूपसंप
दस्तमसोवान्यभृतच्छदछवेः॥ तवसर्वगतस्यसंप्रतिक्षितिपःक्षिप्नुरभीषुमानिव॥५०॥
क्षुभितस्यमहीभृतस्त्वयिप्रशमोपन्यसनंवृथाममम॥ प्रलयोज्वलितस्यवारिधेःपरि
वाहोजगतःकरोतिकिं॥५१॥ प्रहितःप्रध [illegible] नायमाधवानहमाकारयितुंमहीभृता॥ नय

रेषुमहौजसश्छलादपकुर्वंतिमलिम्लुचाइव॥५२॥तदयंसमुपैतिभूपतिःपयसांपूर
इवानिवारितः॥अविलंवितमेधिवेतसस्तरुवन्माधवमास्मनन्म्यथाः॥५३॥परिया
तिसकेवलंशिशूनितितन्नामनिमास्मविश्वसीः॥तरुणानपिरक्षतिक्षमीसशर
ण्यःशरणागतान्द्विषः॥५४॥नविदध्युरशंकमप्रियंमहतःस्वार्थपराःपरेकथं॥भजते
कुपितोप्युदारधीरनुनीतिंनतिमात्रकेणसः॥५५॥हितमप्रियमिछसिश्रुतंयदि
संधत्स्वपुराविनश्यसि॥अनृतैरथदुष्यसिश्रियैर्जितयाज्जीविभवावनीश्वरः॥५६॥
प्रतिपक्षजिदप्यसंशयंयुधिचैद्येनभवान्विजेष्यते॥ग्रसतेहितमोपहंमुहुर्ननु
राहुराह्वमहर्पतिंतमः॥५७॥अचिराज्जितमीनकेतनोविलसद्वृष्णिगणैर्नमस्कृतः॥

क्षितिपः क्षपितोद्धतांधकोहरलीलां सविडंवयिष्यति ॥५८॥ निहतोन्मददुष्टकुंजराद्द
धतोभूरियशः क्रमार्जितं ॥ नविभेतिरणोहरेरपिक्षितिपःकागणनास्पदृष्टिषु ॥५९॥
नतदद्भुतमस्ययन्मुखंयुधिपश्यंतिभयान्नशात्रवः ॥ ड्वतांनतुदृष्टपृष्ठमीक्षतेतवदनेसोपि
नजातुविद्विषां ॥६०॥ प्रतनूल्लसिताचिरद्युतः शरदंप्राप्यविखंडितायुधाः ॥ दधतेगिरिभि
रस्यतुल्यतांयदिनासारभृतः पयोभृतः ॥६१॥ मलिनंरणरेणुभिर्मुहुर्द्विषतांक्षालि
तमंगनाश्रुभिः ॥ नृपमौलिमरीचिवर्णकैरथयस्यांघ्रियुगंविलिप्यते ॥६२॥ समराय
नितांतकर्कशंक्षणमाकृष्टमुपैतियस्यच ॥ धनुषासममाशुविद्विषांकुलमाशंकित
भंगमानितिं ॥६३॥ तुहिनांशुममुंसुहृज्जनाः कलयंत्युग्रकरंविरोधिनः ॥ कृतिभिः

कृतदृष्टिविभ्रमाः स्रजमेके भुजगं यथापरे ॥६४॥ दधतोस्तु भलस्यागमास्तनुमेकांतरता
मसमानुषीं ॥ भुवि संप्रतमप्रतिष्ठिताः सदृशायस्य सुरेरातयः ॥६५॥ अतिविस्मय
नीयकर्मणो नृपतेः पथ्यविरोधिचेष्टितं ॥ यदमुक्तनयो नयत्यसावहितानां कुल
मक्षयं क्षयं ॥६६॥ चलितोर्ध्वकबंधसंपदो मकरव्यूहनिरुद्धवर्त्मनः ॥ अतरत्स्वभुजौ
जसा मुहुर्महतः संगरसागरानसौ ॥६७॥ नचिकीर्षति यः स्मयोद्धतान्नृपतिस्तत्व
रतोपगां शिरः ॥ चरणं कुरुते गतस्मयः स्वयमस्यावेव तदीयमूर्द्धनि ॥६८॥ स्वभुजद्वय
केवलायुधश्चतुरंगामपहाय वाहिनीं ॥ वरुणः सह शाक्रदंतिना सवलुद्दंतमगाच्छदा
हवे ॥६९॥ अविचालितचारुचक्रयोरनुरागादुपगूढयोः श्रिया ॥ युवयोरिदमेवभि

द्युतेयदुर्येंद्रस्त्वमतीडएवसः॥७०॥भरतभूतिरहीनभोगभाक्कविजितानेकपुरोपिविद्विषां॥रुचि
मिंदुदलेकरोत्यजः परिपूर्णंदुरुचिर्महीपतिः॥७१॥नयतिद्रुतमुद्धतिश्रितंप्रसभंभंगमभंगुरोद
यः॥गमयत्यवनीतलस्फुरद्भुजशाखाभृतमन्यमुन्नतिं॥७२॥अधिगम्यचंद्रमंतराजन
यन्नमंडलभेदमंततः॥खनतिक्षतसंहतिः क्षणादपिमूलानिमहांतिकस्यचित्॥७३॥घन
पत्रभृतोनुगामिनस्तरसाकृष्यकरोतिकांश्चन॥द्रुतमप्यपरंप्रतिष्ठितंप्रतिकूलंनितरांनि
रस्यति॥७४॥इतिशरद्स्वोदकस्ययःसरितांप्रावृषिजस्तरद्रुमैः॥क्वचनापिमहानखंडित
प्रसरः क्रीडतिभूभृतांगणेः॥७५॥कुलकं॥अलघूपलपंक्तिशालिनीः परितोरुद्धनिरंतरां
वराः॥अधिरूढनितंबभूमयोनविमुंचंतिचिरायमेखलाः॥७६॥कटकानिभजंतिचारुभि

नवमुक्ताफलभूषणोर्भुजैः॥ नियतंदधतेचचित्रकैरवियोगंपृथुगंडशैलतः॥७७॥ इतिय
स्यसंसंपदः पुरायदवपुःसदनेष्वरिस्त्रियः॥ स्फुरदेवसमस्तमाश्रितास्तदिदानीम
वनीश्रमूर्द्धसु॥७८॥कुलकं॥ महतःकुकुरांधकद्रुमानतिमात्रेदववद्दहन्नपि॥ अतिचि
त्रमिदंमहीपतिर्यदकृष्णामवनींकरिष्यति॥७९॥ परितःप्रमिताक्षरापिसर्वंविषयं
व्याप्तवतीगताप्रतिष्ठां॥ नखलुप्रतिहन्यतेकुतश्चित्परिभाषेवगरीयसीयदाज्ञा॥८०॥
यामूढवान्वराहमूर्त्तिर्मुहुरुन्नेमादौपुरुषःपुराणः॥ तेनोद्धृतेसांप्रतमत्रतेवच्छत
रिणासमग्रासौपुनर्भूः॥८१॥ भूयांसःक्वचिदपिकाममस्खलंतस्तुंगत्वंदधतिचय
द्यपिद्वयेपि॥ कल्लोलाःसलिलनिधेरवाप्यपारंशीर्य्यंतेनगुणमहोर्मयस्तदीयाः॥८२॥

लोकालोकव्याहतं धर्मरश्मेः शालीनं वा धाम नालं प्रसर्त्तुं ॥ लोकस्याग्रे पश्यतो धृष्टमाशु क्राम
त्युच्चैर्भूभृतो यस्य तेजः ॥८३॥ विच्छित्तिर्नवचंदनेन वपुषो भिन्नोधरो लक्तकैरच्छाच्छे पतितां
जने च नयने श्रोणी पृथौ लसन्मेखला ॥ प्राक्षोमौक्तिकहारमुन्नतकुचाभोगस्तदीयद्विषामित्थं नि
त्यविभूषणा युवतयः संपत्सु चापत्सु च ॥८४॥ विनिहत्य भवंतमूर्जितश्रीर्युधि सद्यः शिशु
पालतां यथार्थां ॥ रुदतां भवदंगनागणानां करुणां तः करणः करिष्यते सः ॥८५॥ इति श्री
शिशुपालवधे महाकाव्ये माघकृतौ षोडशः सर्गः ॥१६॥ श्री ॥छ॥ इतीरितवचसि वचस्विनामु
नामुगणस्य च्छुभितमरुज्झरीपसि ॥ प्रचुक्षुभे सपदि तदंबुराशिना समं महाप्रलयसमुद्यतं
सदः ॥०१॥ सरागयास्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया ॥ मुहुर्मुहुर्दशनवि

स्फुलिंगवान्२ द्रु न४

दर्शितोष्णुयारुषान्नृपाः प्रियतममेवभेजिरे॥१०२॥ अलक्ष्यतक्षणाद्दलितांगदेगदेककोदष्ट
हतनिजांसधामनि॥ समुच्छलत्कलितपारलोपलस्फुटइवकोपपावकः॥१०३॥ अवज्ञयाय
दुहसदुच्चकैर्बलः समुल्लसद्घनमयूखमंडलः॥ रूषारुणीकृतमपितेनभक्तुणात्रिजंवपुः
न४ पुनरेयन्निजांकृतं॥१०४॥ यदुत्पतत्पृथुतरहारमंडलेव्यवर्त्ततमभिद्रुतमुल्मुकः॥ हहछिला
तरकठिनांसघट्टितंततोऽनवद्भ्रमितमिवाखिलंजगत्॥१०५॥ प्रकुप्यतः श्वसनसमीरणाह ११६
तिस्फुटोष्मग्लपितत नुवसनांतमारुतेः॥ क्षुधाजितः कृतपरिपूर्णताविजनेपुनस्तरांवदनैरोज स० राम०
मस्विदत्॥१०६॥ प्रजापतिक्रतुनिधनार्थमुत्थितंव्यतर्कयद्धरमिवरौद्रमुद्धतः॥ समुद्यतंस
पदिवधायविद्विषामतिक्रुधंनिषधमनोऽबंधंजनः॥१०७॥ परस्परंपरिकुपितस्यपिंषतः चैतो

र्मिकाकनकपरागपंकिलं॥ करद्वयेसपदिसुधन्वनःस्वकैरनारतश्रुतिभिरधाव्यताव
भिः॥८॥ निरायतामनलशिखोज्वलोज्वलन्नखप्रभाकृतपरिवेससंपदं॥ अविभ्रमद्भ
मदमलोल्मुकाकृतिंप्रदेशिनींजगदिवदग्धुमाकुलः ९ दुरीक्ष्यतामजनतमन्मथस्त
थायथापुरापरिचितदाहधार्ष्ट्यया॥ ध्रुवंपुनःसशरममुंत्वतीययाहरोपिनव्यसहतवीक्षि
तुंदृशा॥१०॥ विचिंतयन्नुपगतमाहवंरसादुरःस्फुरन्ननुरुहमग्रपाणिना॥ परामृशत्कठिन
कठोरकामिनीकुचस्थलप्रमृषितचंदनंस्पृशुः॥११॥ विलंघितस्थितिमभिवीक्ष्यरक्षय
रिपोर्गिरागुरुरपिगांदिनीसुतं॥ जनैस्तदास्तुगपरिवर्त्तवायुभिर्विवर्त्तिताःगिरिपतयःप्रती
पिरे॥१२॥ विवर्त्तयन्मदकलुषीकृतेदृशौकराहतिक्षितिकृतभैरवारवः॥ क्रुधादध

ऽनुमतिलोहिनीमभूत्प्रसेनजिद्गुरुवेगोरिकारुणः॥१३॥ सकुंकुमैरविरलमंबुबिंदुभि
र्गवेषणैः परिणतदाडिमारुणैः॥ समत्सरस्फुरितवपुर्विनिःसृतैर्वभौ चिरं निचित
इवास्रजालवैः॥१४॥ ससंभ्रमच्चरणतलाभिताडितस्फुटन्महीविवरविनिर्गतैर्वर्त्मभिः॥ रवेः
करैरनुचिततापितोरगं प्रकाशतांशिशिनिरन्वयडसातलं॥१५॥ प्रतिक्षणं विधुवतिसारणोंशि
रःशिरविद्युतःकनककिरीटरश्मयः॥ अशंकितं युधमधुना विशंत्वमी क्षमापतीन्नि
तिरं राजयन्निव॥१६॥ दधौचलत्पृथुरसने विवक्षया विदारितं विततवृहद्गुजालतः॥
विदूरथः प्रतिभयमास्यकंदरं ललत्पृणाधरमिवकोटरांतरः॥१७॥ समाकुलेसदसि
तथापिविक्रियां मनोगमन्नभिदः परोदितैः॥ घनांबुभिर्वहलितनिम्नगाजलैर्जलं नहि

नि ६

मुर१

व्रजतिविकारमंवुधेः॥१८॥ परानमीयदवदंतश्रात्मनःस्तुवंतिचस्थितिरसतामसाविति॥
ध्यायनेविकृतिमविस्मितोमुखंसुखंदधच्छशधरमुग्धमुद्भवः॥१९॥निराकृतेयदुभि
रितिप्रकोपिभिःस्पशेशशनैर्गतवतितत्रविद्विषां॥मुरद्विषःस्वनितभयानकानकंवलं
क्षणादथसमनह्यताजये॥२०॥मुहुःप्रतिस्खलितपरायुधायुधिस्थवीयसीरचलनि
तवनिर्भराः॥ अदंशयंत्ररहितशौर्यदंशनास्तनूरयंनयइतिहृष्णिभूभृतः॥२१॥ दु
रुद्वहांस्तणामपरैस्क्षदंतरैणात्सवादुपचयमाशुविभ्रति॥महीभृतांमहिमभृतांनसेमम्मु
र्मुदोंतरावपुषिवहिश्चकंचुकाः॥२२॥सकल्पयंद्विरदगणंवरूथिनस्तुरंगिणोजयनयुजश्च
वाजिनः॥त्वरावतस्त्वयमापकुर्वतोन्टपांपुनःपुनस्तदधिकृतानतत्वरन्॥२३॥क्रुधेपरैः

सहहृदवृद्धकस्तयाकलक्कणन्मधुपकुलोपगीतया॥ अदीयतद्विपवरयासवारिभिःक धानर
रोदरैःस्वयमथदानमद्भुतं॥२४॥सुमेखलाःसिततरदंतचारवःसमुल्लसत्तनुपरिवारसंप
दः॥गणोविणांपुलकभृतोनुकंधलंलेविरेमदसिलताःप्रियाइव॥२५॥मनोरमैःप्रकृति
मनोरमाकृतिर्भयप्रदैःसमितिषुभीमदर्शनैः॥सदैवतैःसततमथानपायिभिर्निजांग
वन्मुरजिदसेव्यतायुधैः॥२६॥अवारितंगतमुभ्येषुभूरिशःक्षमाभृतामथकरकांतरे ११८
अपि॥मुहुर्युधिक्षतसुरशत्रुशोणितप्रसक्तप्रधिरथमधिरोहतिस्मसः॥२७॥उपेत्यचस्व राम०
नगरूपक्षमाहृतंदिवस्त्विषाकपिशितभूरिदिङ्मुखः॥ध्वकेपितस्थिरतरयष्टितत्प्रतिं
पतत्पतिःपदमधिकेतनंदधौ॥२८॥गभीरताविजितमृदंगनादयास्वनश्रियाहतरिपु

संघहर्षया॥ प्रमोदयन्नथ मुखरान्कलापिनः प्रतिष्ठते नवघनवद्रथः स्मसः॥२९॥ नि
रंतरं स्थगितदिगंतरं ततस्ततुच्छलद्धलमवलोकयज्जनाः॥ विकौतुकः प्रहतमहार्णवे
भवद्विस्फुरवलप्रचलितसिंधुवारिणि॥३०॥ वहंहरिगजपतयो महानकाः प्रदध्वनुर्जयतुर
गाजिहेषिरे॥ असंभवद्धृतगिरिगह्वरैरभूत्तदावेदलितउवस्वव्याश्रयः॥३१॥ अनारतं
सति जयाय दुंदुभौ मधुद्विषः पतदलघुप्रतिस्वनैः॥ विनिष्पतन्मृगपतिभिर्गुहामुखै
र्गताः परां मुदमहसन्निवाद्रयः॥३२॥ जडीकृतश्रवणपथे दिवौकसां चमूरवे विशति सुरा
ङ्गिकंदराः॥ अनर्थकैरजनि विदग्धकामिनीरतांतरक्वणितविलासकोपालैः॥३३॥
अरातिभिर्युधि सहयुध्वनो हतान्जिघृक्षवः श्रुतरणतूर्यनिस्वनाः॥ अकुर्वत प्र

स्याद्वांडमस्त्रीभरता मित्यमरः ७४

११९ माघ० थमसमागमोचितं चिरोज्झितं सुरगणिकाः प्रसाधनं ॥३४॥ प्रणोदिताः परिगतयंत्रिकर्मभिर्नि
षादिभिर्विदिततमोंकुशक्रियैः ॥ गजाः सकृत्करतललोललालिकाहतामुहुः प्रणादित
घंटमाययुः ॥३५॥ सविक्रमक्रमणचलैरितस्ततः प्रकीर्णकैः क्षिपतइवक्षितेरजः ॥ व्यरंसि
षुर्नखलु जनस्यदृष्टयस्तुरंगमादभिनवभांडहारिणः ॥३६॥ चलांगुलीकिशलयमुद्धतैः
करैरनृत्यतस्फुटकृतकर्णतालया ॥ मदोदकद्रवकटभित्तिसंगिभिः कलस्वनंभ्रमरगणैरगीत ११९
ये ॥३७॥ असिच्यतप्रशमितपांसुभिर्महीर्मदांबुभिर्धृतनवपूर्णकुंभया ॥ अवाद्यतश्रवण राम०
सुखंसमुन्नमत्पयोधरध्वनिगुरुतूर्यमाननैः ॥३८॥ उदारसौरभवनविधूतवाससस्ततस्ततोग
गनलिहश्चकेतवः ॥ पतः पुरः प्रतिरिपुशार्ङ्गिणः स्वयंव्यधीयतद्विपरयेतिमंगले ॥४०॥ कुलकं
घं १

म१

नश्शून्यतामगादसौनिवेशभूःप्रभूततांदधतिबलेचलत्यपि॥ पयस्यभिद्रवतिभुवंयुगात्ययेऽधोसरि
त्पतिर्नहिसमुपैतिरिक्ततां॥४०॥ पिपासितामथमधुभिर्द्विषच्चताजनोजरन्महिषविषाणधूस
रां॥ पुरःपतत्परबलरेणुशालिनीमलक्षयद्दिशमभिधूमितामिव॥४१॥ मनस्विनामुदितगु
रुप्रतिश्रुतिंश्रुतास्तथाननिजमृदंगनिस्वनाः॥ यथापुरःसमरसमुद्यतद्विषद्बलानकध्वनि
रुदकर्षयन्मनः॥४२॥ पथापथापरहरवःसमीपतांउपागमत्सहरिवराग्रतःसरः॥ तथातथा
हृषितवपुर्मुदाकुलाद्विषांचमूरजनिजनीवचेतसा॥४३॥ प्रसारिणीसपदिनभस्तलेततःस
मीरणभ्रमितपरागरूषिता॥ व्यभाव्यतप्रलयजकालिकाकृतिर्विदूरतःप्रतिबलकेतना
वली॥४४॥ क्षणेनचप्रतिमुखतिग्मदीधितिप्रतिप्रभास्फुरदसिभीमदर्शना॥ भयंक

मेघजालेपिकालिकेत्यमरः २

कराभृशामपिदर्शनीयतांययावसावसुरचमूश्चमूभृतां ॥४५॥ पयोमुचामभिपततांदिवि
द्रुतंविपर्य्ययःपरितइवातपस्यसः ॥ समक्रियःसमविषमेष्वथक्षणात्क्षमातलेवलज
लराशिरानघे ॥४६॥ ममौपुनःक्षणमिवपश्यतोमहत्तनूदरस्थितभुवनत्रयस्यतत् ॥
विशालतांदधतिनितांतमायतेवलंद्विषांमधुमथनस्यचक्षुषि ॥४७॥ भृशास्विदःपु
लकविकाशिमूर्त्तयोरसाधिकेमनसिनिविष्टसाहसाः ॥ सुरवेष्टुधःसपदिरतोरिवाभवन्
मसैन्यमाक्षितिपचमूवधूगणाः ॥४८॥ ध्वजांशुकैर्ध्रुवमनुकूलमारुतप्रसारितैःप्रसभ
कृतोपहूतयः ॥ यदूनभिद्रुततरमुद्यतायुधांक्रुधापरेरयमरयःप्रपेदिरे ॥४९॥ हरिरपि
प्रतिपरकीयवाहिनीमधिवांप्रववृतिरेचमूचराः ॥ विलंवितुंनखलुसहामनस्विनोवि

स्लोजने

धित्सतः कलहमवेक्ष्य विद्विषः॥५०॥ निवाततां दधदपि वर्म बिभ्रतः स्फुरन्मणिप्रसृतमरीचिसू
चिभिः॥ निरंतरं नरपतयो रणाजिरे रजोजिरे शरनिकराचिता इव ॥५१॥ अथोच्चकैर्जरठकपो
तकंधरातनूरुहप्रकरविपांडुरच्छविः॥ बलैश्चलच्चरणविधूतमुच्चलद्घनावलीरुदचरतैंमार
जः॥५२॥ विषंगिभिर्भृशमितरेतरं क्वचित्तुरंगमैरुपरि निरुद्धनिर्गमाः॥ चलाचलैरनुपदमा
हताः खुरैर्विवभ्रमुः स्थिरमध्य एव धूलयः॥५३॥ गरीयसः प्रचुरमुखस्य रागिणो रजोत्रवद्धव
हितमलमुत्कटं॥ सिसृक्षतः सरसिजजन्मनो जनं बलस्य तु क्षयमुपनेतुमिच्छतः॥५४॥
पुराशरद्युतिगलितानि संयुगे नयंति नः प्रसभमसृग्जिपंकतां॥ इति ध्रुवं व्यलगिषुरा
त्तभीतयः खमुच्चकैरनलसखस्य केतवः॥५५॥ समुन्नमद्घननिकुरंबकर्बुरः क्वचिद्धिरणम

शिशुपालवध

यकाणापुंजपिंजरः ॥ क्वचिच्छरज्जलधरखंडपांडुरः स्फुरत्ततः क्षितितलपांशुरुद्ययौ ॥५६॥ शिरोरुहैर
लिकुलकोमलैरमीमृधेमुधाम्रषत युवान एव सा ॥ वलोद्धतं धवलितमूर्द्धजानिति ध्रुवंजनान्न
जरत्यवाकरोद्रजः ॥५७॥ महीयसांमहति दिगंतदंतिनामंकेरजेरजसि मुखानुसंगिणि ॥ विसारित
मञ्जिहतकोकिलावलीमलीमसाजलदमदांबुराजयः ॥५८॥ द्रुतद्रवद्रथचरणक्षतक्ष्मातलोल्ल
सद्धलरजोवगुंठितं ॥ युगक्षयक्षणनिरवग्रहे जगत्पयोनिधेर्जलइव मग्नमावभौ ॥५९॥ त्र
टुल्लसद्दिनकरचक्रकांतयोरजस्वलाः परिमलितांबरश्रियः ॥ दिगंगनाः क्षणमविलोक
नक्षमाः शरीरिणांपरिहरणीयतांययुः ॥६०॥ निरीक्षितुं वियति समेत्य कौतुकात्पराक्रमं सम
रमुखे महीभृतां ॥ रजस्तताव निमिषलोचनोत्पलव्यथाकृति त्रिदशगणैः पताप्यत ॥६१॥ सुसंग

तैर्दधदपिधामनीयतेतिरस्कृतिंवहुभिरसंशयंपरैः॥ यतःक्षितेरवयवसंपदेभ्रात्विषांनिधेर
पिवपुरावरीषत॥६२॥पयोधरव्यतिकरधौतमूर्त्तिभिःविपङ्कैतेरनधिगतानिलेभिरे॥चल
च्चमूतुरगखुराहतायतन्महीरजःस्नपनसुखानिदिग्गजैः॥६३॥विषंगिणीप्रतिपदमापिवत्य
पोरणाग्रजैरजसिविकीर्णविद्धृति॥शनैःशनैर्गुरूभिरदृष्टिभिर्ययेपयोधरैरुपचितपंकपी
वरैः॥६४॥गजव्रजाक्रमणभरावनम्रयारसातलेयदखिलमानशेभुवा॥नभस्तलंवहल
तरेणरेणुनागतेगमत्त्रिभुवनमेकतामिव॥६५॥समस्थलीकृतविवरेणपूरिताःक्ष
माभृतांवलरजसामहागुहाः॥रहस्त्रपाविधुरविधूरतार्थनांनभःसदामुपकरणीयतांय
युः॥६६॥गतेमुखवदपरस्मादृशौदृशाःपयस्तिरोदधतिघनेरजस्यपि॥मदानिलैरधिमधु

न्नतगंधिभिर्द्विपाद्विपानभिमुखेवरंहसा ॥६७॥ मदांभसापरिगलितेवमन्नधागजानजनःश
मितमरुध्वजानधः ॥ उपर्य्यवस्थितघनपांशुमंडलानलोकयत्ततपरमंडलानिव ॥६८॥ त्र
न्यूनोन्नतयोतिमात्रपृथवः पृथ्वीधरश्रीभृतस्तन्वंतः कनकावलीभिरुपमांसौदामिनी
दामभिः ॥ वर्षंतःशममानयंतुपलसच्छृंगारलेखायुधः कालेकालियकायकालवपुषःपां
शून्नागजांभोमुचः ॥६९॥ इतिश्रीशिशुपालवधेमहाकाव्येमाघकृतौसप्तदशःसर्गः ॥१७॥ संज
ग्मातेतौपायानपेतौसेनांभोधीधीरनादौरयेण ॥ पक्षछेदात्पूर्वकैमेकत्रदेशेवांछंतौवि
ध्यौनिलेतुं ॥०१॥ पत्तिःपत्तिंवाहमेयायवाजीनागोनागंस्यंदनस्थोरथस्थं ॥ इत्थंसेनावल्ल
भस्येवरागादंगेनांगंप्रत्यनीकस्यभेजे ॥०२॥ रथ्याघोषैर्बृंहयावारणानामैक्यंगछन्वाजिनां

सह्यो २ वा २

पारातंपत्रिसंहतिस्थिमरः २२

हेषयाच ॥ व्योमव्यापीसंततंदुंदुभीनामव्यक्तोभूदीशितेवप्रणादः ॥ ०३ ॥ रोषावेशाद्गावतःप्रत्यमि
त्रंदूरोत्क्षिप्तस्थूलवाहुध्वजस्य ॥ दीर्घास्तिर्यग्वैजयंतीसदृश्याःपादातस्याभ्रेजिरेषड्गलेखाः ॥ ०४ ॥
वध्रावद्धाधोरितेनप्रयांतामश्वीयानामुच्चकैरुच्छलंतः ॥ रोकामारेजुःस्थासकामूर्तिभाजोदर्पस्येव
व्याप्तदेहस्यशेषाः ॥ ०५ ॥ सांद्रत्वक्कास्तल्पलाश्लिष्टकक्ष्यामांगीशोभामाप्नुवंतश्चतुर्थी ॥ कल्प
स्यांतेमारुतेनप्रनुन्नाश्चेलुर्ध्वंउगेडशैलाइवेभाः ॥ ०६ ॥ संक्रीडंतीतेजितांश्वस्यरागादुद्यम्यारा
मग्नकायोत्थितस्य ॥ रंहोभाजामत्तथूःस्पंदनानांहाकारेणुप्राजितुःप्रत्यनंदत ॥ ०७ ॥ कुर्वाणा
नासंपरायांतरायेभ्रेरणूनांमृत्युनामार्जनाय ॥ संमार्जन्त्यानूनमुद्धूयमानाभांतिस्मोच्चैःकेत
नानांपताकाः ॥ ०८ ॥ उद्यन्नादंधन्विभिर्निष्ठुराणिस्थूलान्यूच्चैर्भंउत्वेदधींति ॥ आस्फाल्यंतेका

आमएवमेवेत्यर्थः=२

मुक्ताशिश्मकामं हस्त्यारोहैः कुंजराणां शिरांसि॥९॥ घंटानादो निस्वनो डिंडिमस्य ग्रैवेयाणामार
वो बृंहितानि॥ आमेतीव प्रत्यवोचन्गजानामुत्साहार्थं वाचमाधोरणस्य॥१०॥ यातैश्चात्रुर्विध्य
मस्त्रादिभेदाद्व्यासंगैः सौष्ठवाल्लाघवाच्च॥ शिक्षाशक्तीः प्राहरन्दर्शयंतो मुक्तामुक्तैरा
युधैरायुधीयाः॥११॥ रोषावेशादाभिमुख्येन कौचित्पातित्याहंहंसेवोपयांतौ॥ हित्वाहेतीर्म
ल्लवन्मुष्टिघातं घ्नंतौ बाहूबाहविव्यासजेतां॥१२॥ शुद्धाः संगं न क्वचित्प्राप्नुवंतो दूरान्मुक्ताः
शीघ्रतां दर्शयंतः॥ अंतः सन्नं विद्विषामाविशंतो युक्तं चक्रुः सायकावाजितं याः॥१३॥ आ
क्रम्याजेरग्रिमस्कंधमुच्चैरास्थायाथो वीतशंकं शिरस्थ॥ हेलालोलावर्त्मगत्वातिमर्त्यं द्या
मारोहन्मानभाजः सुखेन॥१४॥ रोदोरंध्रं व्यश्नुवानानिलोलैरंगस्पांतर्मापितैः स्थावराणि॥

त्सरुःखड्गादिमुष्टौस्यात्

केचिद्रुर्वीरेत्यसंयत्रिषध्वाःक्रीणंतिस्मप्राणमूल्यैर्यशांसि ॥१५॥ वीर्य्योत्साहश्लाघिकृत्वावदानंसे
ग्रामाग्रेमानिनांलज्जितानां ॥ अज्ञातानांशत्रुभिर्युक्तमुच्चैःश्रीमन्नामश्रावयंतिस्मनेग्रोः (मो धाः) ॥१६॥ आ
धावंतःसंमुखंधारितानामन्यैरन्येतीक्ष्णकौक्षेयकानां ॥ वक्षःपीठेरात्सरोरात्मनैवक्रोधेनांधाः
प्राविशन्पुष्कराणि ॥१७॥ मिश्रीभूतेतत्रसैन्यद्वयेपिप्रायेणायंव्यक्तआसीद्विशेषः ॥ आ
त्मीयास्तेपरांचःपुरस्तादभ्यावर्त्तीसंमुखेयःपरोसौ ॥१८॥ सद्वंशत्वादंगसंसर्गिणीत्वंनी
त्वाकामंगौरवेणावबद्धा ॥ नीताहस्तंवंचयित्वापरेणाद्रोहंचक्रेकस्यचित्त्वाकृपाणी (छुरिका) ॥१९॥
नीतेभेदंधौतधाराभिघातादंभोदाभेशास्त्रवेणापरस्य ॥ साम्यग्राजिस्तीक्ष्णमंगस्यमार्गो
विद्युद्दीप्तःकंटकेलक्ष्यतेस्म ॥२०॥ आमूलांतात्सायकेनायतेनस्यूतेवाहोमंडकस्थिप्तमुष्टेः ॥

त्राप्यासस्त्रांवेदनामस्तधैर्य्यादप्यभ्रश्यच्चर्मनान्यस्यपालेः ॥२१॥ भित्वाघोणामायसेनाः शिव
श्रै श्रैं वी तो न द
न्दःस्थूरीपृष्टेगार्द्धपंक्तेर्णाविद्धः ॥ शिक्षाहेतोर्गाढबद्धैववक्त्रंहर्त्तुंवक्रंनाशकद्दुर्मुखोपि ॥२२॥ कु
तेनोच्चैःसादिनाहंतुमिष्टान्राजानेयोदंतिनस्त्रस्यतिस्म ॥ कर्म्मोदारंकीर्त्तयेकर्त्तुकामान्किंवाजा
त्याःस्वामिनोह्रेपयंति ॥२३॥ जेतुंजेत्राःशेकिरेनारिसैन्यैःपश्यंतोधोलोकमस्तेषुजालाः ॥
नागान्रुद्धाःपर्वतानिश्रयंतोदुर्गाणीवत्रासहीनास्त्रसानि ॥२४॥ विष्वद्रीचीर्विक्षिपन्सैन्य
वीचीराजावंतःक्वापिदूरेप्रयातं ॥ वभ्रामैकोवंधुमिष्टंदिदृक्षुःसिंधौवाद्योमंडलेगोविराढः
म दो त्थापनैः
॥२५॥ यावच्चक्रेनांजनेवोधनायविस्तारद्वोहस्तिवारीमदस्य ॥ सेनास्थानेहंतिनामात्मनेव
स्थूलास्तावत्प्रावहन्दानकुल्याः ॥२६॥ क्रुध्यन्गंधादन्यनागायदूरादारोढारंधूतमूर्द्धावम

न्य॥[redacted]॥ घोराराववध्मानिताशेषदिक्के विंक्केनागः पर्य्यपासीत्स्व एव॥२७॥ प्रत्या
सन्नेदंतिनिप्रातिपक्षेयंत्रानागः प्राप्तवक्रछदेपि॥ क्रोधाक्रांतःक्रूरनिर्दारितांद्धःप्रत्यं
चक्रेनैव किंचिन्मदांधः॥२८॥ तूर्णं यावन्नापनिन्ये निषादी वासस्थ्यत्तुर्वारणं वारणास्य॥
वारण नी
तावत्पूर्वैरन्यनागाधिरोहः कादंवानामेकपातेरसीव्यत्॥२९॥ त्रास्यद्दृष्टेराछदं चाप्रमत्तो
यंतायातुःप्रत्परीभेद्विपस्य॥ मग्नस्योच्चैर्वहिर्भोरणाशंकोरावब्रातेवीक्षणेतत्क्षणेन॥३०॥
यत्नाद्रक्षन्सुस्थिरत्वादनाशं निश्चित्यान्यप्रत्येतसाभावितेन॥ त्रैत्यावस्याकालयोग्योप
योगं दध्रेभीषणं नागमापद्धनं वा॥३१॥ अन्योन्येषां पुष्करैरामृशंतोदानोद्भेदांत्तुद्बकेभुग्नवा
लाः॥ उन्मूर्द्धानः संनिषद्यापराभिःप्रापुर्प्येतस्पष्टदेध्वनीभाः॥३२ द्राघीयांसः संहतास्थे

मभाजश्च्यावृक्ष्यास्तीक्ष्णतामत्यजंत ॥ दंताद्दंतैराहताः सामजानां जग्मुर्भंगं नस्वयं सामजा
ताः ॥३३॥ मातंगानां दंतसंघट्टजन्मा हेमच्छेदच्छायचंचच्छिखाग्रः ॥ लग्नोप्यग्निश्चामरेषु प्र
कामं मांजिष्ठेषु व्यज्ञते नस्म सैन्यैः ॥३४॥ ऊष्मा मासे मत्सरोत्पातवातश्लिष्यद्दंतत्त्वमारूहो
घर्षणोत्थैः ॥ यो गांतेर्वावह्निभिर्वारणानामुच्चैर्मूर्द्धव्योम्नि नक्षत्रमाली ॥३५॥ सांद्राम्भो
दश्यामले सामजानां हृंदेनीताः शोणितैः शोणिमानं ॥ दंताः शोभामापुरंभोनिधीनां कंदोद्भेद
वैद्रुमावारिणीव ॥३६॥ आकंपाग्रैः केतुभिः संनिपातं तारोदीर्णग्रैवनादं व्रजंतः ॥ मग्ना
नंगेगाढमन्यद्विपानां दंतान्दुःखादुद्धरंतिस्मनागाः ॥३७॥ उत्क्षिप्योच्चैःप्रस्फुरंतं रदाभ्या
मीषादंतः कुंजरस्यात्रवीर्ये ॥ शृंगप्रोतप्रावृषेण्यांबुदस्यस्पर्धंप्राप्यत्साम्यमूर्वीधरस्य ॥३८॥ म

ग्रेपि। भित्त्वे पराहृत्य देहं योद्धा साई द्विज्याममुंचते ष्ठूत्र॥ साकं येलुःसंमदेनानुवंधीइने।
भीहृणंवारणः प्रत्यरोधि ॥३९॥ व्याप्तेलोके दुःखलभ्यापसारं संरंभित्वादेत्यधीरो मही
यः॥ सेनामध्यंगाहतेवारणःस्मव्रज्ञ्लेवशागादिदेवोदरांतः ॥४०॥ भृंगश्रेणीश्याममभासां
समूहैर्नाराचानां विद्धनीरंध्रदेहः॥ निर्भीकत्वादाहवेनाहतेछोहृष्यन्‌हस्तीइरामे
वरेजे ॥४१॥ आताम्रा भारोघभाजः कयंतादाष्मूत्ववातेमार्गणेध्रूगीतेन॥ निष्क्रांतेतंती
रुधिरस्य
नागराजस्यपर्यन्त्रेदानस्याहोलोहितस्यैवधारा ॥४२॥ क्रामन्नंदंतोदंतिनः साहसिक्या
दीर्घादंडेमत्पुश्ययातत्तस्य॥ सैन्यैरन्यैरल्लत्तणादाशशंकेस्वर्गस्योद्धैरद्वैमार्गाधिन
ढः॥४३॥ कुर्वन्ज्योत्स्नाविभ्रुषांतुल्यरूपस्तारस्ताराजालसारामिवद्यां॥ खङ्गाघातैर्दा

५ = भुजबाहूप्रवेष्टोदोरित्यमरः =५

१२६
माघ०

रिताद्दंतिकुंभादाभातिस्मप्रोच्छलन्मौक्तिकौघः ॥४४॥ दूरोत्क्षिप्तक्षिप्रचक्रावकृत्तं
मत्तोहस्तंहस्तिराजःस्वमेव ॥ भूमौभीमंलोलमानंसरोषैःपादेनास्तृकुंपंकपेषंपि
पेष ॥४५॥ आपस्काराल्लूनगात्रस्यभूमिंनिःसाधारंगछतोवाङ्गुरवस्य ॥ लब्धायामंदं
तयोर्युग्ममेवस्त्वंनागस्यप्रापदुत्तंभनत्वं ॥४६॥ लब्धस्पर्शभूव्यधादव्यथेनस्थित्वाकिं
चिद्दंतयोरंतराले ॥ ऊर्द्धोर्द्धांसिद्धुमदंतप्रवेष्टंजित्वोत्तस्थेनागमन्येनसद्यः ॥४७॥ हस्ते
नागेवीतभीतिंगृहीत्वाकंचिद्व्यालःद्विषवान्नेईमूढ्वैः ॥ आसीनानांव्योम्नितस्थैवदे
तोःस्वर्गस्त्रीणामर्पयामासनूनं ॥४८॥ कंचिद्दत्वादायतेनद्रढीयःप्रासप्रोतस्योतसां
तःखलेन ॥ हस्ताग्रेणप्राप्तमप्यग्रतोभूद्दानेभ्यर्थ्यैवारणस्यग्रहीतुं ॥४९॥ तच्चापुंसे

१२६
रामं०

नंदगोपात्मजायाःकंसेनेवस्फोटितायागजेन॥दिव्यांमूर्त्तिंव्योमगेरुत्पतंतीवीक्ष्या
मासेविस्मितैश्चेडिकेव॥५०॥आक्रम्यैकामग्रपादेनजंघामन्यामुच्चैराददानःकरे
ण॥सास्थिस्थानंदारुणैर्हारुणात्माकंचिन्मध्यात्पाटयामासदंती॥५१॥शोचित्वाग्रे
भृत्ययोर्मृत्युभाजोरर्घ्यैःप्रेम्णानोतथावल्लभस्य॥पूर्वंकृत्वानेतरस्यप्रसादंपश्चात्ता
पादापदाहांयथांतः॥५२॥उत्क्रत्यारादूर्ध्वंदंडावलनेवचक्रेणान्यस्यक्रोधदष्टोष्ट
दंते॥सैन्यैःकंठछेदलीनेकवंधाद्भूयोविम्यवल्गतःसासिपाणेः॥५३॥तूर्य्यारा
वैराहितोत्तालतालैर्गायंतीभिःकाहलंकाहलाभिः॥नृत्येचक्रुः स्मन्यहस्त
प्रयोगंकायेकूजन्नकंबुरुच्चैर्जहास॥५४॥प्रत्याहृत्तंभंगमर्भाजित्वसैन्येतुल्यमुक्तै

शकिरंतिस्मकं चित ॥ एकोघेनस्वर्णपुंखैर्हिबंतः सिद्धमाल्यैःसाधुवादैर्द्वयेपि ॥५५॥
वाणच्छिन्नारोहमन्यामनानां त्रक्रांतानामन्यसैन्यैर्गृहीतुं ॥ संख्यानांभ्राम्यता
मांजिभूमौवारी वारैःसस्मेरैर्वारणानां ॥५६॥ पौनःपुन्यादस्त्रगंधेनमत्तोमूर्द्धन्न
कोपाल्लोकमायोधनोर्व्यां ॥ पादैर्लग्नामंत्रमालामिभेंद्रःपार्ष्णीकल्पामायत
माचकर्ष ॥५७॥ कश्चिन्मूर्छामेत्यगाढप्रहारैःसिक्तःशीतैःशीकरैर्वारणस्य १२७
॥ उच्छ्वासंप्राप्तास्थितातंजिघृक्षुर्व्यर्थीकृतानाकनारीमुमूर्छ ॥५८॥ लूनग्री रामः
वात्सायकेनापरस्यद्यामत्युच्चैराननादुत्पतिष्णोः ॥ त्रेसेमुग्धैःसैंहिकेयानु

उत्पूर्वस्य श्वस
लप्राप्तोनैर्ह
व्यस्य धातो
लिटि रूपं=

र्न्देवत्वं·गुर्वी
मांवैद्र्स्वप्नः

कारांडोड्राकारादस्मरोवक्रुवंद्वैः॥५९॥ हृत्तंपुष्ठेश्शून्यमाश्लिष्यकाचिद्दंतुंत
र्मिमेस्त्यंगंजगाम॥त्यक्त्वानाग्रोदेहमेतिस्मयावत्पत्नीसद्यस्तद्वियोगासमर्था
॥६०॥त्यक्तप्राणंसंपुगेहस्तिनीस्थावेद्यप्रेम्णोतत्त्वाणदुःकृतासुः॥प्राप्याखंडे
देवनर्यंसतीत्वादाशिश्लेषसैवकंचितपुरंध्री॥६१॥स्वर्गेवासंकारयंत्याचिरा
यप्रत्ययत्वंप्रत्यहंधारयंत्या॥कश्चिद्देजेदिव्यनार्य्यापरस्मिन्लोकेलोकंद्री
णयंत्येहकीर्त्या॥६२॥गत्वानूनंवैबुधं[illegible]समरम्यंमूर्छाभाजामाजगामां
लब्ध निस्व याः
तरात्मा॥भूयोदृष्टप्रत्ययाःप्राप्तसंज्ञाःसाधीयस्तेड्यणायाडियंते॥६३॥क
श्चिछ्द्याबाधमन्यपवादुंलब्धाभूयश्चैतनामाहवाय॥व्यावर्तिष्टक्रोश

तःसख्युरुच्चैस्त्यक्तश्चात्माकाचलोकात्तुहन्तिः॥६४॥भिन्नोरुक्मौशत्रुणाकृष्य
हृद्यादासन्नत्वात्कौविदेकेषुणैव॥अन्योन्यावष्टंभसामर्थ्ययोगादूर्द्ध्वीकेवस्वर्ग
तावप्यभूतां॥६५॥भिन्नानस्त्रैर्मोहभाजोभिजातान्हंतुंलोलानवारयंतःस्वव
र्गान्॥जीवग्राहंग्राहयामासुरन्येयोग्येनार्थःकस्यनस्याज्जनेन॥६६॥भिन्नैर्दं
डैरातपत्राणिभूमौ॰पर्यस्तानिप्रौढचंद्रद्युतीनि॥आहारार्थंप्रेतराजस्यरौ
प्यस्थालानीवस्थापितानिस्मभांति॥६७॥रेजुर्भ्रष्टावक्षसःकुंकुमांकामुक्ता
हाराःपार्थिवानांव्यसूनां॥हासाल्लक्ष्म्याःभूर्णकामस्यमन्येमृत्योर्दंताःपीत
रक्तासवस्य॥६८॥निस्त्रिंशेषोद्यीर्णतमस्तह्रतानामस्रैर्भूयोयद्वकासांचकार॥

रागार्थंतत्किंनुकोसुंभमंभःसंख्यानानामंतकांतःपुरस्य ॥६९॥ रामेणत्रिःसप्त
कृत्वोकृदानांचित्रंचक्रेपंचकंक्षत्रियास्रैः ॥ रक्तांभोभिस्तत्पूर्णादेवतस्मिन्
संरव्येसंख्याःप्रावहन्नद्दीपवत्यः ॥६०॥ संदानांतादस्त्रिभिःशिष्टितास्रोतावि
श्वाधःशातशास्त्रावल्लनाः ॥ कूर्मीपमंव्यक्तमंतर्नदीनामैभाप्रापत्रंभ्रयोसृश्य
यीनां ॥७१॥ पद्माकारैर्योधवक्त्रैरिभानांकर्णभ्रष्टैश्चामरैरेवहंसैः ॥ सोपस्काराः
प्रावहन्नन्तस्तोयाःश्रोतस्विन्योवीविपृष्ठैस्त्वरद्भिः ॥७२॥ उत्क्रांतानामाभिषा
योपरिष्टादध्याकाशंचर्मसुःपत्रवाहाः ॥ मूर्त्तांप्राणानूनमद्याप्यपेत्तामासुः
कायत्याजितादारूणास्रैः ॥७३॥ स्त्रातत्वद्भिर्दिक्चुपक्वाग्रवातंप्राप्तेईरादासु

४पा

तीद्यौर्मुखेषु ॥ आयोधाग्रे सैनिकानामजीवैर्जीवैः पश्चात्पत्रिपुंखैरपायि ॥७४॥
ऊर्जोनाजौयद्रणेसंस्थितानामादत्तीस्वार्थमंगेननूनं ॥ ज्वालाव्याजादुद्वमंती
तदंतस्तेजस्तारंदीप्रजिह्वाववासे ॥७५॥ नैरंतर्याच्छिन्नदेहांतरालेदुर्भेदत्वस्पष्टालि
नावासितेन ॥ योद्धुर्वाणेनाततमादाय्यमांसंकापूर्वंस्वादमादेशिवाभिः ॥७६॥
ग्लानिच्छेदिक्षुत्प्रबोधायपीत्वारक्तारिष्टंशोषिताजीर्णशेषं ॥ स्वादुंकारंकालखं
डोपदंशंक्रोष्टाडिंबंव्याघ्रणेह्यास्वनञ्च ॥७७॥ क्रव्यात्पूगैःपुष्कराण्याननकानांघ
त्याशाभिर्मेदसादारितानि ॥ आभीलानिप्राणिनःप्रत्यवस्यन्कालोनूनंव्या
ददावाननानि ॥७८॥ कीर्णारेजेसाजिभूमिःसमंतादप्राणद्भिःप्राणभाजांप्र

नीकैः॥ वद्धारब्धैरूर्द्धसंयोजितैर्वोरूपैः स्रष्टुः स्रष्टिकर्मातिशाला॥७९॥ आये
तीनांमविरतरयंराजकानीकिनीनामित्थंसैन्यैःसममलघुभिःश्रीपतेरूर्मिम
द्भिः॥ आसीदोघैर्मुहुरिवमहद्वारिधेरापगानांदोलायुद्धंकृतगुरुतरध्वानमौ
द्धत्यभाजां॥८०॥ इतिश्रीशिशुपालवधेमहाकाव्येसंकुलयुद्धोनामाष्टादशःसर्गः॥
॥१८॥ अथोत्तस्थेरणोरव्यामसुहृद्वेणुदारिणा॥ नृपांघ्रिपोघसंघर्षादग्निव
६ अं त्ययमकं द्वेणुदारिणा॥१॥ आपतंतममुंदूराद्दूरीकृतपराक्रमः॥ वलोवलोकयामासमा
तंगामिवकेशरी॥०२॥ जजौजोजाजिजिज्जाजीतंततितोतिततातितुत्॥ भाभोभीभाभि
भूभाभूरारारिरिरीररः॥०३॥ एकाक्षरपादः॥ भवन्भयायलोकानामाकंपितमहीत

लः॥निर्घातउवनिर्घोषभीमस्तस्यापतद्भथः॥०४॥ रामोपिरिपुःशरानाजिमहेष्वास
विचक्षणे॥कोपादथैनंशितयामहेष्वासविचक्षणे॥०५॥दिशामर्कमिवावाचंमू
र्धपातमथाहरत्॥मंदप्रतापंतंसूतःशीघ्रमाजिविहायसः॥०६॥ कृत्वाशिनेःशाल्व
चमूंसप्रभावावमूर्जितो॥ससर्जेवक्रैःफुल्लाह्वसप्रभावावमूर्जितं॥०७॥उत्सु
केनडुमंप्राप्यसंकुचत्यत्रसंपदं॥तेजःप्रकीर्तितादिद्भुसप्रतापमदीप्यत॥०८॥ष्ट
थोरध्याक्षिपद्धुकम्रीययाचापमुदायुधः॥ततयैवैववाचापगामंययाचापमुदायुधः९॥
समंसमंततोराज्ञामापतंतीरनीकिनीः॥कार्ष्णिःप्रत्यग्रहीदेकःसरस्वानिवनि
म्नगाः॥१०॥ दधानैर्घनसादृश्यंलसदायसदंशनैः॥ तत्रकांचनसच्छायासस्त्रैर्मे

तः शराशनिः ॥११॥ निरैक्ष्यः ॥ नखांशुमंजरीकीर्णामसौ तरूरिवोच्चकैः ॥ वज्रौवि
भ्रद्धनुः शारवामधिरूढशिलीमुखां ॥१२॥ प्राप्य भीममसौ जन्यं सौजन्यं दधदा
नने ॥ विध्यन्नुमौवनरिघ्ननरिघ्नगां तकः शरैः ॥१३॥ कृतस्य सर्वक्षितिपैर्विज
याशंसया पुरः ॥ अनेकस्य चकारासौ बाणैर्बाणस्य खंडनं ॥१४॥ यावभारकृता
नेकमायासेनाससारतां ॥ धनुः सकर्षन्नहितमायासेनाससारतां ॥१५॥ उ
जोमहोजाः कृताधः सन्नणादुत्तमौजसः ॥ कुर्वन्नाजावमुख्यत्वमनयन्नाम
मुख्यतां ॥१६॥ दूरादेव चमूर्भल्लैः कुमारो हंति स स्म याः ॥ न पुनः सांयुगीनताः

स्मकुमारोहंतिसस्मयाः ॥१७॥ निपीडनतरसातेनमुक्ताःकाममनास्थया ॥ उपांशुर्वि
लक्ष्त्वंविद्विषोनशिलीमुखाः ॥१८॥ तस्यावदानैःसमरेसहसारोमहर्षिभिः ॥ सु
रांसिव्योमस्थैःसहसारोमहर्षिभिः ॥१९॥ सुगंधयद्दिशःशुक्लमम्लानंकुसुमं
दिवः ॥ भूरित्रापतत्तस्मादुत्पपातदिवंयशः ॥२०॥ सोढुंतस्यद्विषोनालमपयोध
रवारणं ॥ ऊर्णुनावयशश्चद्यामपयोधरवारणं ॥२१॥ केशवस्त्रलोकस्यपर्य्य
स्कारिविकाशिना ॥ शेखरेणेवयुद्धस्यशिरःकुसुमलक्ष्मणा ॥२२॥ सादरंयुध्य
मानापितेनाच्यनरसादरं ॥ सादरंश्वतनानिन्येहीयमानारसादरं ॥२३॥ उत्पा

लिंगितमालोक्यजयलक्ष्म्याझषध्वजं॥ क्रुद्धयेवक्रुधासद्यःप्रपेदेचेदिभूपतिः॥२४॥
अहितानभिवाहिन्यासमानीचतुरंगया॥ चचालवल्गत्कलभसमानीचतुरंग समुद्रोब्धिरकूपारइत्य मरः॥=३
या॥२५॥ ततस्ततधनुर्मौर्वीविस्फारस्फुरनिस्वनैः॥ तूर्य्यैर्युगक्षयक्षुभ्यदकूपार
नुकारिणी॥२६॥ सकारनानारकासकायसाददसायका॥ रसाहवावासहारना
दवाददवादना॥२७॥ सर्वतोभद्रः॥ लोलासिकालियकुलायमस्येवस्वसास्वयं
॥ चिकीर्षुरुल्लसल्लोहवर्मश्यामासहायतां॥२८॥ सासेनागमनारंभेरसेना
सीदनारता॥ तारनादजनामत्तधीरनागमनामया॥२९॥ मुरजबंधः॥ चतुर्भिः

कुलकं॥ धूतधौतासयः श्रश्वाः प्रातिष्ठंत तक्षमाभृतां॥ शौर्य्यानुरागनिकषः साहि
वेलास्तु जीविनां॥३०॥ दिवमिछन्नयुधा गंतुं कोमलामलसंपदं॥ दधौ दधानो सि
लतां कोमलामलसंपदं॥३१॥ क्षतोरुवेगं युगपदाजिगीषंतसैनिकाः॥ विपक्षं
बाहुपरिघैर्जंघाभिरितरेतरं॥३२॥ वाहनाजनि मानासे साराजावनमाततः॥ म
त्तसारगराजेभे भारीहावज्जनध्वनि॥३३॥ निध्वनज्जवहारीभा भेजे रागरसात्तमः॥
ततमानावजारामा सेनामानिजनाहवा॥३४॥ अनुलोमविलोमौ॥ अभग्नवृत्ताः ध
सं भादाकृष्टायोवनोद्धतेः॥ चक्रं दुरुच्चकैर्मुष्टिग्राह्यमध्या धनुर्लता॥३५॥ क

रणुः प्रास्थितोनेकोरणुर्धराः सहस्रशः ॥ करेणुः शीकरोज्झरेणुस्त्वनशमयंययौ ॥३६॥
धृतप्रत्ययशृंगाररसरागैरपिद्विपैः ॥ सरोषसंभ्रमैर्वभ्रे रौद्र एव रणे रसः ॥३७॥ नत धृष्टे धृष्णुर्वियातः स्यादित्यमरः —५
स्थो भर्तृतः प्राप्तमानसंप्रतिपत्तिषु ॥ रणैकसर्गेषु भयमानसंप्रतिपत्तिषु ॥३८॥ वरणा
हि पूर्णतूणीरकोटरैर्ध्वनिशारिविभिः ॥ गोधाश्लिष्टभुजाशाखैरभूद्भीमा वलाटवी ॥३९॥
नानाजवववज्ञानानासाजनौघघनौजसा ॥ पुरा निहाहानिरापतान्वियाततयान्वि
ता ॥४०॥ प्रतिलोमानुलोमपादः ॥ विषमं सर्वतोभद्रचक्रगोमुत्रिकादिभिः ॥ श्लोकै
रिव महाकाव्यं व्यूहैस्तद्भवद्वलं ॥४१॥ संहत्यासात्वतां चेद्यं प्रतिभास्वरसेनया ।
॥ ववले योद्धुमुत्पन्नप्रतिभास्वरसेनया ॥४२॥ विस्तीर्णमायामवतीलोलल्लो

कनिरंतरा ॥ नरेंद्रमार्गरथ्येवपपातद्विषतांवलं ॥४३॥ वारणागगभीरासासाराभीगग
णरवा ॥ कारितारिवधासेना नासेधावरितारिका ॥४४॥ सुग्मं ॥ प्रतिलोमार्द्धानुलोमार्द्धः
॥ ॥ अधिनागंप्रजविनोविकसत्पिछचारवः ॥ पेतुर्वैरंहिणादेशीयाः शंकवः प्राण
हारिणः ॥४५॥ प्रवृत्तेविकसद्धानेसाधनेप्यविषादिभिः ॥ ववृषेविकसद्धानेयुद्धमा
प्यविषाणिभिः ॥४६॥ गोमूत्रिकाबंधः ॥ पुरः प्रवृत्तैर्युद्धंतद्दलितैर्लब्धशुद्धिभिः ॥ आल
पेरिवगांधर्वमदीप्यतपदातिभिः ॥ केनचित्स्वासिनान्येषांमंडलाग्रानवद्यता ॥ प्राप
कीर्तिःकृतमहीमंडलाग्रानवद्यता ॥४७॥ हंतुंविद्विषतस्तीक्ष्णःसममेवसुसंहतेः ॥
परिवारात्स्वयंकुचक्रेखड्गश्चात्मावचेनचित ॥४८॥ अन्येनविधुरेणमतिमप्रा
द

विलासिना ॥ उरुणैनचमूरूणंमतिमात्राविलासिना ॥५०॥ सहस्रशरगाः कश्चि
ल्लूनमूर्द्धासिनाद्विषः ॥ ततोर्द्धएवकावंधीमभजन्नर्तनक्रियां ॥५१॥ शस्त्रव्रण
मयःश्रीमदलंकरणभूषितः ॥ दहशेन्योरावणवदलंकरणभूषितः ॥५२॥ द्वि
पद्विशाशनछेदनिरस्तोरुयुगोपरः ॥ स्तिकण्वास्त्रेरुभयथावनवारुणविग्रहः
॥५३॥ भीमतामपरांभोधिसमेधितमहाहवे ॥ दास्त्रेकोपःशिवस्येवसमेधित
महाहवे ॥५४॥ दंतैश्विछिद्रैरकोपान्व्रतिपद्भंगजाड्व ॥ परिनिस्त्रिंशानिर्लूनक
रवालाःपदातयः ॥५५॥ रणेरभसिनिर्भिन्नद्विपपारविकासिनि ॥ नतत्रगतभीः

१३४
माघ॰

कश्चिद्द्विपपाटविकासिनि ॥५६॥ यावन्नसत्कृतैर्भर्तुः स्नेहस्यानृण्यमिषुभिः ॥ अ
मर्षादितरैस्तावत्तत्यजेयुधिजीवितं ॥५७॥ अयशोभिदुरालोकेकोपधामरणादृते ॥ अ
यशोभिदुरालोकेकोपधामरणादृते ॥५८॥ समुद्गयमकं ॥ सवलंतीनकविंतेह्याप
दभ्रागफलशालिनी ॥ अमोविशक्तिःशाक्तीकैर्लोहजानशरीरजा ॥५९॥ आप
दिव्याप्ततनयास्तथायुयुधिरेन्नृपाः ॥ आपदिव्याप्ततनयाविस्मयंजनतायया ॥ १३४ राम॰
६०॥ स्वगुणैराफलप्राप्तैराकृष्यगणिकाइव । कामुकानिवनालीकांस्त्रिणताः
सहसामुचन् ॥६१॥ वाजिनःशत्रुसैन्यस्यसमारब्धनवाजिनः ॥ वाजिनस्थक्षरा

ध
मध्यमविश्रान्तद्रुतवाजिनः ॥६२॥ पुरस्कृत्यफलंप्राप्तैः सत्पक्षाश्रमैशालिभिः ॥ कृतंपुं
खतयालेभेलक्ष्यमप्याशुमार्गणैः ॥६३॥ रक्तश्रुतिंजपासूनसमरागामिषुव्यधात् ॥
कश्चित्पुरःसपत्नेषुसमरागामिषुव्यधात् ॥६४॥ रयेणरणाकाम्यंतौदूरादपगतावुभौ
॥गतासुरतरादंतीवरंडकइवाभवत् ॥६५॥ भूरिभिर्भारिभिर्भीराभूभारैरभिरेभिरे ॥ भे
रीरेभिभिरभ्राभैरभीरुभिरिभैरिभाः ॥६६॥ द्व्यक्षरः ॥ निशितासिलतालूनैस्तथाहस्तै
र्हस्तिनः ॥ युध्यमानायथादंतैर्भग्नैरापुर्विहस्ततां ॥६७॥ निपीडनादिवमिथोदान
तोयमसृङ्नरतं ॥ वपुषामदयापाताद्भिन्नानामभितोगलत् ॥६८॥ असंयोगः ॥ रणांग

तांसरइवप्लावितंमदवारिभिः॥गजःस्थुकराकृष्टशतपत्रमलोडयत्॥६८॥शमच्च
तेगजेभृंगैःसुविषादिनिषादिनि॥रुतव्याजेनरुदितंतत्रासीदतिसीदति॥६९॥
स्त्रंतकस्यपृथ्वीतत्रशयनीयइवाविवे॥दशनव्यसनादीयुमंत्कुणत्वंमतंगजाः॥७१॥
स्त्रभीकमतिकेनेद्धेभीतानंदस्यनाशने॥कणत्सकामसेनाकेमंदकामकमस्यति
॥७२॥अर्द्धभ्रमः॥दधतोपिरणेभीममभीत्त्वांभाववमासुरे॥हताःपरैरभिमुखाःसुर १३५ राम०
भूयमुपाययुः॥७३॥युग्मं॥येनांगमूहेव्रणवत्सरुचापरतोमरैः॥समत्वेसययो
खङ्गत्सरुचापरतोमरैः॥७४॥निपातितसुहृत्क्वापिपिन्वव्याघ्रात्मातुले॥पालि

नीयमिवालोचि धीरैस्तत्समराजिरं ॥७५॥ अभाविसिंधासंध्या असहग्रुधिरतोयया
॥ द्रुतेयोत्तुंजनः पांशोसहग्रुधिरतोयया ॥७६॥ विदलत्पुष्कराकीर्णाः पतछेरव
समाकुलाः ॥ तरत्यत्ररथानद्यः प्रासर्पन्नरक्तवारिजाः ॥७७॥ असृज्जनोस्त्रस्वति
मानाः वमज्जवसादनं ॥ रक्षः पिशाचंमुमुदेनवमज्जवसादनं ॥७८॥ चित्रैश्चापैरपेत
ज्यैः स्फुरद्भत्नशतद्भदं ॥ पयोदजालमिवतद्वीराशंसनमावभौ ॥७९॥ वंध्यौविपत्रैर्ने
केननरेणहतदंतिके ॥ अशोचिसैन्यैर्घंटाभिर्नरेणोहतदंतिके ॥८०॥ हतैस्तैकीर्णामम
हीजेदंतैर्गात्रैश्चदंतिनां ॥ चूर्णलोकासुभिर्मृत्यो मुशलोलूखलैरिव ॥८१॥ युद्ध
मित्थंविधंतान्यमानवानभियोगतः ॥ चैद्यः परान्पराजिग्येमानवानभियोगतः ॥८२॥

१३६
माघ०

अथवक्षोमणिछायाछुरितापीतवाससा॥स्फुरदिंद्रधनुर्भिन्नतडितेवतडित्वता॥८३॥
नीलेनानालनलिनन्निलीनोल्ललनालिना॥ललनालालनेनालंलीलालालानेन
लालिना॥८४॥ अपूर्वयेवतत्कालसमागमसकामया॥दृष्टेनवपुषाराजन्नूकराच्चै
र्विजयश्रिया॥८५॥विभावीविभवीभाभोविभाभावीविवोविभीः॥भवाभिभावीभा
वावोभावाभावोभुवोविभुः॥८६॥द्व्यक्षरः॥उपेतुकामंतत्यारंनिष्ठितैर्योगिभिःप १३६
रैः॥देहत्यागकृतोद्योगैरदृश्यतपुमान्परः॥८७॥पंचभिःकुलकं॥तंश्रियाघनया राम०
नस्तरुचासारतयातया॥यातयातरसाचारुस्तनयानघयाश्रितं॥८८॥प्रतिलोमा
नुलोमः॥विद्विषोद्विपुरुद्दीव्यतथाप्यासत्रिरेनसः॥ऋच्यमपिरोगद्ध्रंनिस्तर्ग।

देवभेषजं ॥८९॥ तुरमं ॥ विदितंदिविकेनीकेतंयातंनिर्जिताजिनि ॥ विगादंगविरोद्धा
रोयोद्धायोनतिमेलिन ॥९०॥ प्रतिलोमेनसएवार्थः। नियोद्ध्यमाणेनपुरःकर्मण्यपि भि
गरीयसि ॥ आरोप्यमाणेनगुणंभर्त्राकार्मुकमानमत् ॥९१ तत्रवाणाःसुपुरुषःसम
धीयंतवारवः ॥ अभूद्द्विषांसुपरुषस्तस्याकृष्टस्यचारवः ॥९२॥ पश्चात्कृतानामप्यस्यन
गाणामिवपत्रिणां ॥ योयोगुणेनसंयुक्तःसमकर्णातिमागमत् ॥९३॥ प्रापेरूपीपुरारेपाः
परिपूरीपरःपरैः ॥ रोपेरपारैरुपरिपुपूरेपिपुरोपरैः ॥९४॥ द्व्यक्षरः ॥ शरवर्षीमहानादःस्फु
रत्कार्मुककेतनः ॥ नीलछविरसौरेजेकेशवच्छलनीरदः ॥९५॥ गूढचतुर्थकः ॥ दि
ग्मुखव्यापिनस्तीक्ष्णान्ह्रादिनोमर्मभेदिनः ॥ चिक्षेपैकक्षणेनैवसायकान्हि

२३१
माघ०

तांश्चसः॥९६॥ नकेवलंजनैस्तस्यलघुसंधायिनोधनुः॥ मंडलीकृतमेकांताद्दलमैक्षि
द्विषामपि॥९७॥ लोकालोकीकलोऽकल्कःकलिलोलिकुलालकः॥ कालोकलो
कलिःकालेकोलकेलिकिलाकिलः॥९८॥ द्व्यक्षरः॥ अक्षितारासुविव्याधद्विषतः
=ज्याणोजीवोधनुर्गुणः ६ सतनुत्रिणः॥ दानेषुस्थूललक्षत्वंनहितस्यशरासने॥९९॥ युगलकं॥ वरोविवरोवै
रिविवारीवारिरारवः॥ विववारवरोवैरंवीरोराविरिवौर्वरः॥१००॥ द्व्यक्षरः॥ मुक्ताने २३१॥
कशरंत्राणानहरद्भूयसांद्विषां॥ तदीयंधनुरन्यस्यनहिसेहेसजीवतां॥१०१॥ राजरा राम०
जीरुरोजाजेरजिरेजोजरोरजाः॥ रेजारिजरजोजोर्जोजीरराजर्जुरजर्जरः॥१०२॥ द्व्यक्षरः॥ उ
द्धतान्द्विषतस्तस्यनिघ्नतोद्वितयंपपुः॥ पानार्थरुधिरंधातोरक्षार्थंभुवनंशराः॥१०३

क्रूरारिकारीकोरेकःकारकःकारिकाकरः॥ कोरकाकारकरकःकरीरःकर्करार्करुक्॥१०४॥
विधातुमवतीर्णोपिलघिमानमसौभुवः॥ अनेकमरिसंघातमकरोद्भूमिवर्द्धनं॥१०५॥ स्वचक्रे सहस्रा मात्मनः ४४
सुगमं दारीदरदरिद्रोरिदमद्दमोद्भिद्दूरदः॥ दूरादरौद्रोददरद्रोदोरुद्दारुदौदरी॥१०६॥ द्विः॥
एकेषुणासंघतिथान्द्विषोभिंदन्द्रुमानिव॥ स जन्मांतररामैमैमुदयीरोपस्तदात
स्ते॥१०७॥ चक्रबंधः॥ इतिश्रीमाघकृतौ शिशुपालवधेमहाकाव्येश्र्यंकेदुष्करपुष्ठंमैकोन
विंशसर्गः॥ ॥१९॥ मुखमुल्लसितत्रिलेखमुच्चैर्भिदुरभ्रूयुगभीषणंदधानः॥ समि
तावतिविक्रमानमृष्यन्गतभीराह्वतचेदिराण्मुरारिं॥१॥ शितचक्रनिपातसंप्रती
क्षैवहतःस्कंधगतंचतस्यमृत्युं॥ अभिमौरिरथोयचोदिताश्वःप्रययौसारथिरूप

यानियत्वा ।।०२।। अभिचैद्यमगाद्रथोथ शौरेरवनिं जागुडकुंकुमाभिताम्रैः ।। गुरुनेमि
निपीडनावकीर्णव्यसुदेहस्रुतशोणितैर्विलुंपन् ।।०३।। स निरायतकेतनांशुकांतः
कलनिक्वाणकरालकिंकिणीकः ।। विरराज रिपुस्त्रिप्रतिज्ञामुखरो मुक्तशिखः स्वयं
नु मृत्युः ।।०४।। स जलांबुधरारवानुकारी ध्वनिरापूरितदिङ्मुखो रथस्य ।। प्रगुणीकृत
केकमूर्द्धकंठैः शितिकंठैरुपकर्णयांबभूवे ।।०५।। अभिवीक्ष्य विदर्भराजपुत्रीकुच १३८
काश्मीरजचिह्नमच्युतोरः ।। विससेवितयापि चेदिराजः सहसावापरुषा तदेव योगं ।।०६।। माघ०
जनिताशनिशब्दशंकमुच्चैर्धनुरास्फालितमध्वनन्नृपेण ।। चपलानिलचोद्यमान
कल्पक्षयकालाग्निशिखानिभमस्फुरज्ज्यं ।।०७।। समकालमिवाभिलक्षणीयग्रह

ह्य

संधानविकर्षणापवर्गैः ॥ अथ साभिसरं शरैस्तरस्वी स तिरस्कर्तुमुपेंद्रमभ्यवर्षत्
॥१८॥ अनजुताफलयोगसिद्धिभाजामुरुपक्षाश्रयिणां शिलीमुखानां ॥ गुणिना
नतिमागतेन संधिः सह चापेन समेऽजसा व नूव ॥१९॥ अविषज्यतमेकृत्ताधिकारे
वलिनाकर्मणि चेदिपार्थिवेन ॥ अरसद्धनुरुच्चकैर्हठाद्विप्रसभाकर्षणकंपमा
नजीवं ॥२०॥ अनुसंततपातिनः पटुत्वं दधतः शुद्धिभृतो गृहीतपक्षाः ॥ वदनादि
व वादिनोऽथ शाखाः क्षितिभर्तुर्धनुषः शराः प्रसस्नुः ॥२१॥ गवलासितकांतितस्य
मध्यस्थितघोरायतवाहुदंडनासं ॥ ददृशे कुपितांतकोन्नमद्भ्रुगभीमाकृति
कार्मुकं जनेन ॥२२॥ तडिदुज्ज्वलजातरूपपुंखैः खमयः श्यामामुखैरभिध्नद्भिः ॥

१३९ माघ०

जलदैरिवरंहसापतद्भिः पिदधे संहतिशालिभिः शरौघैः ॥१३॥ शितशैल्यमुखा
वभिन्नमेघच्छुरदंभःस्फुरतीव्रवेदनानां ॥ स्रवदस्रुततीवचक्रवालंककुभांबोभु
विषुः सुवर्णपुंखाः ॥१४॥ श्रमनोरमतांयतीजनस्यक्षणमालोक्यपयात्रभःस
दांच ॥ रुरुधे पिहिताहिमद्युतिद्यौर्विशिखैरंतरिताच्युताधरित्री ॥१५॥ विनिवारि
तमानुतापमेकंसकलस्यापिमुरद्विषोबलस्य ॥ वयसामिवचक्रमक्रियाकंपरि १३९ राम०
तोऽरोधिविपारपंजरेण ॥१६॥ इषुवर्षमनेकमेकवीरस्तदरिप्रस्तुतमच्युतः पृष
त्कैः ॥ अथवादिकृतंप्रमाणमन्यैः प्रणिरामप्रतिवादिवत्प्रमाणैः ॥१७॥ परि
कुंचितकूर्परेणातेनश्रवणोपांतिकनीयमानजीवं ॥ धृतिसमधनुर्घनोतमस्त्र

शार्ङ्गजालमयंसुमंसमंताद्रुरुसश्चेवनराधिपेनतेनो ॥१॥ इतिवेदिने १
इतिवेदि महीभृतांतदानींतदनीकंदनुसूदनस्य ॥८

चुक्रौंचरवानुकारमुच्चैः ॥१८॥ उरसा विततेन पातितांसः समयूरांचितमस्तकस्तदानीं
॥ च्छुणमालिखितोनुसौष्ठवेनास्थिरपूर्वापरमुष्टिराबभासे ॥१९॥ स्वनतोनित
रांरयेन्न गुर्व्यस्तडिदाकारचलज्जुणादसंख्याः ॥ उपवेधनुषः सशाङ्र्गमाशुन्यपत
न्नंबुधरादिवांबुधाराः ॥२०॥ शिखरोन्नतनिष्ठुरांसपीठः स्थगयन्नेककदिगंतमाय
तांतः ॥ निरवर्णि सकृत्प्रसारितोस्य क्षितिभर्तेव ककुभिरेकबाहुः ॥२१॥ तमकुंठ
मुखाः सुपर्णकेतोरिषवः क्षिप्तमिषुव्रजं परेण ॥ विभिदामनयंतकृत्तपक्षं नृप
तेर्नेनुरिवार्यथार्थवर्णाः ॥२२॥ दयितैरिवखंडितामुरारेर्विशिखैः संमुखमुक्तलो
गलेखैः ॥ लघिमानमुपेयुषी पृथिव्यां विफलाशत्रुशरावलिः पपात ॥२३॥ [redacted]

घस्मुरवेभिहतास्वपत्रवाहाः प्रसभं माधवमुक्तवक्रदंतैः ।। परिपूर्णतरं भुवोगतायाः परि
तः कातरवत्प्रतीपमीयुः ।।२४।। इतरेतरसान्निकर्षजन्मा फलसंघट्टविकीर्णविस्फुलिं
गः ।। पटलानि लिहन्बलाहकानामपरेषुज्वलणमह्वालल्कृशानुः ।।२५।। शरदेवशर
श्रियाविभिन्ने विभुनाशशुशिलीमुखाभ्रजाले ।। विकसन्मुखवारिजाः प्रकाशं वसुरा
शाइवयादवध्वजिन्यः ।।२६।। सदिवं समविंदहतौघैः कृततिग्मद्युतिमंडलापला
पैः ।। ददहेशोष्यततस्यचापयस्याऽसुरैकैव जनैः सकलुह्विस्त्रस्या ।।२७।। भवतिस्फुटमा
गतो विपक्षान्न सपक्षोपि हि निहते विधाता ।। शिशुपालबलानि कृष्णमुक्तः सुतरां
तेनततापतामरोघः ।।२८।। गुरुवेगविराविभिः पतत्रैरिषवः कांचनपिंगलांगभासः ।।

विनतासुतवत्सलं भुवः स्म व्यथितभ्रांतभुजंगमं विशंति ॥२९॥ शतशः परुषाः पु
रोपशांकं शिशुपालेन शिलीमुखाः प्रयुक्ताः ॥ परमर्मभिदोपि दानवारेरपराधा इव
न व्यथां वितेनुः ॥३०॥ विहिताद्भुतलोकसृष्टिमाये जयमिच्छन् किल मायया मुरारौ
॥ भुवनक्षयकालयोगनिद्रां नृपतिः स्वापनमस्त्रमाजहार ॥३१॥ सलिलार्द्रवराहदे
हलीलो विदधद्भास्करमर्थशून्यसंज्ञं ॥ प्रचलायितलोचनारविंदं विदधौ तद्बलमं
धमंधकारः ॥३२॥ गुरवोपि निषद्यं त्रिदृडुद्धं नुषिद्स्मापनयो न वाच्यमेतत् ॥ दृपि
तापदि जाग्रतोपि नित्यं ननु तत्रैव हितेन नैव त्रिबलाः ॥३३॥ श्लथतां व्रजत स्तदापरे
षामगलस्त्राणशक्तिमुज्झतः स्वां ॥ सुगृहीतमपि प्रमादभाजां मनसः शास्त्रमिवा

१४१
माघ

स्त्रमयपाणेः ॥३४॥ उचितस्वपनोपिनीरराशौवलयादौनिधिमध्यगास्तदानीं ॥ भु
वनत्रयकार्य्यजागरूकः सपरंतत्रपरः पुमानजागः ॥३५॥ अथसूर्य्यरुचीवतस्य
दृष्टावुदभूत्कौस्तुभदर्पणेगतायां ॥ पटुधामततोनचाद्भुतंतद्विधुरिंदुर्कविलो
चनः किलासौ ॥३६॥ महतः प्रणतेष्विवप्रसादः समणेरंशुचयः ककुम्मुखेषु ॥
विकसद्विकसद्विलोचनेभ्योददतालोकमनाविलंबलेभ्यः ॥३७॥ प्रकृतिंप्रति १४१ राम०
पादकैः स्वपादैश्चकृपेनानुमतः पुनः प्रसर्तुं ॥ तमसोभिभवादवाप्यमूर्छामुद
जीवत्सहसेवजीवलोकः ॥३८॥ गतसंतमसैर्जवेनभूयोयदुयोधैर्दधिरेधिरेहि
षंतः ॥ ननुवारिधरावरोधमुक्तः सुतरामुत्तपतेपतिः प्रभाणां ॥३९॥ व्यवहार

वान्तताभियोगं तिमिरं निर्जितवत्पथप्रकाशे ॥ रिपुरुत्तुंगभीमभोगभाजां भु
जगानां जननीं जजाप विद्यां ॥४०॥ श्वसदर्चिर्भृतस्ततः फणीन्द्रा विषमाशी
भिरनारतं वमन्तः ॥ अभवन्नुपगापहिलोलजिह्वायुगलीढभयसंक [redacted] भा
गमाविः ॥४१॥ कृतकेशविडंबनैर्विहायो विजयंतस्तगणामिहुभिश्छलेन ॥ अम
तायभुवः पुरेवपुछैर्वडवा भर्तुरवारिकाडवेयैः ॥४२॥ दधतस्तनिमानमानुपू
र्व्यावभुरत्त्विश्रवसो मुखैर्विशालाः ॥ भरतज्ञकविप्रणीतकाव्यग्रथितांका
ड्वनाटकप्रवेधाः ॥४३॥ स विषश्वसनोद्धतोरुधूमव्यवधिम्लानमरीचिपत्र

१४२
माघ

गानां॥उपरागवतेषुतिग्मभासावपुरोदुंबरमंडलाभमूहे॥४४॥शिखिपिछकृत
ध्वजावचूलदा[illegible]ासार्धंकविवर्त्तमानभोगाः॥यमपाशवदाशुवंधनायन्यपत
न्नहष्ठिवलेषुलेलिहानाः॥४५॥ पृथुवारिधिवीचिमंडलांतर्विलसत्फेनवितान
पांडुराणि॥दधतिस्मभुजंगमांगमध्येनवनिर्मोकरुचंध्वजांशुकानि॥४६॥ कृतमं
डलवंधमुल्लसद्भिःशिरसिप्रत्युरसंकिलंवमानैः॥व्यरुचज्जनताभुजंगभोगैर्द
लितेंदीवरमालभारिणीव॥४७॥परिवेष्टितमूर्त्तयश्चमूलादुरगैराशिरसःसरत्न
पुष्पैः॥दधुरायतवल्लिवेष्टितानामुपमानंमनुजामहीरुहाणां॥४८॥वहलं

१४२
रामः

व२

जननीलपिंडपटुद्युतयोदेहमितस्ततःश्रयंतः॥दधिरेफणिनस्तुरंगमेषुस्फुरपर्या
णनिबद्धधवलीलां॥४८॥प्रसृतंरभसादयोभिलीलाप्रतिपादंपरितोभिवेष्टयंती
॥तनुरायतिशालिनीमहाहेर्गजमंडूीवनिश्चलंचकार॥५०॥अथसास्मितवी
क्षितादवक्रालिलितैकोन्नमितभ्रूमाधवेन॥निजकेतुशिरःश्रितःसुपर्णादुदपत्
न्नपुलानिपक्षिराज्ञां॥५१॥द्रुतहेमरुचःखगाःखगेंद्रादलघूदीरितनादमुत्पतंत
तः॥क्षणमैक्षिषतो वृकेष्वमूभिर्ज्वलतःसप्तरुचेरिवस्फुलिंगाः॥५२॥उपमा
नमलंनिलोलपक्षक्षणविक्षिप्तमहांबुवाहमस्य॥गगनांतमितंतरांसुमेरोःकु

व१

१४३
माघं

ता

लजानां गरुडैरिलाधराणां ॥५३॥ पतंतां परितः परिस्फुरद्भिः परिपिंगीकृतदिङ्मुखै
र्मयूखैः ॥ सुतरामभवद्दरीच्युविंवस्त्रपनस्तत्किरणैरिवात्मदर्शी ॥५४॥ दधु
रंबुधिमंथनाद्रिमंथभ्रमणायस्तफणींद्रचित्तजानां ॥ हचमुल्लसमानवैनतेयद्यु
तिभिन्नाः फणधारिणो मणीनां ॥५५॥ अभितः क्षुभितांबुराशिधीरध्वनिराहृष्ट १४३
समूलपादपोघः ॥ जनयन्नभवद्युगांतशंकामनिलो नागविपक्षपक्षजन्मा ॥ रामः
५६॥ प्रचलत्खगेंद्रपत्रवातप्रसभोन्मूलितशैलदत्तमार्गैः ॥ भयविह्वलमाशु
ददृशुके विविशे राविद्विषोस्वमेवधाम ॥५७॥ खचरैः स्वयमस्यहि सैन्यसुहृत्कै

ते२

दुःकृतवत्त्रदोषपनीते॥ अनुगार्चिरिवज्वलत्तुषाथोरिपुवोदर्चिषमाजुहावमंत्रं॥५८॥
सहसाद्धदुद्धताट्टहासस्त्रियमुत्रासितजंतुनास्वनेन॥ विततायतहेतिवाङ्करुद्धेरथवे
तालकवालघपातवह्निः॥५९॥ चलितोच्छ्रितधूमकेतनोसोरभसादंवरमधिरोहित
स्वः॥ द्रुतमारुतसारथिः शिखावान्कनकस्यंदनसुंदरश्च्वाल॥६०॥ ज्वलदंवरको
टरांतरालंवहलार्द्रांवुदपत्रवद्धधूमं॥ परिदीपितदीर्घकाष्ठमुच्चैर्दवहिंश्चमुवोषजा
तवेदाः॥६१॥ गुरुताप्रविश्रुष्यदंवुशुभ्राः ज्वाणमालम्रक्षशान्तुताम्रभासः॥ स्वमस्त
रतयामघीभवंतः पुनराकारमवापुरंवुवाहाः॥६२॥ ज्वलितानललोलपल्लवांताः स्यु ८५

रदष्टापदपत्रपीतभासः॥ छायामात्रमुवामभावकालेमुतरामाणुरिवायतिंपताकाः
॥६३॥ निखिलामिति कुर्वतश्चिरायद्रुतचामीकरवारितामिव द्यां॥ प्रतिघातसमर्थ
मस्त्रमग्नेरथमेघंकरमस्मरन्मुरारिः॥६४॥ चलतुंबुधिगर्भधीरकुक्षेर्वपुषःसंधिषुली
नमर्वसिंधोः॥ उदगुः सलिलात्मनस्त्रिधाम्नोजलवाहावलयः शिरोरुहेभ्यः॥६५॥ १४४॥
ककुभः कृतनादमात्तपतांतस्तिरयंतः पर लानिभानुभासां॥ उदनंसिषुरभ्रमभ्र राम०
संघाः सपदिष्ण्यामलिमानमानयंतः॥६६॥ तपनीयनिकाषराजिगौरस्फुरदुत्ताल
तडिच्छटाट्टहासं॥ अनुवद्धसमुद्धतांवुवाहध्वनितांडवरंभवरंवनूव॥६७॥ सवि

सा५

तुः परिभावुकैर्मरीची॥नविराभ्यक्रमतंगजंगान्नाभिः॥ जलदैरभितः स्फुरद्भिरुच्चै
र्विदधे केतननैतवधूमकेतोः॥६८॥ ज्वलतः शमनाय चित्रभानोः प्रलयाज्ञावमि
वाभिदर्शयंतः॥ ववृषुर्वृषणादिनोनदीनामतितारोपितवारिवारिवाहाः॥६९
॥मफैरपिभूयसा समेघैः प्रथमं प्रत्युतवारिभिर्दिदीपे॥ पवमानसखस्ततः क्र
मेणप्रणयक्रोधइवाशमद्दिवादैः॥७०॥ परितः प्रसभेन नीयमानोरसवर्षैरवसा
यमाश्रयाशः॥ प्रबलेषु कृती चकार विद्युद्व्यपदेशेन घनेष्वनुप्रवेशं॥७१॥ प्रयतः
प्रशमं कृताशनस्य क्वचिदालक्ष्यत मुक्तमूलमर्चिः॥ बलभित्प्रहिता पृथाभिघातै

१४५ माघ०

नि२

त्रुटितंपत्त्रिपतेरिवैकपत्त्रं ॥७२॥ व्यगमन्नुसहसादिशांमुखेभ्यः शमयित्वाशि
खिनंघनाघनौघाः ॥ उपकृत्यँसर्गतःपरेषामुपरोधंनहिकुर्वतेमहांतः ॥७३॥
कृतदाहमुदर्चिषंशिखाभिःपरिषिक्तंमुहुरंभसानवेन ॥ विगतांबुधरावलं
प्रपेदेगगनंतापितपायितासिलक्ष्मीं ॥७४॥ इतिनिर्पतिरस्त्रैर्यदाविष्व १४५ राम०
कारप्रकुपितइवरोगः द्विट्प्रकारीविकारं ॥ भि[redacted]षगिवगुरुदोषच्छेदिनो
पक्रमेणक्रमविदथमुरारिःप्रत्यहंस्तत्तदस्त्रं ॥७५॥ शुद्धिंगतेरिपुपरामजुभिर्वि

१वि

द्विवाबाणैरजय्यमघट्टितमर्मभित्तं॥ मर्माणि तिग्मैरनुभिर्नितरामशुद्धैर्वाक्सा
यकैरथ तु तोदतदा विपक्षः॥७६॥ राकुस्त्रीस्तनयोरकारि सहसा येनाश्लेषा
लिंगनव्यापारैकविनोददुर्ललितयोः कार्कश्यलक्ष्मीर्हृथा॥ तेनाक्रोशत
एव तस्य मुरजित्तत्काललोलानलज्वालापल्लवितेन मूर्द्धविकलं चक्रेण
चक्रे वपुः॥७७॥ श्रियाजुष्टं दिव्यैः सपटहरवैरंपुष्पवर्षैर्वपुष्टश्चैद्यस्यक्षण
मृषिगणैः स्तूयमानं निरीय॥ प्रकाशेनाकाशे दिनकरकरांश्चिक्षिपद्विस्मिता
क्षैर्नरेंद्रैरौपेंद्रं वपुरथ विशद्धामवीक्षांबभूवे॥७८॥ सर्वाधिकारी सुकृताधिका

र्वितं ५३

१४६
माघ०

कारःश्रीधर्मलाभस्यवक्त्रवराङ्गः ॥ असक्तदृष्टिर्विरजाःसदैवदेवोपरःसुप्र
भदेवनामा ॥७९॥ कालेमितंतथ्यमुदर्कपथ्यंतथागतस्येवजनःसचेताः
॥ विनाविरोधात्स्वहितेछयेवमहीपतिर्यस्यवचश्चकार ॥८०॥ तस्याभव १४६
द्दत्तकइत्युदारःक्षमीमृदुर्धर्मपरस्तनूजः ॥ यंवीक्ष्यवैयासमजातशत्रोर्व राम०
चोगुणग्राहिजनैःप्रतीतं ॥८१॥ सर्वेणसर्वाश्रयइत्यनिंद्यमानंदभाजा
जनितंजनेन ॥ यश्चाद्वितीयंस्वयमद्वितीयोमुख्यःसतांगौणमवापनाम ॥८२॥

१४७

तेऊ

श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्मलक्ष्मीपतेश्चरितकीर्तनमात्रचारु ॥ त

माघ० स्यात्मजः सुकविकीर्तिदुराशयादः काव्यंव्यधत्तशिशुपालवधाभिधानं ॥८२॥

इतिश्रीशिशुपालवधेमहाकाव्येमाघकृतौशिशुपालवधोनामविंशतितमः १४७

सर्गः ॥ ॥२०॥ समाप्तोयंमाघकाव्यं ॥ संवतु १९१८ वर्षे द्वितीयज्येष्ठमासेकृ राम०

ष्णपक्षेषष्ठीशुक्रवासरे लिखितंहरिवंदासेन ॥ ॥ ॥ ॥श्रीराधाकृष्ण ॥

शा१

मि२

१४
१(B)

माघ काव्य नं ५८

(7)

इति शिशुपालवधम्

माघप्रणीतम्

1(B)